सुबोधिनी—**स एवमिति।** ऋषयो हि मन्त्रद्रष्टारः। येन मन्त्रेण भगवदङ्गानां मध्ये उत्कृष्टेन शीघ्रमस्य हृदयं शुद्धं भविष्यतीति तदुपकारार्थं शुकप्रवृत्तिं बोधयति। **वर्यपदेन** स्वहानिर्निवारिता। **अयमिति** पुरःस्थितत्वेन तस्य भगवत्त्वं फलं जातमिति परोपकारनिरतत्वं सूचितम्। **राज्ञेति** लोके तत्प्रश्नोत्तरमावश्यकम्। **परीक्षितेति** तस्य बीजसंस्कारः सूचितः। अत इदं तदुपकारीति **प्रत्याह**। सर्वतत्त्वपरिज्ञापनार्थं **सुबहुविदिति**। मुख्यभगवत्त्वेनोपस्थितत्वात् **प्रीतात्मा**। अत्रापि शङ्कान्तरं न कर्तव्यमिति **श्रूयतामित्याह** ॥५॥

व्याख्या ऋषि वे होते हैं जिन्होंने मन्त्रों के दर्शन किये हैं, मन्त्र भगवान् के अंग हैं, भगवान् के अंगरूप मन्त्रों में जो उत्तम मन्त्र है जिससे परीक्षित का हृदय शीघ्र शुद्ध होगा, उसे शुकदेवजी जानते हैं इसलिये उसके (राजा के) उपकारार्थं शुक ने श्रवण कराने की प्रवृत्ति की, यों सूतजी जानते हैं, शुकदेवजी को केवल ऋषि न कहकर 'वर्य' विशेषण दिया जिससे यह बताया है कि श्रवण कराने से उनके तपोबल की हानि नहीं होगी, 'अयम्' पद से यह सूचित किया है कि शुकदेवजी को भगवत्त्व फल की प्राप्ति हो गई, अर्थात् शुकदेवजी ब्रह्म रूप (भगवद्रुप) हो गए हैं, इसलिये परोपकार करने में निरत रहते हैं, 'राज्ञा' प्रश्न करने वाला राजा है अतः इसके प्रश्नों का उत्तर देना उचित होने से आवश्यक है, 'परीक्षित' नाम से यह सूचित किया है कि वह शुद्ध है क्योंकि उसका गर्भ में संस्कार हुआ है। अतः यह संवाद इसका उपकार करनेवाला है इसलिये कहा कि, शुकदेवजी बहुत जानने वाले हैं, जिससे राजा को सर्व तत्वों का ज्ञान करा सकेंगे, 'प्रीतात्मा' पद से यह भाव प्रकट किया है कि शुकदेवजी अब गुणातीत होने से ब्रह्मरूप हो गये हैं, और इस भगवद्रूप से उपस्थित हुए हैं इसलिये जो कुछ कहा जाय उसमें शङ्का नहीं करें इसलिये कहा है कि 'श्रूयताम्' सुनिये, अर्थात् पूछिये नहीं ॥५॥

आभास—अस्य परित्यागो भगवन्निमित्त भगवतैव कृत इति निरूपयितुम्, भगवत्पक्षपातिनो भगवद्विमुखैः सह स्थितिरनुचितेति वक्तुम् कौरवाणां भगवद्विमुखत्वमाह चतुर्भिः।

आभासार्थ—विदुर ने भगवान् के लिये ही परित्याग किया अथवा भगवान् ने विदुर को परित्याग की प्रेरणा की जिससे विदुर ने त्याग किया, यों निरूपण करने के लिये श्री शुकदेवजी कहते हैं कि जो भगवान् के पक्षवाले हैं अर्थात् भक्त हैं, उनको भगवान् से जो विमुख हैं उनके साथ रहना उचित नहीं है, यों कहने के लिये चार श्लोकों से कौरवों की भगवद्विमुखता बताते हैं—

श्री शुक उवाच–श्लोक—**यदा तु राजा स्वसुतानसाधून्पुष्णन्नधर्मेण विनष्टदृष्टिः।**
भ्रातुर्यविष्ठस्य सुतान्विबन्धून्प्रवेश्य लाक्षाभवने ददाह ॥६॥

श्लोकार्थ—श्री शुकदेवजी कहने लगे कि, जब, अपने दुष्ट पुत्रों को भी धृतराष्ट्र पालने लगा इस अधर्म से जिसकी अन्तर की दृष्टि भी नष्ट हो गई है जिससे छोटे भाई के बिना पिता के पुत्रों को लाक्षाभवन में प्रवेश कराके जलाया ॥६॥

कारिका—**विदुरस्य गृहत्यागे दशभिर्हेतुरूच्यते**
चतुर्भिरपराधोक्तिरेकेन हि समागमः।
त्रिभिर्मन्त्रोक्तिरपरे निषेधकनिवारणे ॥१॥

कारिकार्थ—विदुर के गृह त्याग में हेतु (कारण) दश श्लोकों से कहा जाता है उनमें से चार श्लोकों में धृतराष्ट्र के अपराधों को कहा है, एक श्लोक में धृतराष्ट्र से विदुरजी का मिलाप कहा है, तीन श्लोकों में विदुरजी ने धृतराष्ट्र को उपदेश दिया है शेष दो श्लोकों में उसको (विदुरजी को) बोलने से रोकना और निकाल देने का वर्णन है ॥१॥

सुबोधिनी—यदा त्विति। धर्मशास्त्रविरुद्धं लोकशास्त्रविरुद्धं नीतिविरुद्धमीश्वर वचनोल्लङ्घनमित्यपराधाः । यद्यपि धृतराष्ट्रेणैवं न कृतम, तथापि '**अप्रतिषिद्धमनुमतं भवति**' इति न्यायादपराधित्वं भवति, प्रयोजकत्वात् । स एव कथ्यते । नैमित्तिकत्वाच्च निमित्तपरित्यागकथनं न दोषाय । अत्र मुख्यापराधो भगवद्वाक्योल्लङ्घनम्, तत्स्वभावतो जीवस्य न घटत इति दोषत्रयसंनिपातस्तद्धेतुत्वेन वक्तव्यः । न हि संनिपाताभावे कश्चिद्भगवद्वाक्यं न मन्यते । तत्र प्रथमं तामसं दोषमाह–**यदेति** । **राजे**त्यदीर्घदर्शित्वम् । **तु**शब्दो विदुरस्य पूर्वस्नेहव्यावृत्तिसूचकः । **स्वसुतानिति** औरसत्वादत्यागः । असाधुसंवर्द्धनं दोषायेति तदधर्मेण सुतरामन्तर्दृष्टिरपि गता तदाह–**विनष्टदृष्टिरिति** । **भ्रातुर्यविष्ठस्येति** संबन्धकृतधर्मोऽपि नास्तीति सूचितम् । **विबन्धूनिति** सर्वथा दयाभावः । कनिष्ठभ्रातुः पाण्डोः पुत्रान् पाण्डवान् राज्यस्पर्द्धादिशङ्कारहितान् स्ववशान् पितृहीनान् सर्वथा परिपालनीयान् लाक्षाभवने प्रवेश्य विश्वासघातं कृत्वा ददाहेत्यर्थः अनेनाऽस्य क्रिया संपूर्णेति पाण्डवानाममरणेऽपि वधदोषो जात एवेति भावः ।।६।।

व्याख्या—धृतराष्ट्र के १–धर्मशास्त्र विरुद्ध, २–लोकशास्त्र विरुद्ध ३–नीति विरुद्ध और ४–ईश्वर के वचनों का उल्लंघन ये मुख्य चार अपराध हैं, यद्यपि (हालांकि) ये अपराध, स्वयं धृतराष्ट्र ने नहीं किये हैं, तो भी अपराधी वही है, क्योंकि नीति शास्त्र कहता है कि कोई भी मनुष्य बुरा कर्म करे यदि उसको रोका, नहीं जावे तो, न रोकनेवाला भी दोषी है। अतः ऐसे कुकृत्य करनेवाले को सहायता देने से राजा भी दोषी है, गृह त्याग निमित्त से हुआ है, अतः निमित्त से गृह परित्याग कहने में कोई दोष नहीं है, इन ४ अपराधों में से मुख्य अपराध, भगवान् की आज्ञा का उल्लंघन है, यह अपराध, जीव, स्वभाव से नहीं कर सकता है क्योंकि भगवदाज्ञा का उल्लंघन तब करता है जब उसको (जीव को) त्रिदोष का संन्निपात हो जाए, कारण कि सन्निपात ही इस प्रकार का कर्म कराता है, सन्निपात न होवे तो कोई भी भगवदाज्ञा का उल्लंघन नहीं कर सकता है। अतः वे दोष बताते हैं जिनमें से पहले तामस दोष बताते हैं। 'राजा' पद से कहते हैं कि इसमें दीर्घ दृष्टि नहीं है, और 'तु' पद से यह सूचित किया है कि उसका (धृतराष्ट्र का) जो विदुर पर पहले प्रेम था वह अब नहीं रहा है। 'स्वसुतान्' पद से यह भाव प्रकट किया है कि ये सुत अपनी धर्मपत्नी से स्वयं ने उत्पन्न किये हैं अतः ये औरस (सगे) पुत्र हैं इसलिये इनका त्याग नहीं कर सकता है। दुष्टों का पोषण करना दोष (अधर्म) है, उस अधर्म से धृतराष्ट्र की अन्दर (ज्ञान) की दृष्टि भी नष्ट हो गई है। इसलिये छोटे भ्राता के पुत्रों की रक्षा आदि धर्म, जो धर्म सम्बन्ध कृत है वह भी इसमें न रहा है पितादि सम्बन्धियों से विहीनों की रक्षा नहीं करने से इसमें दया का अभाव प्रकट हो रहा है, फिर वे भतीजे कैसे जिनसे राज्यस्पर्द्धा आदि का लेशमात्र भी भय नहीं, अपने आधीन, पितृहीन अतः सर्वथा पालन के योग्य उनको लाक्षाभवन में प्रवेश कराके जलाया, यह कृत्य विश्वासघात का है, इससे इसका सम्पूर्ण कार्य अधार्मिक होने से अपराध ही है, हालांकि पांडव (जलने से बच गये) मरे नहीं तो भी मारने का दोष इसको लग ही गया है, यों भाव है ।।६।।

आभास—राजसं दोषमाह,

आभासार्थ – 'यदा सभायां' श्लोक में धृतराष्ट्र के राजस् दोष को कहते हैं।

श्लोक—यदा सभायां कुरुदेवदेव्याः केशावमर्शं सुतकर्म गर्ह्यम् ।
न वारयामास नृपः स्नुषायाः स्वास्त्रैर्हरन्त्याः कुचकुङ्कुमानि ॥ ७ ॥

श्लोकार्थ—जब राजा धृतराष्ट्र ने, अपने आंसुओं से कुचकुङ्कुम को धोती हुई पुत्र वधु कुरुदेव की रानी के केशों को खेंचने के निन्द्य कर्म करने से अपने पुत्र को रोका नहीं ॥ ७ ॥

सुबोधिनी—**यदेति** । भगवता संरक्षितानां तेषां राजसूयेन राजत्वयुक्तानां राज्याकाङ्क्षां परित्यज्य तूष्णीं स्थितानां बलादपराधकरणं सर्वनाशकम् । युधिष्ठिरस्य कुरुदेवत्वात् राजपत्नी-केशाकर्षणं सर्वनाशायेति जानन्नपि न वारयामास । **सभायामिति** परलोकनाशोऽपि सूचितः । **'सभां वा न प्रवेष्टव्यम्'** इति स्मृतेः । **अवमर्श** आकर्षणम् । उत्पादकस्य परिपालनमावश्यकमिति सुतपदम् ; परलोकसाधकत्वाभावात् न पुत्रपदम् । **कर्मेति** । दुरदृष्टजनकम् । **गर्ह्यमिति** लोकेऽपि निन्दाजनकम् । "**ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः । स्रवते ब्रह्म तस्याऽपि भिन्नभाण्डात्पयो यथा**" इति । सम्बन्धरहितानां ब्राह्मणानामप्येतदुचितम् । तदपि न कृतवानित्याह-न वारयामासेति । अनेन क्षत्रत्वं तस्य गतमिति सूचितम् । नृप इति सामर्थ्यम् । स्नुषाया इत्यतिलोकविरोधः । **अस्त्रैः कुचकुङ्कुमानि हरन्त्या इति** दयाहेतुत्वममङ्गलत्वं च सूचितम् । **स्व**शब्देनास्त्राणामलौकिकसामर्थ्यं सूचितम् । **कुचकुङ्कुमानीत्युपरि** वस्त्राभावः । कुङ्कुमानामपि गमनेऽतिलज्जा । इतररागाभावार्थं तथा करणम् । एवं प्रत्यक्षतोऽपि क्रौर्यं निरूपितम् ॥ ७ ॥

व्याख्या—भगवान् जिनकी पूरी तरह से रक्षा कर रहे हैं, जिन्होंने राजसूय यज्ञ कर राजापन को भी प्राप्त कर लिया है, तो भी राज्य की आकांक्षा का परित्याग कर जो मौन धारण कर रहे हैं, ऐसों का बलपूर्वक अपराध करने से सर्वनाश होता है, राजा धृतराष्ट्र जानता था कि युधिष्ठिर अब कुरुदेव है अतः उसकी पत्नी राजपत्नी (रानी) हुई है उसके केशों के खींचने से सर्वनाश होगा फिर भी पुत्र को रोका नहीं । रानो के केशों को खींचने का निन्द्य कर्म 'सभा' में हो रहा था जिसको राजा होते हुए भी धतराष्ट्र ने रोका नहीं, जिससे परलोक के नाश की भी सूचना हुई है, क्योंकि स्मृति-शास्त्र में कहा है कि 'सभां न प्रवेष्टव्यं' जहां अधर्म होता हो ऐसा सभी में प्रवेश ही न करना चाहिये जो प्रविष्ट हो तो जो अधर्म को रोके नहीं तो पापी होता है, यह तो साधारण व्यक्ति के लिए हैं किन्तु धृतराष्ट्र राजगद्दी पर बैठकर अधर्म को न रोके तो उसका परलोक तो अवश्य नष्ट ही होगा । 'अवमर्श' पद का तात्पर्य है 'खींचना' 'सुत' पद से यह सूचित किया है कि, पैदा करनेवाले (पिता) को उत्पादित (सुत) का पालन आवश्यक है, 'पुत्र' पद न देकर 'सुत' पद क्यों दिया ? जिसका भावार्थ बताते है कि 'पुत्र' उसको कहा जाता है जो पिता का परलोक सुधारे अर्थात् ऐसे सत्कर्मादि करे जिनसे पिता नरकादि में न जाकर परम पद को प्राप्त हो ऐसी योग्यता दुर्योधन में न होने से उसको 'सुत' कहा है, 'सुत का कर्म' इस कर्म पद से यह बताया है, कि यह निंद्य कर्म, खराब प्रारब्ध बताने वाला है, 'गर्ह्यम्' पद से यह सूचित किया है कि, यह कुकर्म, लोक में भी,

निन्दा जनक है, 'ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः । स्रवते ब्रह्म तस्यापि भिन्नभाण्डात् पयो यथा' ब्राह्मण समदृष्टि वाला और शान्तचित्त हो किन्तु यदि वह दीनों पर दया न करे एवं उनकी उपेक्षा करे तो उस ब्राह्मण का ब्राह्मणत्व ऐसे बह जाता है जैसे टूटे हुए घड़े से पानी निकल जाता है । अतः सम्बन्ध रहित ब्राह्मणों को इस निन्द्य कर्म को रोकना उचित था अर्थात् धृतराष्ट्र को इस कर्म को ब्राह्मणों द्वारा रुकवाना चाहिये था, यों भी नहीं किया, इससे यह सूचित किया कि उसका क्षत्रियत्व नष्ट हो गया, 'नृप' पद से जताया है कि इसमें यों करने की सामर्थ्य थी, 'स्नुषायाः' पद से यह सूचित किया है कि यह कर्म लोक से भी बिल्कुल विरुद्ध है, 'आँसुओं से स्तनों के कुंकुम को धोती हुई' इस पद से दो भाव प्रकट किये है (१) आँसुओं को देख दया आनी चाहिये, आँसू बहना दया का हेतु है, (२) अमङ्गल का चिन्ह है, 'स्म' पद कहकर यह सूचना दी है कि 'आँसूओं में दया उत्पन्न करने की अलौकिक सामर्थ्य है, तो भी इसको (धृतराष्ट्र को) दया न आई, 'कुचकुङ्कुम पद से यह बताया कि उस समय रानी की छाती वस्त्र रहित थी फिर आँसुओं से कुङ्कुम बह जाने से तो छाती स्पष्ट नग्न दीखने में आने लगी, जिससे रानी अति लज्जा वाली हो गई थी, धृतराष्ट्र का पुत्र में ही प्रेम था जिससे दूसरे के दुःख को न देख यों करने दिया, इस तरह प्रत्यक्ष में भी राजा की अति क्रूरता निरूपण की है ।। ७ ।।

आभास—सात्त्विकं दोषमाह,

आभासार्थ— 'द्यूते त्वधर्मेण' श्लोक में धृतराष्ट्र का सात्विक दोष बताते हैं ।

श्लोक—**द्यूते त्वधर्मेण जितस्य साधोः सत्यावलम्बस्य वनागतस्य ।**
न याचतोऽदात्समयेन दायं तमो जुषाणो यदजातशत्रोः ।।८।।

श्लोकार्थ—द्यूत में (जुआ खेलने में) अधर्म से, साधु, सत्यनिष्ठ अजातशत्रु को जीतकर वन भेजा गया, वह जब वन से लौट कर अपना राज्य दिये हुए वचन के अनुसार मांगने लगा, तब सुत के मोह के अधीन हो राज्य नहीं लौटाया ।। ८ ।।

सुबोधिनी—द्यूते त्विति । तुशब्देन अस्मिन् कृते पूर्वं कृता अपराधा अपि अकृता भवन्तीति सूचितम् । पूर्वं तेषां राज्यापहरणं केवलमधर्मेणैव तदपि सोढ्वा महद्दुःखमनुभूय स्वकीयं **दायं** शास्त्रतो लोकतश्चाविरुद्धं **समयेन** मर्यादया **याचतो** याचयतः । याचमानाय वा, पदव्यत्ययश्छान्दसः । अदाने हेतुस्**तमो जुषाण** इति मोहं जुषाणः । **अजातशत्रोरिति** विपरीतशङ्काभावः । स्वकृतनियमोल्लङ्घनान्मोहः ।।८।।

व्याख्या—'तु' शब्द से यह बताया है कि अब, राज्य लौटाकर न देने का अपराध किया, उससे आगे के अपराध मानो किये ही नहीं थे, अर्थात् इस अपराध की महत्ता में वे कुछ नहीं हैं,

इनका राज्य लेना केवल अधर्म से ही था, किन्तु वह भी सहन कर बनवास के महद्दुःख को भोगकर जब लौट आये तब अपना भाग जो शास्त्र और लोक के अनुसार योग्य थ। और जैसा वचन उस समय दिया था तदनुसार मांगने लगे, 'याचमानाय' के स्थान पर 'याचतः' पद दिया है, यह वैदिक प्रयोग समझना चाहिये, क्यों न दिया ? जिसका कारण बताते हैं कि 'तमो जुषाणः' मोहाधीन हो गया था, क्यों मोहाधीन हुआ जिसके उत्तर में कहते हैं, कि अपने किये हुए करार के उल्लंघन करने से धृतराष्ट्र को मोह हुआ, युधिष्ठिर को अजातशत्रु कहकर यह सूचना दी कि युधिष्ठिर के संबंध में विपरीत शङ्का का सर्वथा अभाव ही है ॥८॥

आभास—एवं त्रिदोषव्याप्तो भगवद्वाक्यं नाङ्गीकृतवानित्याह,

आभासार्थ इस त्रिदोष ग्रस्त धृतराष्ट्र ने भगवान् के वचन को माना नहीं। जिसका वर्णन 'यदा च पार्थप्रहितः' श्लोक में करते हैं—

श्लोक—**यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ।**
न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः ॥९॥

श्लोकार्थ—जब युधिष्ठिर भेजे हुए जगद्गुरु श्रीकृष्ण के सभा में कहे हुए वे वचन जिनको प्रत्येक अमृतमय जानता है, उन वचनों को धृतराष्ट्र ने माना नहीं, क्योंकि उसके सब पुण्य नष्ट हो गये थे ॥९॥

सुबोधिनी—**यदा च पार्थेति**। पृथासम्बन्धात्प्रेषणं नात्यन्तानुचितम्। स्वतो न दत्तवानेव। यदा च न दत्तवान् तदा **पार्थेन** युधिष्ठिरेण **प्रहितः** प्रेषितः (सः) **भगवान् यानि जगाद तानि नोरु मेन इति** सम्बन्धः। **सभायामित्युक्ते** र्लोकप्रतीत्याऽपि नाऽन्यथाकथनम्। **जगद्गुरुरिति** सर्वेषां हितोपदेशकर्तृत्वात् परमार्थतोऽपि नान्यथाकरणम्। **यानि जगादेति**। सन्ध्यनुगुणतया अविरोधवाक्यानि जगद्गुरुत्वप्रतिपादनार्थं धर्मान्तरेणान्यथावचनव्यावृत्त्यर्थम्। सर्वेषामेव तानि वाक्यानि सर्वदुःखनिवर्त्तकानीत्याह-**अमृतायनानीति**। अमृतस्य अयनानि स्थानभूतानि अमृतकुण्डिका इत्यर्थः। यथा क्षीरसागरं मथित्वाऽमृतकलशमुद्धृतवानेवं सर्वशास्त्राणि मथित्वा तानि वाक्यान्युद्धृत्य व्याहृतवानित्यर्थः। राजत्वादज्ञानपोषः। पूर्वं जीवनसुकृतम्, राज्यभोगसुकृतम्, जीवत्पुत्रसुकृतं चेति लेशत्रयं स्थितम्। तन्मध्ये क्षताः पुण्यलेशा यस्य स तथोक्तः। उरुसंमाननायां न कश्चनापकारो भवेदिति भावः। जीवनं विद्यमानमपि गतप्रायं सूचितम्, पुण्यांशस्य गतत्वात्। केवलं पापांशेन जीवतीति भावः ॥९॥

व्याख्या—पृथा के सम्बन्ध से युधिष्ठिर ने श्री कृष्ण को धृतराष्ट्र के पास भेजा यह कार्य अत्यन्त अनुचित तो नहीं है, उसने (धृतराष्ट्र ने) स्वयं तो समय पर दिये हुए बचन के अनुसार राज्य नहीं लौटाया, तब युधिष्ठिर ने भले के लिये उस (धृतराष्ट्र) को समझाने के लिये भेजा, उस

भगवान् कृष्ण ने जो कुछ कहा उस राजा धृतराष्ट्र ने अच्छा नहीं समझा अर्थात् माना नहीं, 'सभायाँ' पद देकर यह बताया है कि भगवान् ने जो वचन कहे वे लोक प्रतीति से भी उचित थे, अर्थात् सभासदों ने भी उन वचनों को हितकारी समझा, 'जगद्गुरु' पद देने का आशय है कि आप जगत् के अन्धकार के नाशकर्ता होने से सबको हितकारी उपदेश ही देते हैं, परमार्थ से भी आप कभी भी अहित नहीं करते हैं, यानि जगाद' जो वचन कहे वे सब सन्धि के अनुरूप ही थे, उसके (सन्धि के) विरुद्ध नहीं थे, ऐसे वचन अपना जगद्गुरुत्व सिद्ध करने के लिए ही कहे हैं, आप युधिष्ठिर के भेजे हुए हैं इसलिये अन्यथा वचन (धृतराष्ट्र के अहित में) भी न कहे इसको अपने कहे हुए वचनों से सिद्ध किया है, ये वचन सबके दुःखों को मिटाने वाले हैं यों सिद्ध करने के लिये 'अमृतायनानि' विशेषण दिया है जिसका अर्थ है अमृत के स्थान हैं अर्थात् उन वचनों में अमृत भरा पड़ा है जैसे क्षीर सागर के मन्थन से अमृत निकला है वैसे आपने शास्त्ररूपी क्षीरसागरका मन्थन कर ये अमृत वाक्य निकालकर बाँटे हैं, राजा होने से अज्ञान से पुष्ट था, जिससे पहले जो, जीने का पुण्य, राज्य भोग का पुण्य, और पुत्र जीते रहे वे पुण्य थे, किन्तु पहले किये तीन दोषों से उनके पुण्य प्रायः नष्ट हो गये, राजा धृतराष्ट्र यदि भगवान् के वचनों का आदर करता तो उसका किसी प्रकार अपकार (हानि) न होता था, यद्यपि जीते हैं किन्तु वह जीना मरने के समान है कारण पुण्यांश नष्ट हो गया है । अतः अब केवल पापाँश से जीते हैं ॥९॥

आभास—एवं पुत्रस्नेहेन भगवद्वाक्योल्लङ्घने कृते, तत्प्रभृति स्वतस्तद्गृहे अगच्छन्नपि यदा उपहूत आकारितस्तदा भवनं प्रविष्ट इत्याह—

आभासार्थ—धृतराष्ट्र ने जब से पुत्र स्नेह के कारण भगवान् के वाक्यों का उल्लङ्घन किया तब से विदुरजी ने स्वतः उसके घर जाना छोड़ दिया था जब राजा ने बुलाया तब गए--जिसका वर्णन निम्न श्लोक में करते हैं—

श्लोक—यदोपहूतो भवनं प्रविष्टो मन्त्राय पृष्टः किल पूर्वजेन ।
अथाऽऽह तं मन्त्रजुषां वरीयान् यन्मन्त्रिणो वैदुरिकं वदन्ति ॥१०॥

श्लोकार्थ—जब बड़े भाई ने बुलाया तब विदुर उसके घर गया, वहां उससे (विदुर से) सलाह ली गई, मन्त्र को जानने वालों में श्रेष्ठ, जिसको मन्त्रीगण 'वैदुरिक' कहता है, उस विदुर ने बड़े भाई को सलाह दी ॥१०॥

सुबोधिनी—यदेति । तदनन्तरं मन्त्रार्थं पृष्टः **किलेति** वचनं स्वस्य तथाऽनुसन्धाने व्यर्थगूढार्थभावकत्वात् अनात्मवित्त्वं स्यादिति तन्निराकरणार्थमुक्तम् । **पूर्वजेनेति** कथनावश्यकत्वम् । तथा भिन्नक्रमेणोक्तवानित्याह **अथाहेति** । सम्बन्धादिकमनपेक्ष्य भयादिकमप्यनपेक्ष्य **अथ** स्वतन्त्रतया आह । तस्य मन्त्रस्य प्रसिद्धिमाह—**तमिति** । तादृशकथने हेतुः—**मन्त्रदृशां वरीयानिति** । यथा वेदे **'स एतं मन्त्रमपश्यत्'** इति बृहस्पतिप्रभृतयो मन्त्रद्रष्टारो भवन्ति, तथा नीतिशास्त्रेऽपि ये मन्त्रद्रष्टार तेषां मध्ये वरीयान् । किञ्च । अस्य मन्त्रस्य सर्वलोकप्रसिद्धिरस्तीत्याह-**यन्मन्त्रिण** इति विदुरेण प्रोक्तं **वैदुरिकमिति** । तेन प्राक्तमित्यधिकारसिद्धत्वात् सर्वजनीनप्रसिद्धिः ॥१०॥

व्याख्या—विदुर जी के आ जाने के अनन्तर धृतराष्ट्र ने विदुरजी से सलाह पूछी, शुकदेवजी को मन्त्रणा का अनुसन्धान रहे तो वे, व्यर्थ गूढ़ अर्थ का चिन्तन कर्त्ता होने से, यों जानने में आ जाये कि ये आत्मा को नहीं जानते हैं, इस प्रकार की शंका के निराकरणार्थ 'किल' पद दिया है।

मन्त्र (सलाह) पूछने वाले बड़े भाई हैं अतः सलाह देनी आवश्यक है, यों विदुर ने समझा, अतः भिन्न प्रकार से कहने लगे कि 'अथाह' 'अथ' पद का भावार्थ है कि विदुरजी ने मन्त्र देने के वक्त सम्बन्ध आदि की परवाह नहीं की, किसी प्रकार का भय भी मन में न लाए, निडर हो स्वतन्त्रता पूर्वक कहने लगे। उस मन्त्र की प्रसिद्धि को 'तं' पद से कही है, ऐसा कहने में हेतु कहते हैं 'मन्त्रजुषां (दृशां) 'वरीयान्' विदुरजी मन्त्र कहने वालों में (राजनीति जाननेवालों में) उत्तम हैं जैसे वेद में 'स एतं मन्त्रमपश्यत्' उसने इस मन्त्र को देखा, अतः वृहस्पति आदि मन्त्र दृष्टा हैं, वैसे ही नीति शास्त्र में भी जो मन्त्रदृष्टा हैं उनमें ये (विदुर) उत्तम हैं, और विशेष इस मन्त्र की सर्व लोक में प्रसिद्धि है, इसलिये कहा है, 'यन्मन्त्रिणः' जिसको मन्त्री वैदुरिक अर्थात् विदुर का कहा हुआ मन्त्र वैदुरिक है, इससे विदुरजी का मन्त्र कहने में अधिकार सिद्ध है जिससे इसकी सर्वत्र जगत् में प्रसिद्धि है ॥ १० ॥

आभास—मन्त्रमेवाऽऽह—

आभासार्थ—इस 'अजातशत्रोः' श्लोक से 'मन्त्र' (सलाह) कहते हैं।

श्लोक—अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवाऽऽगः ।
सहानुजो यत्र वृकोदराहिः श्वसन्रूषा यत्त्वमलं बिभेषि ॥ ११ ॥

श्लोकार्थ—तेरे असह्य अपराध को सहन करने वाले, अजातशत्रु को उसका भाग (राज्य) दे दे, उसके पास उसके छोटे भ्राताओं में क्रोध से सर्प की तरह फुत्कार करने वाला वृकोदर सर्प है, जिससे तुम बहुत डरते हो ॥ ११ ॥

सुबोधिनी— अजातशत्रोरिति । इति उपायचतुष्टयमध्ये दानमेव मन्त्रः । **दायमिति** न हीनता **अजातशत्रोरिति** विपरीतशङ्काभावः । तस्याजातशत्रुत्वं न केवलं नामतः, किन्तु कार्यतोऽपीत्याह अन्यैर्दुर्विषहमपराधं सहत इति । अजातशत्रुत्वादेवाऽदानमस्त्वित्याशङ्क्य भीममुपस्थापयति । **सहानुज** इति अनुजैः सह वर्तत इति । सादेशा भ वः । अर्जुनादीनामपि क्रूरत्वं सूचितम् । **यत्र** यस्य राज्ञो निकटे **रुषा श्वसन्** वृकोदरनामा अहिरस्ति । न हि सर्पवैरं कार्यमकृत्वा निवर्त्तते । तस्मात्तत्सन्तोषार्थं दायं देयमित्यर्थः । ननु ते चत्वारः किं करिष्यन्ति, मम तादृशाः शतं पुत्राः सन्तीत्याशङ्क्याऽऽह—**यत्त्वमलं विभेषीति** । यस्मात् भीमादेकस्मादपि त्वमलं बिभेषि । आकाशवाणीश्रवणादेक एव भीमः सर्वान्मारयिष्यतीति शतमप्यप्रयोजकम् । विपरीतशङ्काऽपि निवारिता । आस्त इत्यर्थात् । अनेन भेदो दण्डश्च निवारितः । दायत्वाच्च अदाने न साम ॥ ११ ॥

व्याख्या—नीति शास्त्र में जो शत्रु को वश करने के चार (साम, दान, भेद और दंड) उपाय कहे हैं उनमें से दान (राज्य देना) ही मेरा मन्त्र (सलाह) है, राज्य भाग देने से आपकी हीनता न

होगी, 'युधिष्ठिर' अजातशत्रु है उसका अजातशत्रुपन नाम मात्र नहीं है, किन्तु कार्य से भी उसने अपना अजातशत्रुपन सिद्ध कर दिखाया है, जैसे कि तुमने जो उसको दुःख दिये वे असह्य थे इसके स्थान पर दूसरा कोई होता तो सहन नहीं करता किन्तु इसने शान्तिपूर्वक सहन किये हैं, यदि कहो कि, यों है तो राज्य भाग न दिया जावे तो वह भी सहन कर लेगा, फिर मैं पुत्र को नाराज कर इसको राज्य क्यों दूं ? जिस पर कहते हैं कि 'सहानुजः' यह अकेला नहीं है, इसके साथ अन्य भ्राता भी हैं, और वे इसके समान शान्त नहीं हैं, उनमें क्रूरता है, अर्जुनादि भी क्रूर हैं किन्तु उनमें से क्रोध मे सर्पसम फुत्कार करने वाला वृकोदर (भीमसेन) नामवाला भाई तो सर्प है, सर्प अपने वैर का बदला लिए बिना शान्त नहीं होता है, इसके कारण उनके सन्तोषार्थ भाग देना चाहिये, यदि कहो कि वे चार हैं, मेरे वैसे बली सौ बेटे हैं उनको ये चार क्या कर सकेंगे ? चार की बात तो छोड़ दीजिये तुम तो एक भीम से ही डर रहे हो क्योंकि आकाशवाणी श्रवण से आपको मालुम है कि एक भीम ही सबको मारेगा, इसलिये सौ की संख्या किसी अर्थ (मतलब) की नहीं है, यों कहने से यह भी बता दिया कि कौरव पाण्डवों को मार नहीं सकेंगे, अतः 'भेद' और 'दण्ड' भी व्यर्थ हैं उनका 'भाग' है अतः 'साम' भी न होगा ॥११॥

आभास—सहायाभावमाशङ्क्य एकसहायेनैव त्रैलोक्यजयसामर्थ्यं भवतीति तं विशिनष्टि—

आभासार्थ—वे चार ही हैं, उनकी सहायता करनेवाला कोई राजादि नहीं है, इस शंका पर कहते हैं कि ये पाण्डव, एक की सहायता से ही तीन लोक को जीतने की सामर्थ्यवाले हैं, इस एक का 'पार्थांस्तु' श्लोक में स्पष्टीकरण करते हैं ।

श्लोक—**पार्थांस्तु देवो भगवान्मुकुन्दो गृहीतवान् स क्षितिदेवदेवः ।**
आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥१२॥

श्लोकार्थ—पाण्डवों को तो, भगवान् मुकुन्ददेव ने अपना कर लिया, वे भगवान् भू-देवों (ब्राह्मणों) के देव हैं, यादवों के देव हैं और सब राजाओं के भी देव हैं क्योंकि उन सबको जीत लिया है, वैसे प्रभु अपने भक्तों की पुरी में ही रहते हैं ॥१२॥

सुबोधिनी - **पार्थांस्तु देव** इति । सहायार्थं प्रार्थनापि नापेक्ष्यते । तु पुनः स्वयमेव गृहीतवान् । **पार्थानिति** सम्बन्धेन बहुवचनन च सर्वथा तदुद्योगो लक्ष्यते । न हि बहून् स्वकीयान् गृहीत्वा कश्चित्तूष्णीं तिष्ठति । देवत्वान्न मानुषैर्जेतुं शक्यः । अत एव दुर्योधनस्य दैत्यत्वान्मारणमपि गम्यते । देवदैत्यानामजेयत्वाय **भगवानिति** । अनेन प्रारब्धकर्मापि चोद्विपरीतं भवेत्, तदप्यन्यथा कुर्यादिति सूचितम् । कालजयाय **मुकुन्द** इति । अन्येषामपि दुःखं दूरीकृत्य मोक्षदातु कालजयः किं वक्तव्य इत्यर्थः । अनेन राज्यदानं चावश्यकमिति ज्ञापितम् । किञ्च । **स भगवान् क्षितिदेवदेव** इति । क्षितिदेवा ब्राह्मणास्तेषामपि देवस्तद्धितकर्तृत्वात् । अतो यत्र भगवांस्तत्रैव ब्राह्मणा इति अपि न सहायाः । किञ्च । **आस्ते स्वपुर्यां यदुदेवदेव** इति यो भगवान् स्मृतो ध्यातो वा सर्वमनिष्टं निवार्य राज्यादिकं प्रयच्छति । तत्र साक्षादेव भक्तानां हितार्थे भक्तपुर्यामास्ते । किञ्च

यदुदेवा यादवा यदोर्वंशे उत्पन्ना देवा इति तेषामपि देव इति यत्र भगवांस्तत्रैव यादवा इति। तव बन्धुसहायोऽपि नास्तीत्युक्तम्। किञ्च। **विनिर्जिताशेषनृदेवदेव** इति। नृदवा राजानस्ते सर्वे विशेषेण निर्जिता येन। तमपि विजिगीषत इति जरानन्धादिजेतृत्वेन सर्वे राजानस्तद्वश्याः। अतस्तव राजसहायोऽपि नास्तीत्युक्तम्। नृदेवदवा जरासन्धादयस्ते वा निर्जिता येन। अतो निर्बलस्य तव जये कः प्रयास इति भावः ॥१२॥

व्याख्या—पांडवों को अपनी सहायता के लिये प्रार्थना करने की भी आवश्यकता नहीं है, कारण कि इनको भगवान् ने स्वतः अपना लिया है, 'पार्थान्' पद से एक सम्बन्ध बताया है जिससे और बहुवचन से यह सूचित किया है कि इनकी रक्षा आदि कार्य के लिये स्वयं भगवान् उद्यमशील हैं, कारण कि बहुतों को अपना लेने के बाद कोई चुप चाप नहीं बैठता है, आप देव हैं अतः इनको मनुष्यादि कोई भी जीत नहीं सकता है, इस कारण से यों भी समझा जाता है कि दुर्योधन दैत्य है उसको मारेंगे ही, 'भगवान्' पद से यह बताया है देव अथवा दैत्य कोई भी इनको जीतने में समर्थ नहीं है, इससे (भगवान् पद से) यह भी बताया है कि यदि पाण्डवों का प्रारब्ध जीतने के विपरीत हो अर्थात् हार जाने का हो तो उसको भी पलट सकते हैं, 'मुकुन्द' नाम से बताया है कि काल पर विजय करना इनके लिये कोई बड़ी बात नहीं है, क्योंकि जो दूसरों के भी दुःख दूर कर, उनको मोक्ष दे देते हैं, उनके लिये काल पर विजय क्या वस्तु है? कुछ नहीं, इससे धृतराष्ट्र को सूचित किया कि पाण्डवों को राज्य देना आवश्यक है। वे भगवान्, साधारण अनित्य नहीं हैं किन्तु जिसमें नित्य भगवत्व रहता है वे हैं अतः कहा है 'क्षितिदेवदेवः' पृथ्वी के देव अर्थात् ब्राह्मण उनके भी देव हैं क्योंकि उनका हित करने वाले हैं, अतः जिस पक्ष में भगवान् हैं उसमें ही ब्राह्मण रहेंगे अतः तुमको ब्राह्मण भी सहायता नहीं करेंगे, वे भगवान् यादवों के देव अपनी पुरी में (भक्तों के पास) ही रहते हैं, अतः उनके ध्यान व स्मरण आदि की भी पाँडवों को आवश्यकना नहीं है, यह आवश्यकता अन्यों के लिये है, अन्य, जब भगवान् का ध्यान करें एवं स्मरण करें तब उनका सर्व अनिष्ट दूर कर उनको राज्यादि देते हैं, किन्तु पुरी में तो भक्तों का स्वतः स्वयं हित करने के लिये रहे हैं, यदु के वंश में उत्पन्न देव यादव हैं उनके भी आप देव हैं इसलिये जिस पक्ष में भगवान् हैं उस पक्ष में यादव भी जायगे, इससे तुमको बन्धन भी सहायता नहीं करेंगे, एवं अन्य राजा लोग भी सहायता नहीं करेंगे, क्योंकि सब राजाओं को कृष्ण ने जीत लिया है, अतः जरासन्ध आदि को जीतने से सब राजा उनके (भगवान् के) आधीन हो गए हैं, इस कारण से तुम राजा लोगों के सहायता की आशा भी न करो। बड़े-२ जरासन्ध आदि जिसने जीत लिये हैं ऐसे बलवान् का पक्ष त्याग कर निर्बल की जय कराने में कौन प्रयास करेगा? अथवा जिस प्रभु ने जरासन्धादि महान् शूरवीरों को जीत लिया है उनको तुझे जीतने में कौन सा प्रयाम करना पड़ेगा ॥१२॥

आभास—दुर्योधनो न मन्यत इति चेत्तत्राऽऽह—

आभासार्थ—यदि कहो हम क्या करें? दुर्योधन नहीं मानता है, इस पर 'स एष' ये दो श्लोक कहते हैं—

श्लोक—**स एष दोषः पुरुषद्विडास्ते गृहान् प्रविष्टो यमपत्यमत्या।**
पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशु चैनं कुलकौशलाय ॥१३॥

इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण ।
असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन ॥१४॥

श्लोकार्थ—तुम्हारे घरों में प्रविष्ट पुरुष का द्वेषी जो दोष है वह यह है कि तुम श्रीकृष्ण से विमुख हुए हो, जिससे तुम्हारी 'श्री' भी जाने वाली ही है, ऐसे तुम उसको अपत्य (आपत्ति में रक्षा) समझ पोष (पालन कर) रहे हो, ऐसे दोषरूप को तो कुल के कल्याण के लिये त्याग दे ॥१३॥

जब विदुरजी ने यों कहा तब जिसके शील की सब सत्पुरुष इच्छा करते हैं ऐसे क्षत्ता (विदुरजी) का सुयोधन ने जिसके होठ क्रोध के कारण कांप रहे हैं विदुरजी का कर्ण, दुःशासन और शकुनि से मिलकर अपमान किया ॥१४॥

सुबोधिनी—स एष दोष इति । **स प्रसिद्धस्त्रि**दोषोऽयमेव । **दोष** इति वचनात् तदनङ्गीकारो न बाधकः । दोषः सर्वैरूपायैस्त्याज्यो न तु दोषानुरोधेन औषधं त्याज्यमिति भावः । तस्य दोषत्वे हेतुमाह—**पुरुषद्विडिति** । यः पुरुषं द्वेष्टि स दोषः । अन्हथा तस्यैव शरीरे तन्नियम्ये स्वयं स्थितः कथं तं द्वेष्टि । यस्य राज्ये ग्रामेऽपि स्थितस्तं न द्वेष्टि, तत्र तच्छरीरे विद्यमानो रोगमृते कथं द्विष्यात् अतः पुरुषद्वेषद्दोष इत्यवसीयते । तत्त्याग उपपत्तिरूपो निदानमित्यर्थः । **आस्त** इति शीघ्रं तस्य प्रतीकारः कर्त्तव्यः । सम्प्रतं स्वकार्यमकृत्वैव दूष्णीं तिष्ठति । उपेक्षितस्तु कुलमेव नाशयिष्यतीति भावः । क्वाऽस्तीत्याकाङ्क्षायामाह-सर्वत्रैव तव—**गृहान् प्रविष्ट** आस्ते । ममत्त्वात्सर्वगृहप्रवेशने निवारणाशक्तिः । अयमिति दूरे स्थितमङ्गुल्या निर्दिशति । तथाप्यन्धत्वात्तं न द्रक्ष्यतीति प्रकारान्तरेण बोधयति यम**पत्यमत्या त्वं पुष्णासि** । आपद्भ्यस्त्रायत इत्यपत्यम् । तन्मतिरेव । किञ्च । त्वं च कृष्णाद्विमुखः, यतः पुष्णासि । अत एव गतश्रीश्च भविष्यसि । तस्मादस्य सर्वानर्थमूलत्वात् '**त्यजेदेकं कुलस्यार्थे**' इति न्यान्यात् **एनं त्यज** । चकारात्कृष्णवैमुख्यं च त्यजेत्यर्थः । यदा एवमाक्रोशपूर्वकमाज्ञारूपेणोक्तवान् । तदा **असत्कृत इत्यूचिवानिति** सम्बन्धः । इत्यूचिवानिति वा भिन्नम् । तत्र स्थाने आगतेन भ्रातुरन्तिके वा । **सुयोधन** इति तस्यापकर्षार्थं वचनम् । ननु पितृव्यतिरस्कारं कथं कृतवानित्याशङ्क्य अन्तः क्रोधेन, बहिर्दुष्टैराक्रान्तत्वादिति तृतीयान्तं विशेषणद्वयम् । **प्रवृद्धो** यः कोपस्तेन स्फुरितमधरं यस्य । अनेन क्रोधेन, लोभ एव स्फुरित इति तदुक्तो दानरूप उपायोऽप्यसंमत इति सूचितम् । असत्कारो धिक्कारः, अग्रे वक्तव्यो वा । एवमप्रियकथनं धर्मनीतिविरुद्धम् '**सत्यं ब्रूयात् प्रियं ब्रयात्**' इति स्मृतेः । प्रधानपरित्यागश्च नीतिविरुद्धः । सोऽपि सन्मानेनैव बोधनीयो भवति । तथाप्येवं वचनं परित्यागार्थमेव, भगवद्विमुखैः सह स्थातुमयुक्तत्वात् । स्नेहश्च न स्थापनीयः । चित्तस्याऽतिदुष्टत्वात् सर्वथा परित्यागमपि न सहते । अत एवं वचनमेतदभिसन्धायाऽऽह—**सत्स्पृहणीयेति** । सद्भिः पृहणीयं शीलं यस्य एवमेवासद्भिः सह स्थितौ तत्परित्यागार्थमेव कर्त्तव्यमिति सत्स्पृहणीयता । **क्षत्तेति** विश्वासपात्रत्वं सूचितम् । दुष्टचतुष्टयमध्ये दुर्योधनो मुख्यः । कर्णदुःशासनशकुनयस्तु सहायाः । तदाह तैः सहित इति । अथवा । ननु मन्त्रस्य स्वहितत्वादङ्गीकारमेव कथं न कृतवानित्याहसद्भिरेव स्पृहणीयं शीलं यस्येति । तस्य सपरिवारस्यासत्त्वादिति भावः ॥१३–१४॥

व्याख्या—वह प्रसिद्ध त्रिदोष यह (दुर्योधन) ही है, दुर्योधन दोष रूप हैं, यों कहकर यह सूचना दी है कि, इसके अंगीकार न करने में किसी प्रकार कोई बाधक नहीं है, अर्थात् यदि इस दोष रूप दुर्योधन को निकाल दिया जाए तो किसी तरह का दुःख नहीं होगा कारण कि दोष को सर्व प्रकार के उपायों से निकालना चाहिये, न कि दोष के सन्मान के लिये औषध (उपाय) ही छोड़ दिया जावे, वह दोष रूप है, इसमें हेतु बताते हैं कि, 'पुरुषद्विट्' "पुरुष का द्वेषी है", जो दोष रूप न होवे तो, उसके आधीन होते हुए उसके ही शरीर में रहकर उससे द्वेष कैसे करें ? लोक में भी जिसके राज्य में वा जिसके गांव आदि में जो रहनेवाला है वह उससे द्वेष नहीं करता है, तो उसके शरीर में रहनेवाला रोग के सिवाय कौन है ? जो उससे द्वेष करे ? कोई नहीं, अतः पुरुष से द्वेष करने से समझा जाता है कि यह दोष रूप है, उसका त्याग ही निदान[1] है, 'अस्ति' पद से यह सूचना की है कि इसका प्रतीकार (उपाय) शीघ्र करना चाहिये, क्योंकि घर में प्रछिन्न शत्रु की तरह घुसा हुआ है। अब तो अपना कार्य पूर्णतः पूरा किए बिना चुप होकर बैठा है, यदि इसकी उपेक्षा लापरवाही की जाएगी तो समग्र (सारे) कुल का नाश कर देगा, यदि कहो कि वह है कहाँ ? जिसके उत्तर में कहते हैं कि तुम्हारे घरों में सर्वत्र वह घुसा हुआ है ममता के कारण तुम उसे रोक नहीं सकते हो 'अयं' पद से कहते हैं कि यह तुम्हारे सामने ही खड़ा है तो भी चक्षुओं के न होने से देख नहीं सकोगे, अतः दूसरे प्रकार से दिखाते हैं, जिसे आप अपना अपत्य (जो आपदाओं से बचावे) समझ रहे हो उसे ऐसा समझकर पाल रहे हो, इस कारण ही तुम कृष्ण से विमुख हो रहे हो, जिससे तुम्हारी 'श्री' भी जाने वाली है अतः यह ही सर्व अनर्थों की जड़ है 'त्यजेरेकं कुलस्यार्थे' कुल के कल्याण के लिये एक का त्याग करना चाहिये, इसलिये इसका त्याग कर 'च' पद से यह भी बता दिया कि श्री कृष्ण की विमुखता को भी छोड़ दे जब विदुर ने यों चिल्लाकर आज्ञारूप से कहा 'तदा असत्कृत 'इत्यचिवानिति सम्बन्धः' तब दुर्योधन उनका अपमान कर कहने लगा, यों वाक्य का अन्वय है अथवा 'इत्यूचिवान् वा मित्रम्' विदुर ने इस प्रकार कहा यह वाक्य भिन्न है। उस स्थान पर अथवा भाई के पास आये हुए विदुरजी का सुयोधन ने अपमान किया, दुर्योधन के बदले में सुयोधन पद देकर उसका ओछापन दिखाया है, चाचे का अपमान कैसे किया ? इस शंका का उत्तर देते हैं कि 'अन्तः क्रोधेन'। चाचे के वचन सुनकर, और बाहर दुष्टों के संग से भीतर का क्रोध बाहर निकल आया जिससे उसके ओष्ठ (होठ) काँपने लगे, इस कम्पन से लोभाधर प्रकट हो गया अर्थात् लोभ बढ़ गया, जिससे चाचे (काके) के बताये हुए दान रूप उपाय से सम्मत नहीं हुआ, अतएव यहां तृतीय विभक्ति के ही दो[2] विशेषण दिये हैं अपमान किया यों कहने का आशय है उसको धिक्कारा वह आगे कहा जाएगा। इस प्रकार अप्रिय कहना भी धर्म और नीति के विरुद्ध है, जैसे कि स्मृति में कहा है 'सत्यं ब्रूयात् प्रियं ब्रूयात्' सत्य कहना परन्तु वह प्रिय होना चाहिये, श्रोता को जिससे दुःख न हो, जो वचन आगे दुर्योधन कहने वाला है वह नीति विरुद्ध है और उसमें प्रधान (धर्म)[3] का त्याग है, वह भी नीति और धर्म सम्मत नहीं है। यदि उसका कहना अपने को मान्य न होवे तो भी उसको सम्मानपूर्वक समझना चाहिये, यों नीति होते हुए भी दुर्योधन ने यों न कर उसका तिरस्कार किया जिसका आशय यह है कि दुर्योधन के विदुर को अपने घर से निकालना ही था।

१—रोग से नाश करने का मुख्य उपाय है।

२—(१) प्रवृद्ध को यस्फुरिता धरेण (२) सकर्णानुज सौ बलेन सुयोधनेन।

३—धर्म मार्ग बताने वाले मन्त्री का त्याग।

विदुर का भगवद्विमुखों के साथ रहना अनुचित होने से ही दुर्योधन के मुख से ऐसे तिरस्कार के वचन **भगवान्** ने ही निकलवाये हैं, एवं दुर्योधन की यह भी इच्छा थी कि धृतराष्ट्र आदि से इसका स्नेह भी नहीं होना चाहिये, क्योंकि पिता इसके कहने से राज्य लौटाकर न दे देवें यों होते हुए भी चित्त अति दुष्ट एवं चंचल होने से दुर्योधन विदुर का सर्वथा परित्याग भी न चाहता था, क्योंकि उसके मन में यह भी भीति (भय) थी कि विदुरजी विपक्ष को सहायता न दे दें, इतना होते हुए भी भगवदिच्छा से ऐसे तिरस्कार के वचन उसके मुख से निकलने ही लगे। विदुरजी के वचन और व्यवहार को तो सत्पुरुष ही चाहते हैं, असत् पुरुषों के साथ रहने का अवसर हो जाय तब उनका त्याग करने के लिये इस प्रकार ही करना चाहिये, यह ही सत्पुरुषों की इच्छा होती है, 'क्षत्ता' पद से यह बताया है कि वह **'विश्वास पात्र'** है कर्ण दुःशासन, शकुनि और दुर्योधन ये चार दुष्ट हैं, इनमें मुख्य दुष्ट 'दुर्योधन' है शेष तीन उसके सहायक हैं। इसलिये 'तैः सहितः' पद दिया है, अर्थात् उन तीनों के साथ यह भी मिला हुआ है, जब विदुर का बताया हुआ मन्त्र (सलाह) अपना हितकर था तो फिर अङ्गीकार क्यों न किया ? इस पर कहते हैं कि उसकी (विदुर की) सलाह सत्पुरुष ही मानते हैं, यह सारा परिवार असत् होने से मन्त्र हितकर होते हुए भी मानते नहीं ॥१३-१४॥

श्लोक—**क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः ।**
तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः ॥१५॥

श्लोकार्थ—इस कुटिल दासी के पुत्र को किसने बुलाया है ? जिस अन्न को खाकर पुष्ट हुआ है, उसके ही विरुद्ध बोल रहा है, शत्रुओं का कार्य सिद्ध कर रहा है, अतः इसको अब ही जीते हुए नगर से बाहर निकाल दो ॥१५॥

सुबोधिमी क एनमिति । लोकोक्त्या अधिक्षेपः । पित्रा समाहूतत्वं ज्ञात्वा अयुक्तकरणात्तमप्याक्षिपतीति ज्ञायते । स्वभावजातिक्रियादुष्टस्य मन्त्रानर्हत्वात् । अयं तु तादृश इति विशेषणत्रयम् द्वयं सिद्धम्, क्रियैवं तृतीया । **जिह्मः** कुटिलश्छिद्रान्वेषी । मया कापठ्येन स्थातव्यम्, विश्वासं जनयता स्वावसरेऽपकर्तव्यमिति जिह्मलक्षणम् । तदद्य विदुरे स्पष्टं जातम् । स्वाधिकारानुसारेण भगवान् सर्वत्र तथा स्फुरतीति सत्त्वादीनामापेक्षिकत्वं ज्ञापितम् । **दास्याः सुतमिति** जातिदोषः । क्रियादोषं वक्तुं कृतघ्नतामाह—**यद्बलिनैव पुष्टस्तस्मिन् प्रतीप** इति । यथा आश्रितत्वाच्चण्डालादिभ्यो बलिर्दीयते तथाऽयमपि पतितः । ब्रह्मबीजस्य शूद्रायां जातत्वात् । अत एवैवकारः । बलिपुष्टाश्च काका एवमेव भवन्तीति ज्ञापितम् । पोष एव तथाभावे हेतुः । परेषां शत्रूणां कृत्ये आस्त इति क्रियादोषः । दण्डो **निर्वास्यतामिति । आश्विति** यावच्छ्विते तदुक्तं न प्रविशति । तेषामपि तेनाऽपि बधस्यानुक्तत्वात् परित्यागस्यैवोक्तत्वात् निर्वासनं दण्डः । **श्वासानः** प्राणमात्रावशेषः । असतां दृष्ट्या प्राणहरणापेक्षया ऽधिकोऽयं दण्डः । **श्मशान** इति पाठे यत्र स्थास्यति तेषाममङ्गलं भविष्यतीत्यर्थः । यमत्वेन मृतोपजीवित्वाद्वा । अत एव पुरान्निर्वास्य इति केवलं वचनमुक्तवान् । एवं दशभिः श्लोकैः पूर्वावस्थापरित्यागहेतुरुक्तः । अनेन पूर्वदेहसंबन्धिनोऽपि त्यक्ता इव ॥१५॥

व्याख्या—लोकमतानुसार विदुर जी का अपमान करता है, पिताजी ने बुलाया है, यों जान कर भी, कहता है कि पिताजी ने यह कार्य उचित नहीं किया है, क्योंकि जो पुरुष, स्वभाव, जाति

और क्रिया तीन दोषों वाला हो वह मन्त्र (सलाह) देने योग्य नहीं है अतः ऐसे अयोग्य को बुलाने से पिता ने भी एक अयोग्य कार्य किया है, इस उक्ति से दुर्योधन ने पिता का भी अपमान किया है।

यह विदुर तो तीनों दोषोंवाला है, इसलिये उसके तीन विशेषण दिये हैं, दो तो स्पष्ट सिद्ध ही हैं. तीसरी उसकी कृति मे सिद्ध हो रहा है, प्रथम विशेषण 'जिह्म' से बताया है कि, वह कुटिल और छिद्रान्वेषी है, 'जिह्म' उसे कहते हैं जो जिस किसी के पास भी रहता है तो पाखण्ड से रहता है अर्थात् ऊपर से. मधुर२ शब्द बोल उसको प्रसन्न करता है इस प्रकार विश्वास जमा लेता है फिर जब अवसर आता है तब उसकी बुराई करता है वह जिह्मता आज विदुर में स्पष्ट देखने में आ रही है, जिसका जैसा अधिकार है उसको भगवान् सर्वत्र वैसे ही स्फुरित है, इससे दुर्योधन (१) सत् असत् और उदासीनता आदि गुणों की अपेक्षा आवश्यक है यों बताता है (२) दोष 'दास्याः सुतं' दासी के पुत्र होने से जाति दोष दिखाया है, (३) दोष, क्रिया दोष दिखाने के लिये उसकी कृतघ्नता सिद्ध करता है कि 'यद्बलिनैव पुष्टः तस्मिन् प्रतीपः' जिसके अन्नादि से पुष्ट हुआ उसके ही विरोध में बोल रहा है, जैसे आश्रित होने से चाण्डालादि को बलि (भोजन) दी जाती है वैसे ही इसको भी, दी जाती है, अतः यह चाण्डाल समान पतित ही है, कारण कि, ब्रह्मबीज द्वारा शुद्रा से उत्पन्न हुवा है, इसलिये 'एव' पद देकर इसके पतितपन की निश्चितता बताई है। बलि से पुष्ट अथवा चांडाल भी वैसे ही होते हैं ऐसे होने में कारण, उसका पोषण कर्ता ही है, ऐसे (व्यक्ति) तो शत्रुओं का कार्य सिद्ध करने के लिये ही छद्म (कपठ) वेश से यहाँ रह अपना पोषण करते हैं यह इसमें क्रिया दोष है, इसका दण्ड यह है कि 'निकाल दो' देरी मत करो, अब ही निकाल दो, देरी करने से इसका मन्त्र धृतराष्ट्र के चित्त में स्थिर न हो जावे? अतः शीघ्र ही निकाल दो, जैसा दण्ड विदुर ने दुर्योधन के लिये धृतराष्ट्र को बताया था वैसे ही दण्ड की दुर्योधन ने विदुर के लिये आज्ञा दी है, असत् पुरुषों की दृष्टि में बध (मार) का देने से भी यह दण्ड विशेष है, 'श्वसानः' के स्थान पर यदि 'शमशानः' पाठ लिया जावे तो उसका भावार्थ है कि यह जहाँ होगा वहाँ अकुशल ही होगा. अतः जल्दी अब ही निकाल दो तो हम अपने अमङ्गल से बच जावें, अथवा 'शमशान' पद देने का यह भाव है कि यह यम है अतः मुर्दों पर ही इसका निर्वाह (गुजारा) है, इसलिये इसको तुरन्त नगर से बाहर निकाल दो, इतना ही वचन कहा है, इसी तरह दश श्लोकों से विदुर की पहली स्थिति के त्याग का हेतु बताया, इससे यह यह भी सूचित किया है कि, पहले के देह सम्बन्धी जो कौरव थे उनका भी त्याग किया, ॥१५॥

आभास—परित्यागमाह।

आभासार्थ—परित्याग का वर्णन इस 'स इत्थमत्युल्बण' श्लोक में करते हैं—

श्लोक—**स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि।**
स्वयं धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः ॥१६॥

श्लोकार्थ—इसी तरह भ्राता के सामने (रूबरू) तीव्र (तेज) कान के द्वारा भीतर जाने वाले बहुत कठोर शब्द रुपी बाणों से उसके (विदुर के) मर्म स्थानों पर प्रहार

किया गया, तो भी धनुष को द्वार के आगे धर, माया (भगवदिच्छा) का बहुत आग्रह करते हुए दुःख रहित हो स्वयं भाई के नगर से बाहर चला गया ॥१६॥

सुबोधिनी—स इत्थमिति । अत्युल्बणत्वं शीघ्रकार्यकरणात् । दशैते बाणाः कर्णद्वारा हृदयं प्रविष्टाः । दशप्राणस्थानेषु **मर्मसु ताडितोऽपि । भ्रातुः पुर** इति मृत्युसन्निधाविव बाणानां प्राणहारकत्वं दृष्टान्तीकृतम् । **ताडितोऽपिगतव्यथः** । तत्रहेतु–**माया**मधिकं **मानयानः** । **धनुर्द्वारि निधायेति** प्रतिपक्षगमनशङ्का निवर्तिता । निःसारणात्पूर्वमेव अयात्, स्वकर्तृकस्यैव परित्यागस्य हेतुत्वात्, अन्यथा '**सर्वान् बलकृतानर्थानकृतान् मनुरब्रवीत्**' इति विरोधः स्यात् ॥१६॥

व्याख्या—ये शब्द बाण, बहुत तीव्र (तेज) थे, कारण कि अपना कार्य शीघ्र सिद्ध कर लेते थे । ये दश, शब्द रूप बाण कान के द्वारा हृदय में घुसे, और जाकर उन्होंने (विदरजी के) दश प्राणों के स्थान, जो मर्म स्थान हैं उन पर प्रवाह (हमला) किया । ये बाण प्राणहारक थे, क्योंकि '.भ्राता के 'पुर' के समक्ष पद से यह सूचित किया है वि मानो मृत्यु के निकठ आ गए हैं । प्रवाह होते हुए भी (विदुरजी) दुःख रहित थे कारण कि माया को (भगवदिच्छा) को बहुत मान देते थे अर्थात् जो कुछ होता था उसको सिद्धान्त रूप से भगवदिच्छा ही मानते थे और उसमें ही कल्याण समाया हुआ है, इससे उनको कभी भी दुःख नहीं होता था । धनुष को द्वार के समीप धर दिया, जिससे दुर्योधनादि की यह शङ्का कि शत्रु पक्ष में जाकर मिलेगा, वह भी मिटा दी, दुर्योधन वा उसके साथी, जब तक (विदुरजी को) निकाले, उससे पूर्व ही स्वयं निकल गऐ, क्योंकि सत्य त्याग वह है जो स्वयं किया जाता है अन्यथा जो बल करने (जबर्दस्ती) से कार्य किऐ जाते हैं वे न करने के समान हैं, यो मनुजी ने कहा है, स्वयं त्याग न करे तो इस शास्त्र का त्याग ररने में विरोध आवे ॥१६॥

आभास—एवमपमानतो निर्विण्णस्य तीर्थादिजनितसुकृतपरिपाकेन पृथिवीजलयोः संस्कृतत्वादधिकारिदेहे द्वयसम्पत्तिं निरूप्य तेजोनिरूपणार्थं सत्सङ्गो जात इत्याह-स निर्गत इत्यष्टभि.

आभासार्थ—इस प्रकार अपमान से, खेद प्राप्त विदुरजी ने तीर्थों पर जाकर पवित्र पृथ्वी तथा जल से संस्कृत (शुद्ध) हो के अधिकारी देह की प्राप्ति की, जिससे इनको दो सम्पत्ति प्राप्त हो गई, शेष तीसरी सम्पत्ति 'तेज' रही सो उसकी प्राप्ति का निरूपण करते हुए कहते हैं कि जिस (कार्य) से तेज की प्राप्ति हो वह सत्संग भी मिल गया । यह 'स निर्गतो' श्लोक से आठ श्लोकों में कहते हैं ।

कारिका—**चतुर्भि र्भूमिसंस्कारस्तथा ऽन्यैश्च जलस्य च ।**
उत्तरोत्तर शेषत्वात्ताच्छेषो ऽप्युच्यते स्फुटः ॥१॥

पुण्य देशार्थ गमनं पुण्यदेशे तथैव च ।
तदङ्गानि फलं चेति चतुर्द्धा भूमिसत्क्रिय ॥२॥

जले सामान्य मम्बन्धो विशेषश्चापि तद्गतः ।
साधनं च फलं चेति जलोक्तिश्च चतुर्विधा ॥३॥

कारिकार्थ—चार श्लोकों से भूमि द्वारा हुए संस्कार कहे हैं और इतने ही अन्य चार श्लोकों से जलद्वारा हुए संस्कार कहे हैं, उत्तरोत्तर शेष होने से उसका शेष भी स्पष्ट कहा हुआ[1] है ॥१॥

पुण्य (पवित्र) देशों के लिये गमन करना, और वैसे ही पुण्य देशों में घूमना, उसके अङ्ग (पवित्र रहना और एकान्तवास आदि) और फल (स्वशरीर के संस्कारार्थ प्रयत्न करना, भूमि देव सम्बन्ध वाली हो ऐसा फल) इसी तरह चार प्रकार से भूमि से होने वाला संस्कार कहा है ॥२॥

जल में सामान्य सम्बन्ध सरस्वती का है, और विशेष प्रकार का सम्बन्ध भी सरस्वती का ही है और '**साधन**' साधारण तीर्थों का सेवन है । और '**फल**' भगवदीयों का सङ्ग है । यों जल का सम्बन्ध चार प्रकार से कहा है ॥३॥

विदुर जी, मन्त्र भवन (जहां धृतराष्ट्र ने मन्त्र (सलाह) पूछने के लिये बुलाये थे) से निकल कर घर न जाके नगर से बहार चले गए, यों निम्न श्लोक में कहते हैं—

श्लोक—स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि ।
अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः ॥१७॥

श्लोकार्थ—कौरवों के पुण्य से प्राप्त विदुर जी हस्तिनापुर से निकल गये, पृथ्वी पर जिन स्थानों में सहस्त्र मुर्ति भगवान् विराजते हैं उन तीर्थ स्थानों में पुण्य प्राप्त करने की इच्छा से फिरने लगे ॥१७॥

सुबोधिनी—स निर्गत इति । **कौरवपुण्यलब्ध** इति पूर्वजोपार्जितसुकृतेन प्राप्तो निर्गतश्च वंशस्थापकसुकृतमेव तद्द्वारा निर्गतमिति सूचितम् । पुण्यलब्धत्वं भगवत्स्थानगमनेऽपि हेतुः । सर्वतीर्थानि पादे यस्येति । तस्य स्थानेष्विति तीर्थेष्वपि विशेषः, वैष्णवस्थानेष्वेव गत इत्यर्थः । **अन्वाक्रमत्** मध्ये स्थानानतिक्रमेणाऽऽक्रान्तवान् । राजनिवेशनवन्न स्थानमात्रम्, किन्तु नानामूर्त्या अभिमानेनाऽनुभावं प्रदर्शयन् स्वयमधिष्ठाय येषु स्थितः तानि तीर्थानीति पूर्वेण सम्बन्धः । **पुण्यचिकीर्षयेति** तत्त्वाज्ञानादुक्तम्, परमेश्वरप्राप्तिसाधनत्वाद्वा । अथवा । उर्व्यां पुण्यचिकीर्षया पुण्येन पृथिवीं संस्कर्तुमिति । दैत्याधिष्ठिते स संस्कारो न भविष्यतीति, उर्व्यां यानि सहस्रमूर्तिर्भगवानधिष्ठाय स्थित इत्युक्तम् । अनेन संस्कृते देवाधिष्ठानात्पश्चाग्निविद्यावद्भगवन्मूर्त्तिष्वेव तस्य संस्कारः प्रदर्शितः ॥१७॥

१—पृथ्वी, जल और तेज इनमें पहला (पृथ्वी) दूसरे (जल) पर आधारित है अतः पृथ्वी का आधार अर्थात् संस्कार करने वाला जल है, जल का आधार यानि संस्कार करने वाला तेज है सो स्पष्ट हो गया है ।

व्याख्या—विदुर जी कौरवों के पुण्य से ही इस वंश में उत्पन्न हुए थे, इस कहने का आशय यह है कि विदुरजी के निकल जाने से वंशस्थापक कौरवों का पुण्य भी निकल गया, यों कहने का यह भी भाव है कि पुण्य से जन्म लिया है अतः भगवान् के स्थानों में फिरने की बुद्धि उत्पन्न हुई है, सब तीर्थ जिन भगवान के चरण में हैं उन भगवान् के स्थानों में फिरने लगे, तीर्थों में भी विशेषतः वैष्णव स्थानों में ही गऐ, जाते समय किसी भी तीर्थ स्थान को छोड़ा नहीं क्रमशः सर्व तीर्थों में फिरे, ये तीर्थ स्थान राजाओं की छावनी के समान नहीं थे अर्थात् राजा लोग तो छावनी में स्वल्प समय रहकर चले जाते हैं किन्तु भगवान् यहां पृथक२ आनन्दस्वरुप से सदैव विराजते हुए अपने प्रभाव से उन स्थानों का महात्म्य स्थिर कर रहे हैं, उन तीर्थो का पूर्व से सम्बन्ध है, 'पुण्य चिकीर्षया' पुण्य प्राप्ति की इच्छा से विदुर जी गए, इस वाक्य से यों बताया है कि विदुरजी को तत्व ज्ञान नहीं था अतः उस ज्ञान की प्राप्ति के लिये, अथवा परमेश्वर की प्राप्ति के साधन होने से अथवा पुण्य प्राप्त कर पृथ्वी को संस्कृत (पवित्र) करने (क्षेत्र के समान बनाने) के लिये, तीर्थो पर गए दैत्यों से घिरी हुइ पृथ्वी पर, वह संस्कार न हो सकेगा । अतः जहां सहस्त्र मूर्ति भगवान् सदैव स्थिति कर रहते हैं ऐसे तीर्थों में गए, पञ्चाग्नि की तरह संस्कृत स्थान में ही देव रहते हैं जिन तीर्थ स्थानों में भगवत्स्वरूप थे उनमें ही विदुरजी का संस्कार हुआ है इससे यों दिखाया है ॥१७॥

आभास—विशेषमाह ।

आभासार्थ—निम्न श्लोक 'पुरेषु' में तीर्थों की विशेषता बताते हैं—

श्लोक—**पुरेषु पुण्योपवनाद्रिकुञ्जेष्वपङ्कतोयेषु सरित्सरस्सु ।**
अनन्तलिङ्गैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ॥१८॥

श्लोकार्था—भगवान् के चिन्हों से अलंकृत तीर्थों के स्थानों में, पवित्र उपवन पर्वत और कुँजों में, कीचड़ रहित जल वाले नदी और तालाबों में, वे विदुरजी अकेले ही फिरे ॥१८॥

सुबोधिनी—**पुरेष्विति** । मथुरादिनगरेषु, परमेश्वरक्रीडास्थानत्वात् । गोकुलनिकटवृन्दावनानि **उपवनानि** । अद्रिर्गोवर्द्धनादिः । **कुञ्जानि** । लतागृहाः । सर्वाण्येतानि भगवत्सम्बन्धात्पुण्यजनकान्यपि भक्तिजनकानि । **अपङ्कतोयेष्विति** कृष्ण जलक्रीडादियोग्येषु । **सरितां सरस्सु** कालियादिह्रदेषु । तेषु पर्यटने निमित्तम्, अनन्तमूर्तेः रासादिक्रीडाचिह्नैः सम्यगलङ्कृतेषु । जलस्थल-प्रधानेषु एकाकी चरति स्मेत्यर्थः । अनन्यो भक्तो वा । अनेन पञ्चगुणा पृथिवी संस्कृतेति ज्ञापितम् । तत्र पृथिवी द्विविधा मृत्पाषाणभेदेन, पुरेष्वद्रिष्विति । उपवनेन गन्धः, कुञ्जेषु स्पर्शः, सरस्सु रसः, अनन्तलिङ्गसमलङ्कृतत्वेन रूपम्; कुञ्जेषु वा शब्दः, अपङ्कतोयेष्विति रसः, सरस्सु इति स्पर्शः । अनन्यत्वेनैव मौनं सिद्धम्, तेन वा शब्दः संस्कृतः ॥१८॥

व्याख्या—मथुरा आदि नगरों में, कारण कि, वे नगर, भगवान् की क्रीड़ा के स्थान हैं, उपवनों में (गोकुल के समीप वृन्दावन आदि वन उपवन हैं। गोवर्द्धन आदि प्रर्वतों में लताओं से स्वयं बने हुए घरो को 'कुंज' कहते हैं, उनमें फिरते रहे, क्योंकि ये सब भगवान् के सम्बन्ध से पुण्य जनक होते हुए भी भक्तिजनक हैं, इनमें फिरने से भक्त विदुर जी के शरीर में विशेष भक्ति के योग्य उत्तमता आने लगी, कीचड़ रहित जलों में, ऐसे जल श्री कृष्ण के क्रीडा के योग्य हैं, वे जल नदियों के दहों में होते हैं, जैसे कालीयादि दहो में भगवान् ने कालीय दमन करते हुए क्रीड़ा की है, ऐसे स्थानों में भी विदुर जी फिरे, क्यों फिरे ? जिसके उत्तर मैं कहते हैं कि 'अनन्तमूर्तिः रासादि क्रीड़ा चिन्हैः समङ्कतेषु' वे स्थान, अनन्त मूर्ति भगवान् की रासलीला आदि क्रीड़ाओं के चिन्हों से सुशोभित हैं। अतः जल और स्थल के जो मुख्य स्थल थे उनमें वह अकेले ही फिरने लगे 'अनन्य' पद का अर्थ अकेले अथवा अनन्य भक्त होने से वहाँ फिरते थे, यों कहने से यह सूचना दी है कि विदुर जी ने पांचगुणों वाली पृथ्वी का संस्कार किया है, इसमें पृथ्वी मिट्टी और पाषाण भेद से दो तरह की है, 'पुरुष' नगरों में कहने से पृथ्वी के मिट्टी का स्वरुप कहा है, 'अद्रिषु' पहाड़ों में कहने से पृथ्वी का पाषाण रूप बताया है। उपवन से गन्ध का, कुंजों में स्पर्श का, दहों में रसका, अनन्त भगवान् के चिन्हों से समलङ्कृत से रूप का संस्कार हुआ, अथवा कुञ्जों में शब्द का, कीचड़ रहित जल में रसका, दहों में स्पर्श का संस्कार[1] हुआ, विदुरजी अकेले थे इसलिये मौन सिद्ध कहने का कारण यह है कि (गन्ध, स्पर्श, रस और रूप) इनके संस्कार साथ में हो सके, किन्तु शब्द का संस्कार साथ में नहीं हो सकता है क्योंकि उनको ग्रहण करने और उत्पन्न करने वानी इन्द्रियां पृथक हैं सिद्ध हो गया, अथवा उस (मौन) में ही शब्द का भी संस्कार हो गया ॥१८॥

आभास—साधनान्याह,

आभासार्थ—निम्न श्लोक में साधन बताते हैं—

श्लोक—**गां पयटन्मेध्यविविक्तवृत्तिः सदाऽऽप्लुतोऽधः शयनोऽवधूतः ।**
अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि ॥१९॥

श्लोकार्थ—पृथ्वी पर घूमते रहते थे, जहाँ पवित्र एकान्त स्थल देखते वहाँ विश्रामार्थ रहते जल में (नदी आदि में) स्नान करते, पृथ्वी पर सोते थे जिससे अपने सम्बन्धी भी नहीं पहचानते, कृत्रिम (बनावटी) भेष धारण कर लिया था, जिन व्रतों से भगवान् प्रसन्न हो वे व्रत करते थे ॥१९॥

---

[1] —यहाँ पाँच प्रकार की पृथ्वी के संस्कार कहे हैं, महभूतों के पीछे कहे जायेंगे।

सुबोधिनी—गां पर्यटन्निति । एते सप्तत्वगादिधातुसंस्काराः । व्रतान्यन्तःकरणसंस्कारकारिणि एकाकिपरिभ्रमणं भगवच्चरित्रस्याऽतिगोप्यत्वात् । एवं दर्शनेन किञ्चिद्भक्त्युत्पत्तेः कृष्णप्राप्त्यभावाद्विरहेण तत्प्राप्तय एव व्रतानि कृतवान् । अत्रैवं क्रमः । अन्वेषणार्थं प्रथमं पर्यटनम्, ततोऽन्तर्बहिर्नियमाः ततोऽपि व्रतानि । तत्र मेध्ये एकान्ते ध्यानाद्यर्थमुपवेशनादिरूपा स्थितिर्यस्येति पवित्रैकरात्रान्तरिताऽऽहारादिजीविका यस्येति वा । त्रिकालस्नानभूशयनाभ्यङ्गवर्जनादयस्त्रयो गुणा दोषत्रयनिवारकाः । नन्वेवंकरणे बन्धुभिः कथं न बद्धः ? तत्राऽऽह–**अलक्षितः स्वैरिति** । तत्र हेतुः–**अवधूतवेषः** कृत्रिमवेषधारी । व्रतानि चत्वारि; एकादश्युपवासः, सर्वभूतदया, यथा–लाभसन्तोषः, सर्वेन्द्रियोपशमश्चेति । एतानि भगत्तोषहेतुभूतानि ॥१९॥

व्याख्या—ये संस्कार, सात 'त्वक्' आदि धातुओं के कहे हैं, व्रत अन्तःकरण के संस्कार करने वाले हैं अर्थात् व्रत पालन से अन्तःकरण पवित्र होता है भगवान् के चरित्र अति गोप्य (गुप्त) हैं अतः उनके दर्शनार्थ स्वयं अकेले ही फिरते थे, इस प्रकार घूमने से कदाचित् दर्शन हो जाने से कुछ भक्ति की उत्पत्ति हो जावे, भक्ति उत्पन्न होने से कृष्ण प्राप्ति के लिये विरह होगा, विरह होने से चित्त में प्रभु प्राप्ति की प्रबल इच्छा होने लगेगी, जिसको दृढ़ करने के लिये ही व्रत करने लगे व्रतों के करने में इस प्रकार क्रम है । प्रभु को ढूंढने के लिये पहला कार्य लीला स्थलों में घूमना है, पश्चात् भीतर और बाहर के नियमों का पालन करना, अनन्तर व्रत करने, पवित्र एकान्त स्थान में भगवान् का ध्यानादि करने के लिये स्थिति करना, एक रात्रि बीच में डाल दूसरे दिन पवित्र आहारादि करना । तीन समय स्नान, पृथ्वी पर सोना, तैल आदि का उबटन न करना ये तीन कर्म तीन दोषों को नाश करते हैं इस प्रकार रहने पर बान्धवों ने क्यों नहीं रोका ? जिसके उत्तर में कहा है कि उनको बान्धव पहचान ही नहीं सकते थे । कारण कि कृत्रिम वेष धारण कर 'अवधूत' बने हुए थे । चार व्रत हैं १-एकादशी का उपवास २–प्राणिमात्र पर दया ३–जो कुछ मिले उसमें सन्तोष और ४– सर्व इन्द्रियों को अपने वश में रखना, ये चार व्रत भगवान् की प्रसन्नता में कारण है ॥१९॥

आभास––फलमाह

आभासार्थ—'इत्थं व्रजन्' श्लोक में फल कहते हैं—

श्लोक––**इत्थं व्रजन् भारतमेव वर्षं कालेन यावद्गतवान् प्रभासम् ।**
तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥२०॥

श्लोकार्थ––बहुत समय, भारतवर्ष में ही इस प्रकार फिरते हुए, जब प्रभास में आए तब सब अन्यथा देखा, पृथ्वी पर एक ही सेना एक ही राज्य छत्र, अर्थात् एक ही राजा का सैन्य देश की रक्षा करता था, अतः एक ही राजा राज्यासन को शोभित करता था । और वह राजा अजित बन गया था जिसको कोई जीतने वाला नहीं था । ऐसा वह राजा 'पार्थ' युधिष्ठर था ॥२०॥

सुबोधिनी—इत्थमिति। शुद्धो हि देवदेशे तिष्ठतीति पूर्वकामनाऽपि संपूर्णा। ज्ञापकं चैतत्फलस्य। यथा असदधिष्ठानं भूमौ गतम्, तथा शरीरेऽपीति। पुण्याधिक्याद्भारत एव पर्यटनं बहुनाऽपि कालेन। यावत्प्रभासपर्यन्त गतवांस्तावदन्यथा सर्वमासीदित्याह—**तावदिति**। एकस्य चक्रं सैन्यं यस्याम्। सैन्यं वा, राजचिह्नं वा अन्यस्य नास्तीत्यर्थः। भारतमेव वर्षं यावत्प्रभासं तावच्छब्देनोच्यते। तावदित्यर्थविशेषे वा। अस्य तीर्थपर्यटनमेव भगवद्भक्तानां भगवता राज्योपलम्भने हेतुः। **अजितेनेति** सामर्थ्यम्। **पार्थ** इति हेतुः ॥२०॥

व्याख्या—जो सर्वथा शुद्ध (पवित्र) होता है वह ही देवदेश में रह सकता है विदुर जी की पहले से ही देवदेश में रहने की इच्छा थी, वह कामना अब सफल हुई, यह इस फल का जताने वाला है जैसे दुष्ट का स्थान पृथ्वी पर से गया वैसे शरीर से भी गया, विदुर जी के पुण्य बहुत थे इसीलिये बहुत समय तक भारतवर्ष में ही फिरे, आप बहुत समय के बाद बाहर से फिरकर प्रभास आए, तब तक यहाँ सब कुछ अन्यथा ही हो गया था, भारतवर्ष में एक का ही सैन्य रहा, वह सैन्य ही देश की रक्षा करता था और सारा भारत एक छत्र के नीचे आ गया था, दुसरे किसी का भारत पर शासन नहीं था। जहाँ तक प्रभास है वहाँ तक भारतवर्ष है, 'तावत्' शब्द विशेष अर्थ में है, अर्थात् विदुर जी का तीर्थों में फिरना भी ऐसे राज्य हो जाने से हितावह हुआ, भगवद्भक्तों को राज्य मिलने में भगवान् की इच्छा ही कारण है अर्थात सर्व प्रकार भगवत्सेवा[1] के लिये ही भगवान् भक्तों को राज्य देते हैं, 'अजित' पद से यह बताया है कि भगवान् की ही राज्य प्राप्ति कराने वाली शक्ति उसमें स्थापित हुई है अतः 'पार्थ' (युधिष्ठिर) अजित हो जाने से राज्य लेकर चला सके हैं इससे राज्य मिलने का मूल कारण बताने के लिये 'पार्थ' कहा है ॥२०॥

आभास—एतत्तु पूर्वं जातमप्यसम्भावनया जिज्ञासाभावान्न ज्ञातवान्। प्रभासे तु, अधिकारिणो देहपरित्यागार्थं तत् स्थानमिति, तत्र गतो बहिश्चित इव जातः। ततः शुश्रावेत्याह—

आभासार्थ—यह तो पहले ही हो गया था तो भी इससे उसके जानने की इच्छा भी न होने से जाना नहीं, प्रभास में तो अधिकारी ही देह त्याग के लिये आते हैं, क्योंकि वह स्थान ही ऐसा है जहाँ अधिकारी देह त्याग जन्म मरण के चक्कर से छूट जाते हैं, ऐसे स्थान पर आने से उनका चित्त अस्थिरसा हो गया, बाद में जो सुना उसका वर्णन 'तत्राथ' श्लोक में कहते हैं—

श्लोक—**तत्राऽथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयम।**
संस्पर्धया दग्धमथाऽनुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीम् ॥२१॥

श्लोकार्थ—अनन्तर वहाँ उनने अपने सम्बन्धियों के नाश का समाचार सुना, जिस वन में बाँस के पेड़ होते हैं वह वन, आपस के संघर्ष से उत्पन्न अग्नि से जैसे

---

[1] भगवान् की बनाई हुई सृष्टि की सेवार्थ।

जलकर भस्म हो जाता है वैसे ये भी डाह के कारण आपस में संघर्ष करते हुए नष्ट हुए हैं, यों जानकर चुप होकर शोक करते हुए वहाँ से सरस्वती के प्रवाह के सामने गए ॥२१॥

सुबोधिनी—तत्राथेति । अथेति भिन्नक्रमे । सुहृदां विनष्टिं श्रुतवान् । तस्य शोकहेतुत्वाय विशेषणम् । सुहृद्विनष्टि मेव निरूपयति—**संस्पर्द्धया दग्धमिति** । अनुवादे धर्मप्राधान्यम्, निरूपणे धर्मिण इति वैपरीत्यमवस्थाभेदेन । औदासीन्यशोकनिरूपणार्थं उपपादन एव विशेषणम् । **वनं यथा वेणुजवह्निसंश्रयमिति** । वेणुजो वह्निः सम्यगाश्रयो यस्य, सम्यक् श्रयते यमिति वा अर्थः । संस्पर्द्धया दग्धमित्यन्यायनाशः **तत्र प्रभासे** । संस्पर्द्धिनां भवतु नाशः, तत्संबन्धात्सर्वेऽपि सुहृदो नष्टा इति शोकः । नाशे दृष्टान्तः वेणुभ्यां जातो वन्हिर्न तावन्मात्रं नाशयति, किन्तु वनमेव सर्वम् । तद्वत् **कौरवपाण्डवसंस्पर्द्धयेति** नाशे हेतुः । अनेनाऽनुपयोगनाशः सूचितः । अत एवाऽनुशोकः ॥२१॥

१—अधिक नाच करने वालियों के साथ विशेष प्रकार के नृत्य को "रास" कहा जाता है। जिस नृत्य हुए होते अनेक प्रकार के रसों का उद्भाव होता है।

गृह कार्य में कुछ शेष रह जाते थे क्योंकि भगवदासक्ति से देह का मान भी नहीं रहता था इससे भी अपने में आनन्द की उत्पत्ति नहीं होती थी जैसे दूर स्थित को दृष्टि देख सकती है वैसे दूर स्थित आनन्द रूप भगवान् को भी ब्रज स्त्रियों की दृष्टि देख सकती थी यदि यों न हो तो आनन्द प्राप्त करने की इच्छावालों की इस प्रकार की स्थिती न हो ।।१४।।

आभास––एवं सच्चिदानन्दत्वं स्वरूपस्योपपाद्य, तत्र जीवस्येव भगवतोऽपि स्थितिर्वक्तव्येत्याशङ्क्य, तत्रैव सच्चिदानन्दरूपेऽक्षरे स्थितस्य पुरुषोत्तमस्याऽग्निवत्तत्र प्रादुर्भाव इत्याह–

आभासार्थ—भगवान् का स्वरूप (देह) सच्चिदानन्द रूप है यों प्रतिपादन किया तो उस देह में भगवान् की स्थिति भी जीव जैसी कहनी चाहिए अर्थात् जैसे जीव देह में प्रविष्ट होकर रहता है किन्तु देह पृथक है और जीव पृथक है । उसी तरह भगवान् की भी उस देह में जीव के समान स्थिति होगी ? इस शंकानिवारणार्थ कहते हैं कि इसी सच्चिदानन्द रूपात्मक अक्षर स्वरूप (देह) में स्थित पुरुषोत्तम का अग्निवत् प्राकट्य होता है अतः जीव की तरह प्रविष्ट नहीं होते है जीव देह से पृथक् है कारण कि उस (जीव) की देह पंच-भौतिक है और आप भगवदंश होने से पंच-भौतिक नहीं हैं यहां सच्चिदानन्द अक्षर पुरुषोत्तम से पृथक् नहीं, अक्षर, पुरुषोत्तम का ही स्वरूप है अतः उस स्वरूप में ही आप अग्निवत् प्रादुर्भूत हैं—यों निम्न श्लोक में कहते हैं ।

श्लोक––**स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा ।**
परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान् यथाऽग्निः ।।१५।।

श्लोकार्थ—भगवान् जब देखते हैं कि मेरे शान्त स्वरूपों (देवों) को मेरे ही अन्य रूप (दैत्य) जब पीड़ित करते हैं, तब दयामय अन्तःकरणवाले एवं काल और कर्म आदि को अपने वश में रखनेवाले प्रभु महत्तत्त्व के साथ मिल कर अजन्मा होते हुए भी अग्नि की तरह आविर्भूत होते हैं ।।१५।।

सुबोधिनी—स्वशान्तरूपेष्विति । अक्षरस्यैवंप्रकारेणाविर्भावः, तत्र भगवदाविर्भावश्च निर्निमित्तं न भवति । अन्यद्वारा तमर्थं कारयन् विषमो भवेत् । अतः पुत्रशिक्षावत् भगवान् दैत्यान् मारयतीत्याह–स्वस्य शान्तेषु स्वरूपेषु देवादिरूपेषु अशान्तैरितरैः स्वरूपभूतैरेव दैत्यैरर्द्यमानेषु सत्सु दयाविष्टचित्तः सर्वांशिनाऽप्यज उभयसमाधानार्थं स्वयं साक्षरः पुरुषोत्तम आविर्भूतइत्यर्थः । कालकर्मादिप्रेरणाभावार्थमाह–**परावेश इति** । परः कालादिः, अवरः कर्मादिः, तेषां नियन्ता । ननु पुरुषो नारायणः प्रथमपुरुषो वा स्वानन्देन सहाऽऽविर्भावं लभताम्, किं पुरुषोत्तमाविर्भावेनेत्यत आह–**महदंशयुक्त इति** । महानंशो यस्य प्रथमपुरुषस्य, तद्युक्तः । सृष्ट्यर्थं स्वस्मिन् प्रकृतिपुरुषमन्तर्भाव्यैवाऽऽविर्भवति । अत एव स्वस्मिन् यशोदादिभिर्जगदुपलभ्यते । एतदेव हि ब्रह्मलिङ्गम् । अन्यव्यावृत्त्यर्थमाह-**भगवानिति** । **यथा**ऽग्निरिति व्याख्यातम् ।।१५।।

व्याख्या—सच्चिदानन्दात्मक अक्षर का इस प्रकार अर्थात् भगवान् के देह रूप से प्राकट्य तथा उसमें ही भगवान् का आविभाव, बिना कारण नहीं होता है, यदि दूसरे किसी से यह कार्य[1] करावे तो विषम[2] होता है इसलिए जैसे पुत्र को शिक्षा देने के लिए उसकी ताड़ना का जाती है वैसे ही भगवान् दैत्यों को मारते हैं यों श्लोक में कहा है, कि अपने शान्तरूप देवों को जब अपने ही अशान्त रूप दैत्य पीड़ित करते हैं तथा आपके चित्त में दया आ जाती है सर्वांश से अर्थात् सब तरह से अजन्मा होते हुए भी दोनों का समाधान हो इसलिए अक्षर सहित पुरुषोत्तम स्वयं प्रकट हुआ है। यह शङ्का भी नहीं करनो कि काल और कर्म की प्रेरणा से आप प्रकटे हैं क्योंकि आप दोनों के ईश (स्वामी) हैं स्वामी को सेवक प्रेरणा व आज्ञा नहीं दे सकता है।

'पुरुष' नारायण वा प्रथम पुरुष अपने आनन्द सहित भले आविर्भूत हो पुरुषोत्तम के आविर्भाव से क्या लाभ? इस शङ्का का उत्तर देते हैं कि 'महदंशयुक्तों' प्रथम पुरुष का जो महान् अंश (महत्तत्व) है उसको भी अपने साथ लेकर प्रकट होते हैं तथा सृष्टि कार्यकर्त्ता स्वरूप जो प्रकृति पुरुष है इसको भी अपने भीतर छिपाकर ही प्रकट होते हैं इस कारण से ही आप में यशोदा आदि जगत् देखते हैं, यह ही ब्रह्म का चिन्ह है, प्रथम पुरुष और प्रकृति पुरुष भीतर स्थित होने से दिखते नहीं हैं जगत् कर्तृत्वादि गुण और विरुद्ध धर्माश्रयत्व आदि गुण ही ब्रह्म स्वरूप के पहचानने का चिन्ह है 'भगवान्' पद से यह सूचित किया है कि यह पुरुषोत्तम ही हैं अन्य अक्षर वा पुरुष नहीं हैं जैसे 'अग्नि' यों कहकर बताया हैं कि जो थे वह ही प्रकट हुए हैं आभास में इसकी व्याख्या की गई हैं ॥१५॥

आभास—एवमक्षरपुरुषोत्तमत्वं भगवद्देहात्मनोरुपपाद्य लोकप्रतीतिविरोधं भगवद्वाक्यविरोधं च परिहर्तुमाह द्वयेन

आभासार्थ—इस तरह ऊपर के श्लोकों में भगवान् की देह अक्षर (सच्चिदानन्दात्मक) और आत्मा पुरुषोत्तम है, यों प्रतिपादनकर अब निम्न दो श्लोकों से लोक की प्रतीति का विरोध और भगवद्वाक्यों का विरोध इन दोनों विरोधों को मिटाते हैं।

श्लोक—**मां खेदयत्येतदजस्य जन्मविडम्बनं यद्वसुदेवगेहे।**
व्रजे च वासोऽरिभयादिव स्वयं पुराव्द्यवात्सीद्यदनन्तवीर्यः ॥१६॥

श्लोकार्थ—अजन्मा होकर वसुदेव के गृह में जन्म लेना और व्रज में जाकर रहना तथा अनन्त वीर्यवान् होते हुए भी अपना नगर छोड़ कर भागना ये सब वार्ताएं मुझे खेद उत्पन्न करती है ॥१६॥

---

[1] —आविर्भाव का निमित्तभूत कार्य अर्थात् दैत्य वध।

[2] —पक्षपाती होता है।

सुबोधिनी—मां खेदयत्येतदिति । भगवान् लोकवञ्चनार्थं प्राकृतदेहत्वं ख्यापयितुं वसुदेवपुत्रत्वादिविडम्बन यत् करोति, तद्विडम्बनमपि तस्य सर्वथा अयुक्तमिति किं सर्वसमर्थस्य वञ्चनेनेति तथाकरणं मां खेदयतीत्याह—**अजस्य जन्मविडम्बनामिति** । तत्रापि **वसुदेवगेहे** वसुदेवस्य भार्यायां देवक्याम् । एतदपेक्षया स्तम्भ इव, जल इव ब्रह्मणो हृदयादिव आविर्भावविडम्बनं समीचीनमिति मां खेदयति । किञ्च, **व्रजे च वासो** मां खेदयति । कुत्र व्यापि वैकुण्ठवासी, लौकिकानामपि वासायोग्ये गोकुले किमित्यवात्सीदिति । किञ्च । **अरिभयादिव** जरासन्धादिभिर्भीत इव पुरान्मथुरातो व्यवात्सीदिति यत्, पुरात् पलाय्य स्थानांन्तरं गतमिति यत् । विवासः परदेशवासः अयुक्तत्वे हेतुः—**अनन्तवीर्यं इति । व्रजे चेति** चकारो गुरुकुलादिसंग्रहार्थः । **अरिभयादिति** । भयाभावादिवेत्युक्तम् । न हि सर्वात्मनोऽस्यः सति, न वा तस्य भयम् । अन्येषां भयनिवर्तकत्वाच्च । **स्वयमिति** नांशद्वारा ॥१६॥

व्याख्या—भगवान् ने लोकवञ्चनार्थ अपना दह प्राकृत सा प्रसिद्ध करने के लिए वसुदेव के पुत्र होने का जो अनुकरण (ढोंग) किया है यह अनुकरण करना भी सर्वथा उचित नहीं है क्योंकि सर्व समर्थ को यों ढोंग करने से क्या लाभ ? अतः यों करना मुझे दुःख पहुँचाता है फिर वह अनुकरण भी वसुदेव के गृह में अर्थात् उसकी स्त्री देवकी में इसकी अपेक्षा स्तम्भ से जल सेवा ब्रह्मा के हृदय से प्रकट होना श्रेष्ठ था यों नहीं किया इसलिए मुझे दुःख होता है उनका व्रज में रहना मुझे दुःखित करता है । कहाँ वैकुण्ठ वास और कहाँ व्रज (गोकुल) में रहना, जहाँ लौकिक भी रहना नहीं चाहते हैं यहां रहना भी मेरे लिए दुःखकर है फिर विशेष दुःख का कारण यह है कि कायर (डरपोक) की तरह जरासन्धादि शत्रु के भय से अपनी मथुरा नगरी छोड़ दी वह भी भागकर अर्थात् जिससे परदश में रहना पड़ा वास्तव में भय तो था ही नहीं अतः यह सब उचित नहीं है, कारण कि ऐसा कार्य निर्बल करते हैं आप अनन्तवीर्य हैं ऐसे होकर भी भागना मुझे अत्यन्त दुःख देता है क्यों कि जो सर्वात्मा हैं, उनके शत्रु होते ही नहीं और न उनको किसी से भी भय होता है कारण कि आप दूसरों के भय को भगा देते हैं तो वे डरे क्यों ? "स्वयं" यह सब लीला आपने की है न कि अंशद्वारा कराई है, इसलिए मेरा मन विशेष दुःखित हो रहा है ॥१६॥

आभास—वाक्यविरोधं परिहरति

आभासार्थ—इस श्लोक से भगवद्वाक्यो के विरोध का परिहार करते हैं ।

श्लोक—दुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवन्द्य पित्रोः ।
ताताऽम्ब ! कंसादुरुशङ्कितानां प्रसीदतं नोऽकृतनिष्कृतीनाम् ॥१७॥

श्लोकार्थ—हे पिता ! कंस से बहुत डर कर आपके उपकार का बदला न दे सके ऐसे हैं तो भी हम पर आप प्रसन्न हो (क्षमा कृपा करो) ये वाक्य, भगवान् ने पिता के चरणों में प्रणाम करते हुए जो कहे, उनका स्मरण हाते ही मेरे चित्त में दुःख उत्पन्न होता हैं ॥१७॥

सुबोधिनी - दुनोति चेत इति । पित्रोः पादावभिवन्द्य कंसवधानन्तरं देवकीवसुदेवपादावभिवन्ध भगवानेवमाह- **हे तात ! हे अम्ब ! कंसादुरुशङ्कितानां** किं करिष्यतीति शङ्कया अतिभीतानामस्माकमुपरि प्रसीदतं प्रसन्नौ भवतमिति । यदेतद्वाक्यं तत्स्मरतो मम चेतः, दुनोति दुःखितं करोति । अनेन सर्वाण्येव भगवद्वाक्यानि **'मानुषीं तनुमास्थितम् ।' 'वदन्ति वासुदेवेति वसुदेवसुतं हि माम् ।'** इत्यादिवाक्यानि लोकव्यामोहार्थमिति व्याख्यातानि । यदा भगवद्वाक्यानामेवैषा गतिः, तदा तैर्व्यामोहितानां वाक्यानां किं वक्तव्यमिति भावः ॥१७॥

व्याख्या—कंस का वधकर जब भगवान् पिता वसुदेवजी के पास जाकर उनको प्रणाम कर उनने जो वचन कहे वे मेरे चित्त को दुःख देते हैं, क्या कहा ? वह बताते हैं, हे तात ! हे अम्ब ! हे पिता ! हे माता ! कंस हमारी कैसी हालत करेगा ? इस कारण से कंस से बहुत डरे हुए हमने आपके उपकार का बदला नहीं चुकाया तो भी हम पर आप प्रसन्न हो जावो । ये भगवान् के वचन याद आते ही मेरा चित्त दुःखी होता हैं । इससे भगवान् के जो भी वाक्य मनुष्य देह धारण किए हुए, वसुदेव के पुत्र. मुझे वासुदेव कहते हैं, इत्यादि वाक्य लोक को व्यामोहित करने के लिए कहे हैं । यों उनकी व्याख्या की गई है, जब भगवान् के वाक्यों की यह गति है तो उनके वचनों से मोहितों के वचनों के लिए क्या कहा जाय ? यों भाव है ॥१७॥

आभास—-एवं सर्वविरोधं परिहृत्य, साक्षात्पुरुषोत्तमत्वमुपपाद्य, तस्य गुणकर्माणि निरूपयिष्यन्, भक्तिमार्गसिद्धये आदौ भजनीयान् गुणान् निरूपयति—

आभासार्थ-इस प्रकार सर्वविरोध का परिहार कर और श्री कृष्ण का साक्षात् पुरुषोत्तमपन सिद्ध कर उनके गुण तथा कर्मों का निरूपण करते हुए भक्ति मार्ग की सिद्धि के लिए पहले भजन के योग्य गुणों को कहते हैं ।

श्लोक—**को वा अमुष्याङ्घ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान् विजिघ्रन् ।**
यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतान्तेन तिरश्चकार ॥१८॥

श्लोकार्थ—जिस प्रभु ने, अपनी फड़कती हुई भ्रू (भौंह) की शाखा रूप काल द्वारा भूमि के भार को दूर फैंक दिया, वैसे आपके चरण-कमल के रेणु के सूंघने वालों में से ऐसा कौन है जो उनको भूल सके ? ॥१८॥

सुबोधिनी—को वेति । भजनीयः स एव स्यात्, यः स्वयमभयः, सकृदपि प्रपन्नं सर्वतो भयान्मोचयति, ऐहिकामुष्मिकीं च ऋद्धिं मोक्षं च प्रयच्छति, भजनसन्देहेऽपि अनुषङ्गादपि यो मुक्तिं प्रयच्छति, स्वयं च निर्दोषपूर्णगुणविग्रहः, अनधिकारिणेऽपि गतिं प्रयच्छति, परार्थं स्वकृतनियममपि विरुद्धं न मन्यते-एवं यः सप्तगुणो भवति, षडङ्गसहितभजोपयोगिमहागुणवान् स

भजनीय इति। सप्तस्वपि गुणेषु हेतुभूतं गुणत्रय् मन्यच्चेत्. भवत्यतिसामर्थ्यम्, स्वरूपत एव सर्वोत्कर्षः. परमा दया च; स सर्वेषामुपास्या भवति। तदाह—सप्तभिः श्लोकैः। प्रत्येकमेकैकेन सप्तगुणा। द्वाभ्यां त्रिभिस्ततो द्वाभ्यां तैरेव; स्थूलगुणा निरूप्यन्ते। तत्र प्रथममतिसामर्थ्यं निरूपयन्नाश्रितसर्वदुःखदूरीकर्तृत्वमाह—**को वेति**। सर्वे हि प्राणिनः सर्वानेव भजन्ते। तद्गतगुणदोषैरनुरक्ता विरक्ताश्च भवन्ति। एवमत्र निर्द्धारः। भजनीयदोषव्यतिरेकेण सेव्यमानं न त्यजन्ति। लोके हि सर्वेषामेव देवानां मनुष्याणां वा सेवकास्ततारित्यज्य भगवदीया जायन्ते, न भगवदीयाः कदाचिदप्यन्यस्य। यस्त्विमं शास्त्रार्थमन्यथाकरिष्यामिति भगवन्मार्गे समागत्य तं त्युक्तुमिच्छति कौतुकादपि, सोऽपि तथा कर्तुं व शक्नोति। तदाह—**अमुष्याङ्घ्रिसरोजरेणुं** सकृदपि **विजिघ्रन् को वा विस्मर्तुमीशीतेति**। अतः स एव ईशः, यस्त्वीशितव्यान् वशीकरोति। रेणुर्घ्राणमार्गेणान्तर्गतः पूर्वोक्तस्तस्य सङ्घातं भगवदीयमेव करोति। स तदर्थोत्पादितसङ्घातः सर्वतो व्याप्तं तं रेणुं विस्मर्तुं न समर्थो भवेत्। ननु क्लिष्टः सङ्घातमपि विस्मरति, क्लेशनाशकमेवाऽधिमन्यत इति चेत्। तत्राऽऽह—**यो विस्फुरदिति**। अयं हि कल्पतरुः, यस्य भ्रूः पर्णसहिता काचिच्छाखा। अनन्तशाखस्य सा एका शाखा संहारकर्त्री स्वभावतः। संतुष्टा तु सापि परमैश्वर्यं प्रयच्छति। अतस्तादृशशाखाया विद्यमानत्वात् स्वानिष्टनाशे का शङ्का? यतो भूमेरेव सर्वाधारभूतायाः कृतोऽन्तो येन। विशेषेण स्फुरता। यत्र भारसम्भावनाऽपि तत्र स्वयं गत्वा दूरीकरणस्वभावेन भ्रूविटपेन भारमपि तिरश्चकार। यदर्थं सर्वेषामपि देवादीनां महान् यत्नः। यावत्ते दूरीकर्तुमायान्ति, तावत्स भारः पूर्वमेव तिरो भवति। यथा प्रथमोद्गतैः सूर्यकिरणैरेव सर्वतमोनाशः, सूर्यस्तु तमः पश्यत्यपि न, तथा भगवान् भक्तानामित्यर्थः ॥१८॥

व्याख्या—जिनका भजन किया जावे वैसे योग्य वही होते हैं, जिनमें सात गुण हों और छः अङ्गों सहित भजनोपयोगी महान् गुण वाले हों, सात गुण बताते हैं। (१) स्वयं (खुद निर्भय हों, (२) एक बार भी जो शरण आया होवे उसको चारों तरफ से आनेवाले सर्व प्रकार के भय से छुड़ाते हों (३) इस लोक और परलोक की समृद्धि और मोक्ष को दे सकते हों, (४) भजन की पूर्णता में सन्देश हो तो भी केवल सम्बन्ध होने के कारण भी मोक्ष देते हों, (५) स्वयं निर्दोषपूर्ण गुणवाले हों, (६) अनधिकारी को भी मोक्ष देने में शक्तिमान् हों, अर्थात् उसकी भी गति करते हों, (७) अन्य के लिए अपने किए हुए नियमों का विरोध हो तो उसकी भी परवाह नहीं करते हों।

उपर्युक्त सातगुणों के कारण रूप तीन गुण हैं (१) महती शक्ति (२) स्वरूप से भी सबसे उत्तमता (३) बहुत दया ये गुण भी जिनमें हों वे स्वरूप भी सबको सेव्य हैं वह सात श्लोकों से बताते हैं, प्रत्येक श्लोक एक एक कर सात गुण कहे हैं जैसा कि दो श्लोकों से तीन श्लोकों से फिर दो श्लोकों से इस प्रकार सात श्लोकों से सात गुणों के कारण रूप स्थूल (मूल) गुणों का वर्णन किया है।

उनमें से प्रथम अति सामर्थ्य का निरूपण करते हुए आश्रितों के सर्व दुःख दूरकर्त्तापन का गुण 'को वा' श्लोक से प्रतिपादन करते हैं।

सर्व प्राणी, प्रायः सर्व देवों का भजन करते हैं, उनमें रहे हुए गुण अथवा दोषों के कारण उनमें प्रेमवाले वा उनसे विरक्त हो जाते हैं, (अर्थात् देव में गुण देखते हैं तो प्रेम करते हैं (भजन

करते हैं) यदि दोष देखते हैं तो उनके भजन का त्याग कर देते हैं यहाँ इस प्रकार ही निर्णय किया है कि जिसमें दोष नहीं उनका भजन करते ही रहते हैं छोड़ते नहीं, देखा जाता है कि लोक मे सब देवों के तथा मनुष्यों के सेवक उनका त्यागकर भगवदीय (भगवान् के सेवक) हो जाते हैं, किन्तु भगवदीय कभी भी दूसरे देवादि के सेवक नहीं बनते हैं, जो कोई कौतुक से भी चाहता है कि कि शास्त्र के इस अर्थ को मैं अन्यथा करदूंगा, अर्थात् भगवान् के मार्ग (भक्ति मार्ग-शरण मार्ग) में आकर उसको छोड़ना चाहता है, वह भी यों कर नहीं सकता है, क्योंकि, एक बार भी जिसने भगवान् के चरण कमल की रज को सूंघ लिया है वह उसको कभी भी भूल नहीं सकता उससे प्राप्त रस (आनन्द) का त्याग कर ही नहीं सकता है, अतः वह ही ईश है जो, सेवकों को आते ही वश कर लेता है, कारण कि, नाक द्वारा शरीर के भीतर गया रेणु, सूंघनेवाले की देह को भगवदीय ही बना देता है, अतः भगवान् के लिए पैदा हुई देहवाला वह, चारों तरफ फैली हुई उस रेणु को भूल जाने के लिए शक्तिमान् नहीं होता है।

दुःखी देह को भी भूल जाता है, क्लेश नाश करने वाले को ही अधिक मान देता है, यदि यों कहो तो इसका उत्तर श्लोक के उत्तरार्ध में देते हैं :

यह भगवान् कल्पवृक्ष हैं जिनकी भोंह उस कल्प वृक्ष की पर्ण सहित शाखा है, अनन्तशाखा वाले उस वृक्ष की यह एक शाखा स्वभाव से संहार करनेवाली है यदि वह भी प्रसन्न हो जावे तो वह भी बहुत ऐश्वर्य देती है, अतः ऐसी शाखा के विद्यमान होने से भगवान् द्वारा अपने अनिष्ट के नाश में कौनसी शङ्का है ? अर्थात् कोई नहीं, कारण कि सर्व की आधारभूत भूमि का अन्त फड़कती हुई इस शाखा ने ही किया है, जहाँ भार की संभावना होती है वहां भी आप पधारकर नाश करने के स्वभाववाली मोहरूप डाल से भार को भी दूर कर देते हैं जिस कार्य के लिए सब देव भी महान् यत्न कर रहे हैं वे जब तक दूर करने के लिए आवे उससे पहले ही आप उसको अपने मोहरूप डाल से दूर कर छोड़ते हैं, जैसे सूर्य के पहले उदित किरणों से अन्धकार नाश हो जाता हैं जिससे सूर्य अन्धकार को देखता ही नहीं है वैसे ही भगवान् भक्तों के दुःखों को (पृथ्वी के भार आदि को) साक्षात् नहीं देखते हैं, क्योंकि आपकी कालरूप भौंह उनका नाश कर छोड़ती है ॥१८॥

आभास—इष्टफलं तु भक्तानां न वक्तव्यमेव। यतो द्विषन्नपि भगवन्तमसुरोऽपि लोभाभिभूतः सर्वधर्मप्रतिपक्षो भगवत्संबन्धमात्रेणैव निषिद्धेनापिज्ञानिनोऽपि दुर्लभं सायुज्यं प्राप्तवान्। अयं चाऽर्थः सर्वजनीनस्तदाह—

आभासार्थ—भक्तों को इच्छित फल देवें, उस विषय में तो कहना ही नहीं है, क्योंकि लोभ से अभिभूत, सर्व धर्मविरोधी, भगवान् का तिरस्कार करनेवाला एवं असुर होने पर वह निषिद्ध प्रकार का था तो भी केवल भगवान् से सम्बन्ध हो जाने से उसने ज्ञानियों को भी दुर्लभ, सायुज्य प्राप्त किया, और यह अर्थ सर्वजनीन है वह निम्न श्लोक में कहते हैं।

श्लोक—**दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः।**
यां योगिनः संस्पृहयन्ति सम्यग्योगेन कस्तद्विरहं सहेत ॥१९॥

श्लोकार्थ—जिस सिद्धि को, योगी, अच्छी तरह साधे हुए योग से प्राप्त करने की इच्छा करते हैं वह सिद्धि राजसूय यज्ञ में श्रीकृष्ण के द्वेषी शिशुपाल ने प्राप्त की जिसको तुम लोगों ने नेत्रों से प्रत्यक्ष देखा उस कृष्ण का विरह कौन सहन कर सकता है ॥१९॥

सुबोधिनी—दृष्टेति। कृष्णं द्विषतोऽपि चैद्यस्य शिशुपालस्य राजसूयसभायां सर्वैरेव राजभिस्तत्र सेवायां क्रियमाणायां या सिद्धिः सायुज्यरूपा, सा भवद्भिरेव दृष्टा। **नन्विति** संबोधनं संमत्यर्थम्। **यां** सिद्धिम्। योगिनः स्वभावत उत्तमाः फलपर्यवसायिना सर्वसाधनसहितेनाऽपि योगेन वाञ्छामेव केवलं कुर्वन्ति, न तु भगवत्संबन्धव्यतिरेकेण तां प्राप्नुवन्ति। अतः को वा तत्संबन्धाभावरूपं भगवद्विरहं सहेत? भगवत्संबन्धो हि कोटिकल्पवृक्षादप्यधिकः। स प्राप्तः केन वा त्यक्तुं शक्य इत्यर्थः ॥१९॥

व्याख्या—कृष्ण के द्वेषी शिशुपाल को भी राजसूय की सभा में जहां सब राजा सेवा कर रहे थे वहां सायुज्य मुक्ति मिली, वह तुमने ही देखी। "ननु" पद यहां संबोधन अर्थ में है। यह संबोधन सम्मति के लिए दिया है जिस सायुज्य मुक्ति रूप सिद्धि को, स्वभाव से, उत्तम योगी जन, फलप्रद सर्वसाधन सहित योग से भी प्राप्त करने की केवल इच्छा ही करते हैं, किन्तु भगवान् से सम्बन्ध किए बिना उसे प्राप्त नहीं कर सकते हैं। अतः कौन है जो उसके सम्बन्ध का जिसमें अभाव है ऐसे भगवद्विरह को सहन कर सके? भगवत्सम्बन्ध निश्चय से कोटि कल्पवृक्ष से भी अधिक है वह मिल जावे तो फिर उसको कौन छोड़ सकता है? कहने का यों आशय है ॥१९॥

आभास—एवमिष्टसिद्धिहेत्वनिवारकभगवद्गुणं निरूप्य, स्वरूपं निरूपयन्, संबन्धव्यतिरेकेणाऽपि केवलस्वरूपसंबन्धेनैव पूर्वोक्तादप्यधिकं फलं प्रयच्छतीत्याह—

आभासार्थ—इस इच्छित पदार्थ की सिद्धि का कारण और अनिष्टों को दूर करनेवाले भगवद्गुण का निरूपण कर, अब इस श्लोक में स्वरूप का वर्णन करते हुए कहते हैं कि सम्बन्ध होने के बिना भी केवल स्वरूप सम्बन्ध से ही पूर्व कहे हुए फल से भी अधिक फल देते हैं।

श्लोक—**तथैव चाऽन्ये नरलोकवीरा य आहवे कृष्णमुखारविन्दम्।**
नेत्रैः पिबन्तो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥२०॥

श्लोकार्थ—उसी तरह ही नरलोक में वीर और दूसरे जो अर्जुन के अस्त्रों से पवित्र हुए थे, वे युद्ध में नेत्रों को आनन्द देनेवाले श्रीकृष्ण के मुखारविन्द का नेत्रों से पान करते हुए उसके चरणारविन्द को प्राप्त हुए ॥२०॥

सुबोधिनी—तथैवेति। ये नरलोके वीराः, अन्ये भगवत्संबन्धरहिताः, भगवन्तं जानन्त्यपि नः, तेऽप्याहवे स्वरूपसौन्दर्येणैव व्यामुग्धाः नेत्रैः **नयनाभिरामं** लावण्यामृतपूरं **कृष्णमुखारविन्दं** पश्यन्तो भगवत्सायुज्ये प्रतिबन्धकरूपमशुद्धं देहं निराकृत्य पार्थास्त्रैः पूता बहव एव व्यापिवैकुण्ठं तच्चरणारविन्दं प्रापुः ॥२०॥

व्याख्या—जो मनुष्य लोक में वीर थे और दूसरे जो भगवान् सम्बन्ध रहित थे अर्थात् भगवान् को जानते भी नहीं, वे भी युद्ध में स्वरूप सौन्दर्य से मोहित हो नेत्रों से लावतयामृत के पूरवाले कृष्ण के मुखारविन्द को देखते हुए, भगवत्सायुज्य में प्रतिबन्धक अशुद्ध देह का निराकरण कर, अर्थात् त्यागकर अर्जुन के अस्त्रों से पवित्र हो बहुतों ने ही उसके चरणारविन्द व्यापिवैकुण्ठ को प्राप्त किया है ॥२०॥

आभास—एतादृशे का फलचिन्ता ? अत्र परमेकमेव बाधकम्, व्यामोहिका भगवल्लीलाः तयाचेन्न व्यामुग्धः । सा हि भगवतः सर्वोत्तमत्वादिकुणान् भजनीयतां च शास्त्ररहितानां बुद्धौ स्थितामपनयति । तत्र सावधानेन भाव्यमित्याह द्वाभ्याम्—

आभासार्थ—यदि भगवान् ऐसे हैं तो फल प्राप्ति में काहे की चिन्ता ? किन्तु फल प्राप्ति में एक ही व्यामोहिका भगवल्लीला. बाधक है, यदि उससे मोहित[1] न होवें तो फल प्राप्ति हो सकती है, वह व्यामोहिका माया, भगवान् के सबसे उत्तमगुणों को और अनपढ़ों के बुद्धि में स्थित भजन करनेवाली चाहना को दूर कर देती है, अतः उससे सावधान रहना चाहिए, यों निम्न दो श्लोकों से कहते हैं—

श्लोक **स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याऽऽप्तसमस्तकामः ।**
बलिं हरद्भिश्चिरलोकपालैः किरीटकोटीडितपादपीठः ॥२१॥

श्लोकार्थ—लोक और वेद में आपके समान आपसे उत्ताम, कोई नहीं है आप तो तीनों के अधीश्वर हैं, अपने भीतर के राज्य की लक्ष्मी से अपनी सर्व कामनाएँ स्वयं पूर्ण करली हैं, बलि, ले आने वाले चिर लोकपालों ने अपने कोटि मुकुटों से जिसके चरणों के आसन की स्तुति की है ॥२१॥

सुबोधिनी—स्वयं त्विति। एषा लीला व्यामोहिका, या स्वयमीश्वरो भूत्वा सर्वोत्तामः सर्वाधमस्य, स्तब्धस्य, स्वयं तं तादृशं विधाय, कैङ्कर्यं करोतीति। येन (भ्रान्तानां हृदये) अयमेतादृश एवेति भ्रान्ता मन्यन्ते । तत्र प्रथमं तस्य सर्वोत्तमत्वमाह—**स्वयमिति**। तु शब्दो भ्रान्तप्रतीतिव्यावृत्त्यर्थं । न विद्यते लोके वेदे वा साम्यमतिशयश्च यस्य । यस्मात् स्वरूपतो गुणतश्च

१—इससे यह बताया है कि जो मोहित हुए उनकी मुक्ति नहीं हुई ।

प्रसिध्द्याऽपि त्र्यधीशः। किञ्च। अपेक्षितमपि किमपि नाऽवशिष्यते, यल्लोकिकन्यायेन कैङ्कर्य-हेतुर्भवति। तदाह—**स्वाराज्यलक्ष्म्या**। स्वस्मिन्नेव यद्राज्यम्, सर्वमेव हि जगत् स्वस्मिन्नेव वर्तते; यः स्वस्मिन् राज्यं करोति। स सर्वस्मिन्नेव करोति। तत्र या लक्ष्मीः निरतिशयानन्दरूपा, तयैव प्राप्ताः सर्वे कामा येन। '**अस्यैवाऽऽनन्दस्य अन्यानि मात्रामुपजीवन्ति**' इति श्रुतेः। किञ्च। लोकेऽपि तस्यैश्वर्यं सिद्धम्। यतो बलिं हरद्भिश्चिरकालीनैर्लोकपालैः किरीटकोटिभिरीडितं स्तुतं पादपीठं यस्य। यथा पदार्थंकरणपक्षस्तथा किरीटैरपि पीठस्य स्तोत्रम्। स्वयमपकृष्टभावेन नम्राः स्वसंबन्धिनं सर्वोत्कृष्टत्वेन बोधयन्ति। घट्टनाद्भूतशब्देनेति केचित् ॥२१॥

व्याख्या—यह भगवान् की लीला व्यामोहिका (मोह में डालने वाली) है, क्योंकि जो स्वयं ईश्वर तथा सर्वोत्तम होते हुए भी सबसे अधम और जड़ीभूत व आलसी (उग्रसेन) को अपना राजा बनाकर स्वयं उसकी सेवा करते हैं जिसको देखकर भ्रान्त के हृदय में यों भासता है कि यह ऐसे (उग्रसेन) का सेवक ही है, ऐसी अवस्था में भ्रान्त की भ्रान्ति दूर करने के लिए पहले उसका सर्वोत्तमपन सिद्ध करते हैं, 'तु' शब्द भ्रान्तों की प्रतीति को मिटाने के लिए है। 'असाम्यातिशयः' पद से कहते हैं कि लोक वा वेद में जिसके समान तथा अधिक कोई नहीं है, क्योंकि स्वरूप से और गुणों से त्र्यधीश है अर्थात् तीन गुणों के और तीन लोकों के ईश आप ही हैं आपको किसी भी वस्तु की अपेक्षा तो है ही नहीं, जो लौकिक न्याय से सेवक बनने में कारण बने, जिसको सिद्ध करते हैं कि अपने भीतर के स्वाराज्य की लक्ष्मी से अपनी कामनाएँ पूर्ण करली है जिससे उनको किसी भी वस्तु की अपेक्षा तो है ही नहीं, इस पद के तात्पर्य को स्पष्ट करते हुए आचार्य श्री आज्ञा करते हैं कि अपने में ही राज्य है, समस्त जगत् आपके भीतर ही है, जो अपने ऊपर राज्य करते हैं वह सब पर ही करते हैं उस राज्य में जो निरतिशय आनन्द रूपा लक्ष्मी है उससे ही सर्व कामनाएँ जिसने पूर्ण कर डाली हैं इसलिए भगवती श्रुति कहती है कि, अस्यैवाऽऽनन्दस्य अन्यानिमात्रा मुपजीवन्ति' इसके ही आनन्दांश पर अन्य जीवन धारण करते हैं और लोक में भी आपका ऐश्वर्य सिद्ध है जिससे ही बलि ले आने वाले चिरस्थाई लोकपालों ने अपने कोटि किरीटों से जिसके चरणासन की स्तुति की है वैसे भगवान् हैं।

यह शङ्का भी नहीं करनी चाहिए कि मूक (वाणी रहित) 'मुकुट' कैसे स्तुति करेंगे? जिस शङ्का का निवारण करते हैं कि 'यथा पदार्थ करणपक्षस्तथा किरीटैरपि पीठस्य स्तोत्र' बिना शब्दवाले पदार्थ भी शब्द के गुणों को धारण करते हैं अर्थात् उसके द्वारा अर्थ बताते हैं इस भाट्टमतानुसार मुकुटों ने स्तुति की जिससे शङ्का का कोई अवसर नहीं है, मुकुट खुद अपकृष्ट (दैन्य) भाव से नम्र हो, अपने सम्बन्धी भगवच्चरणासन की स्तुति करते हुए उसको सबसे उत्तम बताते हैं कितने ही जैसे श्रीधरजी कहते हैं कि मुकुटों की परस्पर रगड़ से निकले शब्दों से मुकुट स्तुति करते हैं ॥२१॥

आभास—एतादृशः स्वसिंहासने स्थितः स्वानन्दलक्ष्मीमनुभवन्नेव स्थातुं योग्यः, न तु कैङ्कर्यं कर्तुं योग्य इत्याह—

आभासार्थ—ऐसे अनुपम गुणी भगवान् अपने सिहांसन पर स्थित हो अपनी आनन्दरूप लक्ष्मी का अनुभव करें यह उचित था, न कि किङ्करपन करना योग्य है—यों इस निम्न श्लोक में कहते हैं।

श्लोक—तत्तस्य कैङ्कर्यमलभृतान्नो निग्लापयत्यङ्ग ! यदुग्रसेनम् ।
तिष्ठन्निषण्णं परमेष्ठ्यधिष्ण्ये न्यबोधयद्देव ! निधारयेति ।।२२।।

श्लोकार्थ—हे अङ्ग ! ब्रह्मा के आसन पर बैठे हुए उग्रसेन को जब भगवान खड़े होकर 'अनुग्रह' करो ऐसे शब्दों से अपना कैङ्कर्य (दासत्व) दिखाते थे, वह प्रभु का सेवकपन प्रकट करना, सम्पूर्णतः पोषित (मुझ) को ग्लानि पैदा करता है ।।२२।।

सुबोधिनी–तत्तस्य कैङ्कर्यमिति । किङ्करस्य भावः कैङ्कर्यंम । **तदिति** प्रसिद्धम् । **तस्येति** पूर्वोक्तस्य । ननु करोतु किमपि भगवान्, किं तवाऽनेन विचारेणेत्याशङ्क्याऽऽह-**अलं भृतान्न इति** । वयमत्यर्थं भगवता भृताः । धताः पोषिताः सेवार्थमेव वयं पोषिताः यदि सर्गं इव सेवापि भगवतः कर्तव्या स्यात्, तस्मिन्नपि पक्षे वयं मुख्यसेवार्थमुत्पादिताः, अस्मद्द्वारैव कारयतु । तदर्थमस्मानुत्पाद्य पुनः स्वयमेव करणात्तत्कैङ्कर्यमस्मान् ग्लापयति । स्वयं ग्लायति, अस्मानपि ग्लापयति । ग्लाययतीति पाठे, ग्लयधातुर्ग्लापार्थः । **अङ्गेति** स्वदुःखख्यापनयोग्यमित्रस्य संबधनम्, । **उग्रसेनमिति** । उग्रा सेना यस्य । कंसपिता, तम् । **परमेष्ठ्यधिष्ण्ये** ब्रह्मणः स्थाने । अधिष्ण्यंधिष्ण्यमिति पर्यायः । तस्मिन्निषण्णम् । स्वयं तिष्ठन् समागतान् सर्वानेवं न्यबोधयत् । हे देव ! अयमागतो नमस्करोति, पश्येति न्यबोधयन् । इदं ह्यतिदीनदौवारिककृत्यम् । यद्यपि सर्वं कृत्यं भगवत्कर्तृकमेव, तथापि रूपान्तरमेव कृत्वा करोति । यदि स्वयमेव कर्तव्यम्, तदा विपरीतं किं न करोतीति चित्तक्लेशः । देवसभायां यत्र ब्रह्मा उपविशति, तद्राजासनमिति परमेष्ठ्यधिष्ण्यमुक्तम् । अनेन ब्राह्मणेष्वपि तस्याऽनभ्युत्थानं निरूपितम् । अप्रतीकार्यश्चाऽयं क्लेशः ।।२२।।

व्याख्या—सेवक होने के भाव को सेवकपन कहते हैं, ऊपर कहे हुए भगवान् का यह प्रसिद्ध सेवकपन मेरे मन में ग्लानि पैदा करता है, भगवान् कुछ भी करें, उसका विचार तुम क्यों करते हो ? इसमें तुम्हारा क्या सम्बन्ध है ? इस शङ्का का उत्तर होता है कि 'अलभृतान्नो' भगवान् ने हमारा पालन पोषण अच्छी तरह इसलिए ही किया है कि हम सेवा करें, यदि सृष्टि की तरह सेवा भी भगवान् को ही करनी चाहिए, सेवा भगवत्कृति से ही साध्य होती है, उस पक्ष में भी हमको मुख्य सेवा के लिए ही उत्पन्न किया है, अतः यह सेवा भी हमारे द्वारा ही करावें, सेवा के लिए हम लोगों को पैदा कर फिर आप ही सेवा करते हैं, इस कैङ्कर्य (सेवकपन) से हम लोगों को खिन्नता होती है आप खेद पाते हैं और हम को भी ग्लानि कराते हैं, 'ग्लाययति' यदि ऐसा पाठ हो तो ग्लय् धातु ग्लापनार्थ वाला है।

हे अङ्ग ! सम्बोधन से यह सूचित किया है कि आप ऐसे मित्र हैं जिसके आगे अपना दुःख प्रकट किया जा सकता है 'उग्रसेन' का अर्थ है जिसकी सेना उग्र है, और जो कंस का पिता है,

उसको ब्रह्मा के बैठने के योग्य सिंहासन पर बिठाया है, और आप खड़े होकर आए हुए सब लोगों की पहचान कराते हैं, हे देवा ! यह आया है, आपको प्रणाम करता है, 'पश्य' देखो यह कह कर पहचान कराते थे, यह बहुत छोटे द्वारपालकों का कृत्य (करम) है, हालांकि सब कार्य का कर्त्ता भगवान् ही है, किन्तु वह रूप बदल कर करते हैं यदि स्वयं को ही करना है तो तब विपरीत कार्य (सेवक के बदले राजा का कार्य) क्यों नहीं करते हैं ? इससे मेरे चित्त में क्लेश हो रहा है, देव सभा में जहां ब्रह्मा बैठता है। वह राजासन है, इससे राज्यासन को ब्रह्मा का आसन कहा है, इससे यह सूचित किया है कि ब्राह्मणों के आने पर भी उग्रसेन नहीं उठता है। उग्रसेन बैठा रहे भगवान् खड़े-खड़े कैङ्कर्य करें इस दुःख को मिटाने का कोई उपाय ही नहीं हैं ।।२२।।

आभास—एवं रूपं मोहनं चोक्त्वा, तस्याभिप्रायापरिज्ञानादज्ञस्य तव केल्श इत्याशङ्क्य, तदभिप्रायमपि जानामि, तथापि क्लेश इति वक्तुं तस्य दयां निरूपयति। क्लेशस्तु बुद्धिकृतो न भगवत्कृतः। स हि भगवान् सर्वानेव भक्तान् सेवकानात्मनोऽप्यधिकत्वेन ज्ञापयति। तत्रान्यासहनमयुक्तम्। उग्रसेनोऽपि न वक्तव्यः, भगवतैव तथा क्रियमाणत्वात्। विपरीतं च करोति, पूर्वश्लोके तथैव कथनात् तस्मत् प्रमाणबलमतिक्रम्य प्रमेयबलेन तथा करोतीति तस्य प्रमेयबलं निरूपयन् भजनीयत्वं स्थापयति—

आभासार्थ—इस प्रकार भगवान् के रूप तथा मोह करने के वर्णन करने से मुझे (उद्धवजी को) क्लेश हुआ, ऐसी भी शङ्का नहीं करनी कि, मैं अज्ञान हूं, उनके अभिप्राय को न जानने से मुझे दुःख हुआ है कारण कि उनके अभिप्राय को भी जानता हूं तो भी क्लेश हुआ है, यों कहने के लिए उन (प्रभु) की दया का निरूपण करते हैं, भगवान् का अभिप्राय जानते हुए भी दुःख क्यों ? जिसका उत्तर देते हैं कि, क्लेश तो बुद्धि से हुआ है भगवान् द्वारा नहीं हुआ है कारण कि भगवान् अपने समस्त भक्तों (सेवकों) को लोक में अपने से भी उत्तम प्रकार से प्रख्यात करते हैं, इस विषय में, यदि दूसरे (उग्रसेन) की अधिक करें तो उसको सहन न करना उचित नहीं हैं। उग्रसेन को उल्हाना देना भी उचित नहीं है, क्यों कि भगवान् ने ही यों किया है, विपरीत भी करते हैं। पूर्व श्लोकों में यों ही प्रतिपादन किया है, इससे प्रमाण बल का अतिक्रमण कर प्रमेयबल से यों करते हैं, निम्न श्लोक में उनके प्रमेयबल का निरूपण करते हुए कहते हैं कि भजन करने योग्य वे ही है—

श्लोक—**अहो बकीयं स्तनकालकूटं जिघांसयाऽपाययदप्यसाध्वी।**
लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ।।२३।।

श्लोकार्थ—इस दुष्ट बकी ने मारने की इच्छा से, स्तनों में भरा हुआ कालकूट (विष) पिलाया, तो भी उसको माता के समान गति (मोक्ष) दी, ऐसे दयालु को छोड़ किसकी शरण लेवें ।।२३।।

सुबोधिनी—अहो इति। यथा भगवतः साधनं सर्वाश्चर्यकरम्, फलपूर्णस्य तुच्छफलसाधकम्; तथा तुच्छस्य साधनरहितस्याऽपि पूर्णफलदानमित्यहो आश्चर्यम् । बकस्य भागिनी दैत्यबकरूपा, तद्वृत्त्या सन्तोऽपि न मुक्ता भवन्ति । **इयमिति** बुद्धया भगवत्सङ्गे साऽप्युपस्थिता । **स्तनकालकूटमिति** । स्तने विद्यमानं कालकूटम्, कालानां कूटं समूहः । सहस्रं हि काला मृत्यवः सन्ति, ते सर्वे तस्याः स्तन्ये एकीभूताः । अतः कालानां कूटं यत्र, तादृशं स्तन्यमपाययत् । ज्ञानहेतुपक्षेऽपि तस्यां दुष्टत्वमाह—**जिघांसयेति**, हन्तुमिच्छया । पूर्वमपि तस्या दुष्टत्वमाह—**असाध्वीति** । अनेन दैत्यधर्मोऽपि तस्यां नास्तीत्युक्तम्, ते हि जितेन्द्रियाः । तथाप्याकृतिक्रिययोर्यशोदातुल्यत्वात् । तद्गतं दोषमविचार्यैव क्रियाफलं दत्तवान् । अनेन भगवत्स्वरूपं यथाकथञ्चिदपि संबद्धं साधनान्तरनिरपेक्षं फलं साधयतीत्युक्तम् । भगवांश्च गुणानेव गृह्णाति न दोषान् । अतः परम दयालुरित्याहकं वा दयालुमिति अन्यस्तु दयालुर्द यमपेक्षते नम्रता वा दोषाभावं वा । अयं तु किमपि नापेक्षत इति ततोऽन्यं **कं वा दयालुं शरणं व्रजेम्** । शरणपदेन च सेवाभक्त्यादिकमपि निवारितम्॥२३॥

व्याख्या—जैसे निरवधि (असीम) आनन्द रूप फल से पूर्ण भगवान् तुच्छ फल को सिद्ध करनेवाला साधन करे, तो वह, सब को आश्चर्य कराता है, और जो तुच्छ हो एवं साधन रहित हो उसको भी पूर्ण फल दे देते हैं, भगवान् का यह कार्य आश्चर्य कारक है बक की बहिन, दैत्य बक रूपा बकी (पूतना) थी, उस जैसे वर्तन (बर्ताव) से सत्पुरुष भी मुक्त नहीं होते हैं, 'इयं' पद से सूचित किया है कि यह भी बुद्धि से भगवान् के सङ्ग में उपस्थित हुई, जिससे एक प्रकार का मैत्री भाव हो गया, जिस (पूतना) के स्तन में कालों का समूह था, सहस्त्र काल (मृत्यु) हैं, वे सब मृत्यु उसके स्तन के दूध में थे। ऐसा दूध पिलाया (तो भी) भगवान् अविनाशी हैं अतः उससे, इस काल कूट मिश्रित दूध के दोष का सम्बन्ध नहीं होगा, इस पक्ष में भी उस (बकी) में दुष्ट पन आता ही है क्यों कि वह मारने की इच्छा से ही आई थी, पहले से भी इसमें दुष्टपन मौजुद है अतः कहा है कि 'असाध्वी' दुष्टा है, इससे यह कहा है कि इस में दैत्यों के धर्म भी नहीं है, क्यों कि वे जितेन्द्रिय होते हैं, यह जितेन्द्रिया नहीं है, तो भी उसकी आकृति और क्रिया माता यशोदा जैसी थीं, इसलिए उसके दोष का विचार न कर क्रिया (दूध पिलाने) का फल दिया, इससे यह सूचित किया है कि भगवत्स्वरूप का किसी भी प्रकार से सम्बंध हो जावे तो, दूसरे साधनों की अपेक्षा न कर, वह स्वरूप सम्बंधित को फल दे देते हैं, भगवान् तो गुणों को ही ग्रहण करते हैं, दोषों को ग्रहण नहीं करते हैं, इस कारण से ही परम दयालु हैं, इसलिए कहा है कि, 'कंवा दयालुं शरणं व्रजेम' ऐसे दयालु को छोड़ कौनसे दूसरे दयालु की हम शरण लेवें, 'शरण' पद से सेवा भक्ति आदि का भी निवारण किया है ॥२३॥

आभास—ननु 'निबन्धायाऽऽसुरी मता' इति आसुर्यां संपदि जाताः कथं **मुच्यन्ते**? 'तानहं द्विषतः क्रूरान्' इति भगवतैबाऽन्यथाप्रतिज्ञानात् । तत्राऽऽह—

आभासार्थ—गीता में भगवान् ने 'निबंधायतु सुरीमता' तानहं द्विषतः क्रूरात्' इन दोनों श्लोकों में कहा है कि 'आसुरी योनिय के लिए हैं, और द्वेषी और क्ररों के आसुरीयोंनि में ही पैदा करता हूँ' फिर यहाँ उस प्रतिज्ञा से विरुद्ध कैसे ? इस शङ्का को मिटाने के लिए 'मन्येऽसुरान' श्लोक कहा है—

श्लोक—**मन्येऽसुरान् भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान् ।**
ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसेसुनाभायुधमापतन्तम् ॥२४॥

श्लोकार्थ—जो असुर, युद्ध में, कन्धे पर चक्रधारी को बिठाकर सामने आते हुए गरुड़ को देखते हैं और क्रोध द्वारा ही मुझ (त्रिलोकेश्वर) में चित्त पिरोते हैं उन असुरों को मैं भगवदीय मानता हूं ॥२४॥

सुबोधिनी—मन्येऽसुरानिति । असुरानहं भागवतानेव मन्ये' **'मामप्राप्यैव'** इति वचनात् । ये प्राप्नुवन्ति भगवन्तं दृष्ट्यादिनाऽपि, तेषामधमगत्यर्थमप्राप्त्यभावात् मुक्ता एव भवन्ति । ये तु **'मामात्मपरदेहेषु प्रद्विषन्तः'** इति द्वेषसाधना भगवदप्राप्तिसाध्या निरूपिताः, ते जगद्रूपमेव भगवन्तं द्विषन्ति, न तु साक्षात् । ये तु साक्षात् द्विषन्ति ते प्राप्नुवन्त्येव । केनचिदन्तः करणधर्मेण ते भगवत्संबन्धिन इति भागवताः । ये तु सहजा दानवाः **'दानवास्तु तमोलयाः'** इति वैष्णवैर्निरूपिताः, ते वेदेऽपि देवप्रतिपक्षत्वेन निरूपिता न मुच्यन्त इति केचित् । ततश्च मुच्यमानेषु पूतनादिषु न सहजासुरत्वम्, किन्त्वसुरावेशः । स तु भगवत्संबन्धे गच्छतीति तेषां मुक्तियुक्तेति । एतदर्थं भेदवादं वैनाशिकीं च प्रक्रियाम्, मोहकवाक्यवत् स्वविरुद्धं भगद्वाक्यं वेदवाक्यानि च मन्यते, ते बहुवाक्यविरोधाच्चिन्त्याः । भक्त्यर्थं वा तथा वदन्तीति लोकशिक्षार्थं वा । असुराणां भगवत्प्राप्तावुपायमाह—**संरम्भमार्गाभिनिविष्टचित्तानिति** क्रोधसंरम्भ एव भगवत्प्रापको मार्गः, तत्राऽभिनिविष्टं चित्तं येषाम । क्रोधमार्गेण तेषां चित्तं भगवति प्रविशतीत्यर्थः । ज्ञानेच्छाप्रयत्नानामिव भगवद्विषयत्वेन क्रोधस्यापि भगवन्मार्गत्वम् । भगवतः परमदयालुत्वसिद्ध्यर्थं क्रोधस्याऽपि मुक्तिहेतुत्वं निरूप्यते, अन्यथा दयालुत्वं न स्यात् । तस्माद्वैष्णवैरेकङ्गीकर्त्तव्यम्, दैत्यानां मुक्त्यभावो वा, भगवतो दया वा । तत्राऽपि बलिष्ठा दयेत्याह—**ये संयुगेऽचक्षतेति** । ते हि युद्धे मर्तुं समायान्ति । तेषु चेद्भगवतो दया न भवेत्, तदा परोक्षे स्थितोऽन्येन वा मारयेत्, न तु स्वयं प्रत्यक्षो भवेत् । ननु तथा सति भक्तिमार्गविरोध इति चेत्तत्राऽऽह—**तार्क्ष्यपुत्रमिति** । अंसे सुनाभं चक्रमायुधं यस्य तादृश गरुड पश्यन्ति । **अंसेसुनाभायुधमित्यलुक्समासः** । एतावान् भेदो भक्तदैत्ययोः; भक्ताः सर्वरूपं सर्वदा भगवन्तं पश्यन्ति, गरुडाधिरूढं च, अन्यैः सह संयुगे च; दैत्यास्तु संयुग एव गरुडमेव पश्यन्ति । परं भगवादारूढम्, भगवानारूढो यमिति । अयमर्थः । कालात्मको गरुडः, तदुपरि च भगवान्, अतः कालं प्राप्य भगवन्तं प्राप्नुवन्ति, न तु जीवन्त इति विशेष इति ॥२४॥

व्याख्या —मामप्राप्येव गीता के श्लोकों में कहा है कि मुझे जो प्राप्त नहीं कर सकते हैं उनकी ही अधम गति होती है, किन्तु जो दृष्टि आदि से मुझे प्राप्त कर लेते हैं, ऐसे असुरों को 'मामप्राप्यैव' इस गीता के वाक्यानुसार मैं उन्हे भगवदीय ही मानता हूँ । उनकी अधम गति हो उसके लिए उनको

भगवान् की अप्राप्ति के अभाव के कारण हों वे भी मोक्ष को ही प्राप्त करते हैं, साराँश यह है कि भगवत् प्राप्ति (सम्बधादि) होने से अधम गति रुक जाती है और उनका मोक्ष हो जाता है, अपनी और अन्यों की देह में रहनेवाला जो मैं हूं उसका द्वेष करते हैं, इस प्रकार के द्वेष से मेरी (भगवान् की) अप्राप्ति सिद्ध होती है। वे जगद्रूप (भगवान्) का ही द्वेष करते हैं, न कि साक्षात् भगवान् का जो साक्षात् भगवान् का द्वेष करते हैं. व भगवान् को प्राप्त करते ही हैं अन्तः करण के धर्म से बुद्धि की स्वांस[1] वृत्ति से जो भगवान् से सम्बन्ध कर लेते हैं, वे भगवान् के होने से भगवत् अर्थात् भगवदीय हैं।

अन्यमत—कितने ही कहते हैं कि 'दानवास्तुतमोलयाः' दानवों का तो अन्धकार में लय होता है इस प्रकार जो वैष्णव तन्त्रों में कहा है वे स्वाभाबिक दानव हैं, वे 'दानव' वेद में भी देवों के शत्रु कहे हैं, उनका मोक्ष नहीं होता है।

पूतना आदि जिनकी मुक्ति हुई है वे स्वाभाविक दानव नहीं है, किन्तु उनमें आसुरावेश है, वह आसुरावेश भगवान् से सम्बन्ध होते ही निकल जाता है, इसलिए उनकी मुक्ति हो, यह उचित ही हैं।

दो प्रकारों के असुरों की मुक्ति और बन्ध की व्यवस्था के लिए भेदभाव, अर्थात् जीव वास्तविक ब्रह्म से पृथक वस्तु है ऐसे नैयायिक आदि मत को, वैनाशिकी प्रक्रिया अर्थात् सृष्टि का अस्तित्व दृश्यमात्र है, वास्तव में विनाश से सम्बन्धवाला है, और अपने सिद्धान्त के विरुद्ध, जो भगवान् के वचन व वेद के वाक्य हैं उनको मोहक वाक्यवत् मानते हैं, ऐसे विचार वालों का सिद्धान्त, बहुत शास्त्र वाक्यों से विरुद्ध होने से विचारणीय है, कि वे भक्ति के प्रसार के लिए अथवा लोकशिक्षार्थ यों कहते हैं।

असुर, भगवान् को प्राप्त कर सके वह उपाय कहते है, 'संरम्भमार्गाभिनिविष्ट चित्तान्' क्रोध के द्वारा जिन्होंने भगवान् में चित्त प्रविष्ट किया है, वे मुक्त हो सकते हैं, क्यों कि ज्ञान, इच्छा और प्रयत्न ये तीन जैसे भगवत्प्राप्ति के उपाय हैं, वैसे ही क्रोध भी भगवत्प्राप्ति का मार्ग (उपाय) है, क्रोध को, भगवत्प्राप्ति का हेतु कैसे कहा ? जिसके उत्तर में कहते हैं कि इससे भगवान् का परम दयालुत्व सिद्ध होता है। यदि क्रोध द्वारा सम्बन्ध जोड़नेवाले को मुक्ति न देवें, केवल जो स्नेह द्वारा सम्बन्ध करते हैं उनको देवें तो भगवान् में दयालुपन नहीं कहा जा सके, इससे वैष्णवों को दो में से एक बात माननी चाहिए, १—दैत्यों के मुक्ति का अभाव, वा २—भगवान् की दयालुता, भगवान् दयालु हैं अतः दया कर दैत्यों को भी मुक्ति देते हैं) इन दो मतों में भगवान् की दयालुता मानने का मत बलवान् है अतः ये 'संयुगेड चक्षतेति' कहा है, वे असुर युद्ध में मरने के लिए आते हैं, उन पर यदि भगवान् दया न करें तो, स्वयं सामने प्रत्यक्ष दर्शन न देकर परोक्ष में दूसरों से मरवादें, यदि यों करें तो इसमें भक्ति माग से विरोध आता है, इसलिये कहते हैं कि (तार्क्ष्यपुत्र) जिसके कन्धे पर चक्र आयुध है ऐसे गरुड के दर्शन करते हैं, 'अंसेसुनाभायुधम्' इस पद में अलुक—

---

[1] १—द्वेष, भय और काम आदि किसी भी वृत्ति से,

समास है, भक्त और दैत्य में जो भेद है वह दिखाते हैं, भक्त सर्वरूप भगवान् को सवर्दा देखते हैं, गरुड़ पर विराजे हुए स्वरूप को भी और दूसरों के साथ लड़ाई में भी दर्शन करते रहते हैं दैत्य तो केवल लड़ाई के समय मात्र गरुड़ को ही देखते हैं, किन्तु उस गरुड़ पर भगवान् विराजे हैं, गरुड़ काल त्मक हैं उसके ऊपर भगवान् विराजमान हैं, अतः असुर पहले काल को प्राप्त कर वनन्तर भगवान् को प्राप्त होते हैं जीवित (जीते हुए) प्राप्त नहीं होते हैं, भक्त व असुरों में इतना भेद है ॥२४॥

आभास—एवं भगवतः स्वरूपगुणानुक्त्वा, विदुरस्य तद्विषयकमज्ञानं दूरीकृत्यं पृष्टकथायामुत्तरं वदन् पञ्चाऽपि मात्रा निरूपयति दशभिः श्लोकैः—

आभासार्थ—इस प्रकार भगवान् के स्वरूप और गुणों का वर्णन कर इस विषय में जो विदुर को अज्ञान था, वह उसका अज्ञान दूर कर निम्न श्लोक 'वसुदेवस्य देवक्यां' से दश श्लोक में विदुर के प्रश्नों का उत्तर देते हैं, जिनमें पहले पाँच तन्मात्राओं का निरूपण करते हैं—

कारिका—**वसुदेवस्य देवक्यामित्यादिभिः । गन्धो भगवतः स्थानं रसः क्रीडाऽपि बालकैः ।**
रूपं त्रिभङ्गिललितं सर्वदोषनिवारकम् ।१।

कारिकार्थ—भगवान् का स्थान 'गन्ध है' बालकों के साथ क्रीड़ा भी 'रस' है, सर्व दोषों का नाशक त्रिभङ्ग वाला सुन्दर स्वरूप 'रूप' है ॥१॥

मृत्योरमार्गतो रक्षा तस्य स्पर्शोऽमि धीयते ।
लोकवेदविरोधेन मनोवागनुसारतः ॥२॥

लोक[1] और वेद[2] से विरुद्ध, मन और वाणी का अनुसरण कर, मार्ग रहितमृत्यु से रक्षण ही उसका स्पर्श है ॥२॥

प्रपन्ने भगवल्लीला दुःखाभावसुखात्मिका ।
स शब्दो नाऽन्य इत्येषमात्रा रूपोऽधिकारकृत् ॥३॥

शरणागतों के लिए दुःखाभाव रूप[3] और सुख रूप भगवान् की लीला ही शब्द है, दूसरा कोई शब्द नहीं है, इसी तरह यह मात्रा का गुण अधिकार कराने वाला है ॥३॥

---

[1] १—भगवान् के मन के अनुसार, लोक के विरुद्ध प्रकार से शरण आने का प्रसङ्ग 'अन्नकूट' समय हुआ ।

[2] २—भगवान् पर प्रेम के कारण वेद विरुद्ध प्रकार से शरण आने का प्रसङ्ग 'वेणुनाद' सुनने के समय हुआ ।

[3] ३—'दुःखाभाव' अर्थात् जिसका अनुभव नहीं किया है ऐसा 'परम-आनन्द'

श्लोक—**वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने ।**
चिकीर्षुर्भगवानस्याः शमजेनाऽपि याचितः ।।२५।।

श्लोकार्थ—इस पृथ्वी का कल्याण करने की इच्छा वाले, ब्रह्माजी से प्रार्थित भगवान् कंस के कारागार में वसुदेवजी की स्त्री देवकी से प्रादुर्भूत हुए ।।२५।।

सुबोधिनी—**वसुदेवस्य** भार्यायां देवक्याम् । भोजेन्द्रस्य कंसस्य बन्धनं यास्मिन्, तादृशे गृहे । वसुदेवस्य देवकीनिमित्तं भोजेन्द्रबन्धेन जाते वा । तात्पर्यस्य निरूपितत्वाद्यथा लोकसिद्धां कथां निरूपयति, सर्वभावविकाराणां तुल्यत्वाय । **अस्याः** पृथिव्याः शं कल्याणं **चिकीर्षुः** । पृथिवीसुखार्थं भगवदवतार इति प्रयोजनम् । ब्रह्मप्रार्थनाऽपि भक्तोद्धारार्था । अपिशब्देनाऽन्येषामपि प्रार्थना सर्वोद्धारार्था ।।२५।।

व्याख्या—जिस घर में कंस का कारागार (जेलखाना) था, ऐसे घर में वसुदेवजी की स्त्री से भगवान् प्रकटे, अथवा देवकी के कारण वसुदेवजी कंस के बंधन में पड़े उनको छुड़ाने के लिए आप देवकी से प्रकटे तात्पर्य[1] आगे कहा है, भगवान् में सर्व प्रकार की मानसिक वृत्ति विकार[2] समान हैं, यों बताने के लिए लोक प्रसिद्ध कथा कहते हैं इस पृथ्वी के कल्याण की इच्छा करने वाले अर्थात् आपके अवतार का प्रयोजन पृथ्वी को सुख देना है, ब्रह्मा की प्रार्थना भी भक्तों के उद्धार के लिए है । 'अपि' शब्द का यह भाव है, कि दूसरों ने जो प्रार्थना की वह सबके उद्धार के लिए ही थी ।।२५।।

श्लोक—**ततो नन्दव्रजमितः पित्रा कंसाद्विबिभ्यता ।**
एकादश समास्तत्र गूढार्चीः सबलोऽवसत् ।।२६।।

श्लोकार्थ—कंस से डरे हुए पिता, यहाँ से नन्द के व्रज में लेगए, वे वहां अपने तेज को छिपाकर, बलरामजी के साथ ११ वर्ष रहे ।।२६।।

सुबोधिनी **ततो** मथुरायां जननान्तरम्, **पित्रा** वसुदेन कंसाद्विशेषेण बिभ्यता **नन्दव्रजमितः** प्राप्तः । तत्र चोपसंहृततेजा भूत्वा, **एकादश समा** एकदशवर्षाणि, बलभद्रसहितः, स एव निजसहाय इति तत्सहितोऽवसत् । एते हि दश प्राणात्मकाः, द्वौ द्वौ च विषयात्मकौ । जनने हेतुत्रयम्; गोकुलसमागमने हेतुद्वयम् । अजेनाऽपीत्यनुषङ्गात् । इदं च न प्रयोजनमध्ये प्रविशति, भिन्नतया स्वातन्त्र्येण निरूपणात् । इदं चान्तरिक्षस्थानमिव । अत एव रुद्रप्रीत्यर्थमेकादशसमा अवसत् । वायोस्तुल्यरूपतया प्रीत्यर्थं गूढार्चिष्ट्वं सबलत्वं च । **समा वर्षाः** ।।२६।।

व्याख्या—मथुरा में प्रकट होने के बाद में डरे हुए पिता के द्वारा नन्द के व्रज में (श्रीकृष्ण) पहुँचे, वहां अपना तेज छिपाकर बलभद्र को ही अपना सहायक समझ उसके साथ ११ वर्ष वहाँ

१—सर्वमुक्ति के अभावार्थ, लोक वञ्चन रूप तात्पर्य है,

२—भगवान् में दीखते ये विकार ठगने के साधन रूप हों इसलिए

रहे, थे दश श्लोक प्राणात्मक[1] हैं, दो दो श्लोक एक एक पृथक २ विषय[2] के निरूपक हैं, इससे जन्म लेने के तीन कारण ये हैं—

१—भूमि को सुख देना २—ब्रह्मा की प्रार्थना ३—भक्त हितार्थ दूसरों की, की हुई प्रार्थना—

गोकुल जाने के दो कारण हैं—(१) पिता का कंस से डरना (२) ब्रह्मा की प्रार्थना के कारण में, ब्रह्मा की प्रार्थना अनुषङ्ग होने से कही है यों तो इसके प्रयोजन में गिनती नहीं क्यों कि यह स्वतंत्र रूप से पृथक कही है फिर यह व्रज तो अन्तरिक्ष स्थान के समान है क्यों कि जैसे 'तेऽन्तरिक्षमृजपन्' इस गति से अन्तरिक्षका देव महादेव है वैसे ब्रज का भी देव महादेव है कारण कि व्रज पशुओं का स्थान है, महादेव–पशुपति हैं, अतः एवं रुद्र की प्रसन्नता के लिए ११ वर्ष रहे, (क्योंकि रुद्र ११ हैं) यहाँ भगवान् में वायु की तुल्यता बताते हैं कि जैसे वायु के कार्य वायु में गुप्त रहते हैं, वैसे भगवान् भी अपना तेज छिपाकर रहे, अपना तेज छिपा कर रहने से वायु को प्रसन्न किया और महादेव के प्रसन्नतार्थ बलदेवजी के साथ रहे, कारण कि बलदेवजी स्वरूप में सङ्कर्षण भी है सङ्कर्षण का अधिदेव स्वरूप महादेव है, अतः इतने वर्ष बलदेव को साथ में लेकर ब्रज में रहे ॥२६॥

आभास—एवं भिन्नतया स्थितस्य पूर्वोक्तप्रयोजनाभावात्, शिरोभूतवासुदेवरूपेण क्रीडां कृतवानित्याहाऽष्टभिः । सप्त वै शीर्षण्या वागष्टमी' इति श्रुतेः । तत्र श्रोत्रे आह–परीत इति द्वाभ्याम्—

आभासार्थ—इस प्रकार वायु के समान अनासक्ति से स्थित, पूर्वोक्त प्रयोजन के अभाव होने से 'सप्तवैशीर्षण्या वागष्टमी' इस श्रुति के अनुसार शिर में रहे हुए सात इन्द्रियों के स्थान तथा आठवी वाणी से क्रीड़ा करने लगे यों निम्न श्लोक से आठ श्लोकों में कहते हैं, उनमें पहले दो श्लोकों से कान के विषय में कहा हैं—

श्लोक—**परीतो वत्सपैर्वत्सांश्चारयन् व्याहरद्विभुः ।**
यमुनोपवने कूजद्द्विजसङ्कुलिताङ्घ्रिपे ॥२७॥

श्लोकार्थ—मधुरध्वनि करते हुए पक्षी समूहों से पूर्ण वृक्षोंवाले, श्री यमुनाजी के समीप के उपवनों में गोप गणों से आवेष्टित (घिरे हुए) प्रभु बछड़ों को चराते हुए विहार करते थे ॥२७॥

---

[1] —इन्द्रिय रूप हैं—

[2] —सृष्टि होने के बाद, तन्मात्राऐं गुण रूप से इन्द्रियों में प्रविष्ट होतीं है, इन्द्रियां तन्मात्राओं को गुणरूप से ग्रहण करती है, जिसमें महाभूत भी विषय होते हैं ।

सुबोधिनी—वक्रमेतद्द्वयम्, स्कन्धार्थत्वेन। श्रोत्रमेतद्द्वयम्, प्रकरणार्थत्वेन। **वत्सपैर्गोपालैर्बालकैर्वेष्टितो वत्सांश्चारयन्निति**। क्रिययैव वायोः प्राणानां च, **व्याहरत्** विहारं कृतवान्, बालैः सह क्रीडितवानित्यर्थः। बाधाभावायाऽऽह—**यमुनोपवन इति**। यमुनाया समीपवने। चित्तोद्वेगाभावायाऽऽह—**कूजद्भिर्द्विजैः सङ्कुलिता अङ्घ्रिपा** यस्मिन्। भगवद्भक्ता वेदकल्पवृक्षेषु स्थिता भक्तिमाश्रित्य भगवन्तं गायन्तीत्युक्तं भवति ॥२७॥

व्याख्या—ये दो, २७-२८ वें श्लोक "परीतो" "कौमारी" स्कन्धार्थं त्वसेमुखरूप[१] हैं और प्रकरणार्थत्व से दो कान[२] हैं, बछड़ों के पालक गोपाल बालकों से घिरे हुए प्रभू बछड़ों को चराते हुए (बिहार करते थे) इस तरह वायु[३] और प्राणों[४] की क्रिया से ही विहार करते थे, किन के साथ विहार करते थे ? इस पर कहते हैं 'बालैः सह क्रीड़ितवान्' बालकों के साथ क्रीड़ा करते थे यों तात्पर्य है, खेलने में किसी प्रकार की रुकावट नहीं थी क्योंकि श्री यमुनाजी[५] के समीप खेलने के लिए उपवन था, वहां किसी प्रकार चित्त में उद्वेग भी नहीं होता था, कारण कि वहां पेड़ों पर पक्षी समूह मधुर ध्वनि करते रहते थे, जिससे आनन्द ही था, इससे यों कहा कि, भगवद्भक्त वेदरूप कल्प वृक्षों पर बैठकर भक्ति का आश्रय ले भगवान् के गुण गान कर रहे हैं ॥२७॥

आभास—वने क्रीडामुक्त्वा सन्ध्यादिषु व्रजे क्रीडामाह—

आभासार्थ—वन की क्रीड़ा का वर्णन कर, निम्न श्लोक में सन्ध्या समय व्रज में की हुई क्रीड़ा का वर्णन करते हैं।

श्लोक—**कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम्।**
रुदन्निव हसन्मुग्धबालसिंहावलोकनः ॥२८॥

श्लोकार्थ—मानों रो रहा है यों अथवा हंसता हुआ, भोले बालक के समान, कभीसिंह जैसी दृष्टिवाला होकर, ये सब देखने योग्य कौमार लीलाएँ व्रजवासियों को दिखाते हुए क्रीड़ा करते थे ॥२८॥

१—स्कन्ध का अर्थ, महाभूतादि की सृष्टि है यह सृष्टि बल के बिना नहीं होती है, बल प्राण का धर्म है, प्राण जल रूप है जो रस प्रधान है उसको ग्रहण करनेवाला मुख है, अतः यहाँ रस का निरूपण करना उचित ही है।

२—यहाँ प्रकरण, श्रोता के अधिकार का है श्रोता में सुनने के लिए "श्रोत्र" (कान) प्रधान है इसलिए ये दो श्लोक दो कान है।

३—बछड़ों को चराना यह वायु की क्रिया है, कारण कि द्रव्यादि को ले वायु की क्रिया है।

४—पक्षियों की मधुर ध्वनि के ग्रहण में प्राणों की क्रिया अनुकूल है।

५—जल रस प्रधान है अतः गोप बालकों से वहां क्रीड़ा रसवती है।

सुबोधिनी—कौमारीं दर्शयंश्चेष्टामिति। कुमारसंबन्धिनी पञ्चवर्षपर्यन्तं जायमाना। पञ्चाऽपि लीलाः पञ्चवर्षैः क्रियमाणा व्रजवासिनां पञ्चविधानाम्। त्रिविधाः पुरुषाः, द्विविधाः स्त्रियः। न हि सात्त्विक्यः स्त्रियः सन्ति। अतः सर्वेषामेव प्रेक्षणीयां चेष्टां प्रदर्शयन् व्याहरदिति संबन्धः। समर्थो हि स सर्वं कर्तुम्। **दर्शयन्नि**त्यनेन स्वयं तथा न कृतवानेव। तत्र प्रथमं **रुदन्निव**, तामस्यस्तदैव तुष्यन्ति, रुद्रप्रीत्यर्थं च। **हसन्निति** राजस्यः। **मुग्धभावेन** तामसाः, **बालभावेन** राजसाः, सिंहा**वलोकनेन** सात्त्विकाः। अत्राऽप्यागतः पूर्वं भक्तान् स्मरतीति रुदन्निव। हसन् मुग्धो यो बालः सिंहस्तद्वदवलोकनं यस्य ॥२८॥

व्याख्या—कुमार अवस्था पांच वर्ष पर्यन्त गिनी जाती है, अतः पांच वर्ष तक की हुई लीला 'कौमार लीला' कही जाती है पांच वर्षों में की हुई पांच प्रकार की लीलाएं, पांच प्रकार के व्रजवासियों को दिखाते हुए विहार (क्रीड़ा) करते थे तीन तरह के पुरुष और दो प्रकार की स्त्रियां थी, क्योंकि स्त्रियाँ सात्त्विकी नहीं होती हैं, अतः इन सबको योग्यतानुसार देखने योग्य चेष्टाएँ दिखाते हुए क्रीड़ा करते थे, यों सम्बन्ध है, वह प्रभु सब करने के लिए समर्थ हैं, 'दर्शयन्' पद का भावार्थ है कि स्वयं ने वैसा नहीं किया किन्तु केवल उनको दिखा दिया. इन लीलाओं में पहले वर्ष में मानो आप रो रहे हैं, ऐसी चेष्टा दिखायी, इस चेष्टा से ही तामसी स्त्रियां प्रसन्न होती हैं और यह चेष्टा रुद्र की प्रसन्नता के लिए भी की हैं, आपने हंसते हुए दर्शन दिए जिससे राजसी स्त्रियाँ प्रसन्न हुई, मुग्ध भाव से तामसी प्रसन्न हुए, बाल भाव से राजस पुरुष प्रसन्न हुए, सिंह जैसी दृष्टि से सात्विक पुरुष प्रसन्न हुए यहां आकर भी पूर्व समय के भक्तों का स्मरण आने से मानो रो रहे हैं, यों दिखाते हैं, हंसता हुआ भोला जो बालसिंह उसके समान नेत्र जिसके हैं, ऐसा दर्शन दे रहे हैं ॥२८॥

आभास—पौगण्डलीलामाह—

आभासार्थ—पौगण्ड लीला कहते हैं—

श्लोक—स एव गोधनं लक्ष्म्या निकेतं सितगोवृषम् ।
चारन्ननुगान् गोपान् रणद्वेणुररीरमत् ॥२९॥

श्लोकार्थ—लक्ष्मी के धाम रूप, श्वेत गौ तथा वषभ इत्यादि गोधन को चराते हुए भगवान् वेणु बजाते हुए अपने सेवक गोपों को खिलाते थे ॥२९॥

कारिका—**शिष्टेषु षट्सु वर्षेषु षड्भि श्लोकैर्विशेषतः ।**
तास्ता लीला इहोद्दिष्टाः क्रमो नाऽत्र विवक्षितः ।१।

कारिकार्थ—शेष छः वर्षों में की हुई पृथक् २ लीलाएं यहां छः श्लोकों से कही है जिसमें क्रम की अपेक्षा नहीं रखी हैं ।

सुबोधिनी—स एव, यः पूर्वमुक्तः। **गोधनं** गवां समूहम्। **लक्ष्म्या निकेतमतिसुन्दरम्**, चारणे हेतुः, सिता गावो वृषा यत्रेति। धर्मप्राधान्यं निरूपितम्, अतस्तच्चारणं धर्मकरणमेवेत्युक्तम्। अन्यान् स्वाज्ञया धर्मकर्तॄन् शीघ्रमेव फलसम्बद्धान् कृतवानित्यभिप्रायेणाऽऽह-**अनुगान्** स्वस्य पश्चाद्भावोपजीविनो गोपालान्, वेणुवादनं कृत्वा, ब्रह्मामृतं पाययित्वा, परब्रह्मानन्दे **अरीरमत्** रमयामास ॥२९॥

व्याख्या—वे ही प्रभु, जो पहले कहे हैं. खिलाते थे लक्ष्मी का धाम अर्थात् अति सुन्दर गौओं का समूह इसको चराते हुए खिलाते थे, चराने में कारण जिस गोसमूह में श्वेत गौ और वृषभ थे, इससे सूचित किया है कि बिहार धर्म प्रधान है, अतः उनको चराना धर्म कार्य है, यों कहा है दूसरे जो, आपकी आज्ञा से धर्म पालन कर रहे हैं, उनको भी शीघ्र ही फल से संबंध कराया है, इस अभिप्राय से कहते हैं कि (अनुगान्) अर्थात् अपने स्वामी के भावानुसार वर्तन करने वाले गोपालों की वेणु बजाकर, ब्रह्मामृत का पान कराके पर ब्रह्म के आनन्द में रमण कराते थे ॥२९॥

आभास—तत्र बाधकांस्तु लीलयैव दूरीकृतवानित्याह—

आभासार्थ—इस रमण कार्य में जो बाधक (विघ्न करने वाले) थे उनको तो खेलते ही दूर फैंक दिया, यों इस श्लोक में कहते हैं—

श्लोक—**प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः।**
लीलया व्यनुदत्तांस्तान् बालः क्रीडनकानिव ॥३०॥

श्लोकार्थ—कंस द्वारा प्रेषित मायावी स्वच्छन्द रूप धारण करने वाले दैत्यों का लीला से यों नाश कर दिया जैसे बालक खेलते हुए खिलौनों को तोड़ देता है ॥३०॥

सुबोधिनी—प्रयुक्तानिति। भोजराजेन कंसेन प्रेषितान्, नानारूपवधारिणो दैत्यान्, व्यामोहानार्थं समागतान्, **लीलयैव** क्रीडारूपयैव, विशेषेणाऽनुदत् दूरीकृतवान्। **तांस्तानिति** प्रसिद्धान् श्रमाभावायाऽऽह **बालः क्रीडनकानिवेति**। वस्त्रपुत्रिकाः, काष्टादिक्रीडासाधनानि वा। द्वयमेकवर्षकृत्यम् ॥३०॥

व्याख्या—कंस के भेजे हुए, अनेक रूपधारी दैत्य जो दैत्य व्यामोह कराने के लिए आए थे उनको क्रीड़ा करते हुए खेल में ही सब को समाप्त कर दिया, जा प्रसिद्ध थे, उन सब का भी नाश कर छोड़ा यों करने में आप को श्रम हुआ होगा ? इस शङ्का को मिटाने के लिए कहते हैं कि जैसे बालक, वस्त्रों की बनी पुतली अथवा काष्ट के खिलौने को खेलते हुए तोड़ देता है वैसे ही आपने भी इन मायावियों को खेलने में नाश किया ये दोनों कार्य एक वर्ष में किए हैं ॥३०॥

आभास—सप्तमवर्षकृत्यमाह—

आभासार्थ—'विषसान् विषपानेन' श्लोक से सातवें वर्ष के कृत्यों को कहते हैं—

श्लोक—**विपन्नान् विषपानेन निगृह्य भुजगाधिपम् ।**
उत्थाप्याऽपाययद्गावस्तत्तोयं प्रकृतिस्थितम् ।।३१।।

श्लोकार्थ—सर्पों के स्वामी को दण्ड देकर, विषपान से भरे हुए गौ गोपादि को जीवित कर, कालेय ह्रद के जल को विष रहितकर पहली स्थिति में लाके, वही मीठा जल गौओं और गोपादि को पिलाया ॥३१॥

सुबोधिनी—विपन्नान्विषपानेनेति । कालियह्रदे विषतोयपानेन **विपन्नान्** मृतान्, **भुजगाधिपं निगृह्य**, तन्मारकं दण्डयित्वा, तान् सजीवानु**त्थाप्य**, तदेव तोयं गाश्चाऽपाययत् । **गाव इति** गाः । **भुजगाधिप** कालियः । **तत्तोयं** कालियह्रदतोयम् । **प्रकृतिस्थितं** विषरहितम्॥३१॥

व्याख्या—कालिय ह्रद में विषमय जल के पान से मृतकों को, उनके मारने वाले सर्पों के स्वामी को दण्ड देकर, उन सब को जीवित दशा में उठाकर, वह ही जल गौ आदि को पिलाया, क्यों कि भगवान् ने उस जल को पहले जैसा मिष्ट (मीठा) बना दिया था ॥३१॥

श्लोक—**अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः ।**
वित्तस्य चोरुभारस्य चिकीर्षुः सध्वयं विभुः ।।३२।।

श्लोकार्थ—अतिशय धन का सत् व्यय करने की इच्छा वाले समर्थ प्रभु ने उत्तम ब्राह्मणों द्वारा गोपराज से गोसव यज्ञ करवाया[1] ।।३२।।

सुबोधिनी—अयाजयदिति । सप्तमान्तलीला । **गोसवेनेती**न्द्रयागं भङ्क्त्वा । वैश्यस्तोमम् । गावः सूयन्तेऽनेनेति गोसवं गोवृद्धिकरम् । वैश्यस्तोमात्मकं **गोपराजं** नन्दम् । **द्विजोत्तमैरिति** तेषां याजकत्वम्, न स्वस्येति ज्ञापितम् । इन्द्रयागभङ्गे न तथाकरणे हेतु—**वित्तस्येति** । कोट्यवधिद्रव्यस्य भाररूपेण स्थितस्य सध्वयं चिकीर्षुः । पूर्वस्थितस्याऽन्यथाकरणे सामर्थ्यं **विभुरिति** ।।३२।।

व्याख्या—इस श्लोक मे प्रभुजी की लीला, सातवें वर्ष के अन्त में की हुई है उसका वर्णन किया है, 'गोसव' पद कहने का भावार्थ है, इन्द्र के लिए होने वाले यज्ञ को न कराके यह 'गोसव' यज्ञ करवाया, 'गोसव' यज्ञ का दूसरा नाम 'वैश्य स्तोम' है क्यों कि इस यज्ञ से गौवों की वृद्धि होती है जिससे वैश्यों की समृद्धि बढ़ती है, नन्दराय, वैश्यराज होने से, गोसव यज्ञ का समूहात्मक स्वरूप है, उसने यह यज्ञ उत्तम ब्राह्मणों द्वारा कराया, अर्थात् यज्ञ कराने वाले ब्राह्मण थे न कि स्वयं भगवान् थे, इन्द्र के यज्ञ का भङ्ग कर इस यज्ञ कराने का हेतु यह था कि भगवान् ने देखा कि

---

[1] -दण्ड देना, और जीवित कर उठाने का कार्य त्वचा, नेत्र और स्दर्श से होता है, अतः मृत्यु से रक्षण इन द्वारा हाने से स्पर्शरूप है, गौसव भी स्पर्श का कार्य होने से स्पर्श रूप है ।

नन्दजी के पाम के कोट्यवधि असीम द्रव्य यों ही पड़ा है उसका सदुपयोग हो इसलिए इन्द्रयाग बन्द कराके गोसव यज्ञ कराया, जिसमें धन का सदुपयोग हुआ, इन्द्रयाग परम्परा मे होता आया था वह कैसे बन्द हुआ, जिसके उत्तर मे कहा है कि (विभु) भगवान् सब कुछ कराने में समर्थ हैं अतः इन्द्रयाग भी बन्द करा दिया ॥३२॥

आभास—अष्टमवर्षादिकृत्यमाह–

आभासार्थ—'वर्षतीन्द्रे' श्लोक में आठवें वर्ष का कार्य (लीला) कहते हैं।

श्लोक—वर्षतीन्द्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः।
गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता ॥३३॥

श्लोकार्थ—हे भद्र ! मान भङ्ग होने से क्रोधित इन्द्र ने खूब जब वर्षा की तब व्रजवासी बहुत विह्वल होने लगे, इनको विह्वल देख भगवान् ने अनुग्रह कर, पर्वतरूप छत्ता उठा के उनकी रक्षा की ॥३३॥

सुबोधिनी वर्षतीन्द्र इति। देवताप्रधानपक्षो मुख्य इति ख्यापयितुमिन्द्रेण वृष्टि कारितवान्। पुष्टिलीलां च स्थापयितुं गोवर्द्धनोद्धरणं च कृतवान्। व्रजविषयककोपाद्धेतोरिन्द्रे मेघद्वारा वर्षति सति, व्रजनाशमाशंङ्क्य स व्रजो रक्षितः। इन्द्रस्य कथमेवं करणमित्याशङ्क्याऽऽह–भग्नो मानो यस्य तस्मिन् सति, पश्चाद्वर्षति सति। गोत्रः पर्वतः स एव लीलातपत्रम्। पृथिवीरक्षका अपि धर्मिष्ठत्वाद्भगवता उद्धृताः। लीलया आतपत्रमिव लीलातपत्रम्। छत्राकं वा। **त्रातो** रक्षितः। **भद्रेति** संबोधनमुक्तविश्वासाय, भवानपि तथा रक्षित इति ज्ञानार्थं वा। अन्यथाऽपि पालयितुं समर्थः, स्वस्य परममनुग्रहं व्रजविषकं लोके ख्यापयितुं पर्वतोद्धरणं कृतवानित्यभिप्रायेणाऽऽह–**अनुगृह्णतेति** ॥३३॥

व्याख्या—भगवान् ने यज्ञ में देहवाला देवता ही होना चाहिए यह मुख्य पक्ष प्रकट कर दिखाने के लिए ही इन्द्र से वृष्टि कराई, और पुष्टिलीला (अनुग्रहात्मक लीला) की स्थापना करने के लिए गोवर्द्धन पर्वत को उठाया, व्रज सम्बन्धित कोप के कारण इन्द्र जब मेघ द्वारा वर्षा करने लगा, तब ब्रज का नाश हो जाएगा ऐसी शङ्का से भगवान् ने ब्रज की रक्षा की, इन्द्र ने यों क्यों किया ? जिसका उत्तर देते हैं, कि इन्द्र के मान का भंग हुआ था, इसलिए उसने ऐसी वर्षा करने की मेघों को आज्ञा दी, जब इसी प्रकार मेघ वर्षा करने लगे तब भगवान् ने जैसे छत्ता उठाया जाता है वैसे खेल २ में पर्वत रूप छत्ता उठाकर ब्रज की रक्षा की, पृथ्वी के रक्षकों का भी भगवान् ने उद्धार किया, क्योंकि वे धार्मिक थे, हे भद्र ! यह सम्बोधन उद्धवजी ने विश्वास करने के लिए दिया है, अथवा यह जताने के लिए कि तुमको भी इस प्रकार बचाया है पर्वत न उठाकर भी दुसरी भक्ति से बचा सकते थे, किन्तु ब्रज पर अपना परम अनुग्रह है यों लोक में प्रसिद्ध करने के लिए पर्वत को उठाया है, इस अभिप्राय को जताने के लिए 'अनुगृह्वता' पद दिया है, अनुग्रह करते हुए भगवान् ने यों किया–इससे ही पुष्टि लीला (अनुग्रहलीला) की स्थापना हुई है ॥३३॥

आभास—वर्षचतुष्टयकृत्यमाह—

आभासार्थ—'शरच्छशिकरैः' श्लोक में 'चतुष्ट्य'[1] वर्ष को लीला का वर्णन करते हैं—

श्लोक—**शरच्छशिकरैर्मृष्टं मानयन् रजनीमुखम् ।**
गायन् कलपदं रेमे स्त्रीणां मण्डलमण्डनः ॥३४॥

श्लोकार्थ—स्त्रियों के मण्डल के आभूषण रूप भगवान्, शरद ऋतु के चन्द्र की किरणों से उज्वल बने हुए रात्रि के मुख का मान करते हुए, और मधुर पदों वाला गान करते हुए रमण करते थे ॥३४॥

सुबोधिनी—शरच्छशिकरैर्मृष्टमिति । प्रत्यग्रोदितचन्द्रकिरणैर्मृष्टमुज्ज्वलितं **रजनीमुखं मानयन् रेमे** । रजनी स्त्री, शशी भर्ता । स हि बहुकालेन समागतो मानिनीं तामन्तस्तापेन क्लिष्टां स्वकरैर्मृजन् मानापनोदनं करोति, न तावता तस्या मानोऽपगच्छति । सा हि देवता निष्कलङ्केन रमणमपेक्षते । स हि भर्ता शशी, शशकलङ्कयुक्तः । अत उभयसमाधानार्थं स्वयमुपायं कृतवान् । रजनीं स्त्रीसहस्त्ररूपां कृत्वा, चन्द्रं स्वमनोभवं विधाय, तस्य मनोऽधिष्ठातृदेवतात्वसिद्ध्यर्थं शब्दब्रह्मोद्गिरन्, परमां रतिक्रीडां कृतवान् । शरत्कालीनः शशीति, वर्षाकाले रजनीमुखे वृष्टिर्भवतीति, रुदतीव सा । अत एव तदनन्तरकाले उत्पन्नाः स्वकैरमार्जनं करोतीति युक्तम् । नह्यन्ये रजनीमुखं मानयन्ति, महतां तस्मिन् काले क्रीडाभावात् । दोषस्तु रसात्मक एव न भवति । निर्दोषतया माननं भगवदेकनिष्ठतयैव । स्त्रीणां मण्डलं मण्डनं यस्य, मण्लस्य वा मण्डनभूतः, सुवर्णे नीलमणिवत्, । कषपाषणे वा सुवर्णरेखा ॥३४॥

व्याख्या—अब ही उदय हुए चन्द्रमा की किरणों से उजवल बने हुए रजनी के मुख का आदर करते हुए रमण करते थे, रजनी (रात्रि) स्त्री है और चन्द्रमा पति है, वह बहुत समय के बाद आए थे इसलिए भीतर अन्तः करण के ताप से दुःखी उस मानिनी का अपनी किरणों से स्पर्श करते हुए उसके मान का मोचन कराते हैं, इतने से ही उसका मान दूर नहीं हुआ क्यों कि, वह देवता है, बिना कलङ्क वाले से रमण करना चाहती है, यह पति 'शशी' तो खरगोश के कलङ्कवाला है, इसलिए दोनों (रजनी तथा चन्द्रमा) के समाधानार्थ स्वयं भगवान् उपाय करने लगे, रजनी को सहस्त्र स्त्री रूप बना लिया, चन्द्रमा का अपने मन से उद्भवकर, उस मन का अधिष्ठ देवत्व सिद्ध करने के लिए शब्द ब्रह्म का उच्चारण करते हुए परमारति क्रीड़ा करने लगे, यह चन्द्र शरद् ऋतु का था, वर्षा ऋतु में तो रात्री के समय वर्षा होती है, अर्थात् रजनी मानो रो रही है, इस कारण से ही वर्षा ऋतु के बीत जाने पर ही शरद् ऋतु होती है, उसमें प्रकट हुआ चन्द्रमा, अपने किरणों से (रजनी के) आँसुओं को पौछे, यह उचित ही है अन्य रजनी के मुख का आदर नहीं करते हैं कारण कि उत्तम पुरुष उस समय रति क्रीड़ा नहीं करते हैं, जो रससे पूर्ण हैं

---

[1] —पूर्व श्लोक में आठवें वर्ष की लीला कही है, अतः वहाँ (चतुष्य) का तात्पर्य है नवमां वर्ष, पौगण्डावस्था का चतुर्थ वर्ष नवमां होता हैं ।

उसमें तो दोष होता ही नहीं है, अतः दोष रहित हो के, आदर करने का तब ही होता है, जब भगवान् के परायण हो।

स्त्रियों का मण्डल जिसका भूषण है, अथवा सुवर्ण में नोलमणि के समान वा कसौटी पर पड़ी हुई सुवर्ण की रेखा की तरह, स्त्रियों के मण्डल का आभूषण बने हुए भगवान् रमण करते थे[1] ॥३४॥

---

[1] १—इस तरह आठ श्लोकों से शिररूप वासुदेव वयूह की लीला कही है, यह सर्व लीला वसुदेव के घर में प्रकट हुए भगवान् की है, वह परम पुरुष हैं, उनका उत्तम सच्चिदानन्द स्वरूप इस अध्याय के १२ श्लोकों में बताया है यों होने से ही अक्षर रूप पुरुषोत्तम की देह में व्यूहों के विभाग होना, सिद्ध, होता है, इससे ही १२ स्कन्ध में, वयूहों का निरूपण करते (ब्रह्म की) मूर्ति का वयूह यहां 'मूर्त्ति' शब्द दिया है मथुरा में चार वयूह से प्रभु प्रकटे है, गोकुल में 'दूध' उत्पन्न कराने के लिए वसुदेव व वयूह से प्रकटे हैं।

पुरुषोत्तम का तो जन्म होता ही नहीं है, वे सर्वथा उत्तम सदानन्द है, उनके सर्वश्री अङ्ग आनन्दात्मक है, आनन्दरूप अमृत प्रकाशते हैं इस श्रुत्य अनुसार आप ही अपने भीतर ही प्रतिष्ठा वाले रस रूप हैं—

द्वादश स्कन्ध में—वासुदेवः सङ्कर्षणः प्रद्युम्नः पुरुषः स्वयम्।
अनिरुद्ध इति ब्रह्मन्मूर्त्तिव्यूहोऽभिधीयते ॥इति॥
अत्र मूर्त्तिपदम्

उत्तम सदानन्द में प्रमाण—'सत्वक्षरात् परतः परः श्रुति'
अतोऽस्मिलोके वेदे च प्रथितः पुरुषोत्तमः'
स्मृति 'कृषिर्भू वाचकः' इस श्रुतिस सदानन्द
'आनन्दमात्रकरपादमुखोदरादिः स्मृतिः'
आनन्दरूपममृतं यद्विभाति' श्रुतिः

इति श्रीमद्भागवत महापुराण के तृतीय स्कन्ध द्वितीय अध्याय की
श्रीमद्वल्लभाचार्य चरण विरचित श्री सुबोधिनी (संस्कृत टीका)
हिन्दी अनुवाद सहित सम्पूर्ण।

श्री शक-वचन रागविलावल

हरि हरि, हरि हरि, सुमिरन करौ। हरि चरनारबिंद उर धरौ।
सुकदेव हरि चरननि सिर नाइ। राजा सौं बोल्यौ या भाई।
कहौं हरि–कथा, सुनौ चितलाई। सूर तरौ हरि के गुन गाई ॥१॥

उद्धव का पश्चाताप रागसोरठि

हरि जु सौं अब मैं कहा कहौं ?
प्रभु अंतरजामी सब जानत, हौं सुनि सोचि रहौं।

आयसु दियौ, जाउ बदरीबन, कहैं सो कियौ चहौं।
तन–मन–बुधि जड़देह दयानिधि, कौं करि लै निबहौ ?

अपनी करनी बिचारि गुसाईं, काहे न सूल सहौं।
मैं इहिं ज्ञान ठगीं ब्रजबनिता, दियौ सु क्यों न लहौं ?

प्रकट पाप–संताप सूर अब, कायर हठै गहौं।
औंर इहांउ बिवेक–अगिनि के बिरह–बिपाक दहौं ?

॥ श्री कृष्णाय नमः ॥

॥ श्री गोपीजनवल्लभाय नमः ॥

॥ श्री वाक्पतिचरणकमलेभ्यो नमः ॥

श्रीमद्भागवत महापुराण

तृतीय स्कन्ध

श्री मद्वल्लभाचार्य-विरचित **सुबोधिनी (संस्कृत) टीका** हिन्दी अनुवाद सहित

अधिकार प्रकरण

"अध्याय—" ३

भगवान् की अन्य लीला चरित्रों का वर्णन

कारिका—**तृतीये मध्यचरितं कृष्णस्य विनिरूप्यते ।**
इन्द्रियाणां तथा सर्गमधिकारस्य पोषकम् ॥१॥

कारिकार्थ—तीसरे अध्याय में श्रीकृष्ण के मध्यावस्था का चरित्र और अधिकार का पोषण करनेवाली इन्द्रियों के सर्ग का निरूपण किया जाता है ॥१॥

कारिका – **आविर्भूतो हि भगवांस्तत्त्वान्येव प्रवर्तयन् ।**
सर्वां सृष्टिं वितनुते तावन्तोऽत्र ततो गुणाः ॥२॥

कारिकार्थ—प्रकट हुए भगवान् तत्वों की प्रवृत्ति कराते हुए ही सकल सृष्टि का विस्तार करते हैं। इसलिये इस अध्याय में उतने गुण हैं ॥२॥

कारिका—**दशेन्द्रियाणि, चत्वारि मनआदीनि, देवताः ।**
अष्टाविंशतिरूपाणि निरूप्यन्ते ततोऽत्र हि ॥३॥

कारिकार्थ—इसलिये दश इन्द्रियाँ, मन आदि चार और इनके देवता ये सब मिलकर २८ रूपों का यहाँ निरूपण किया जाता है ॥३॥

आभास—पूर्वाध्याये मथुरायामुत्पत्तिमुक्त्वा, तत्र कर्तव्यचरित्रे वक्तव्ये, मध्ये गोकुलवासादिकं निरूपितम्; इदानीमाविर्भावकार्यं निरूप्यते। तत्र प्रथमं गोकुलात्समागत्य कंसं हतवानित्याह—

आभासार्थ—पूर्व के अध्याय में भगवान् का प्रादुर्भाव मथुरा में हुआ कहकर वहाँ के ही चरित्र कहने चाहिए थे किन्तु वे न कहके मध्य में गोकुल में वास आदि कह दिया, अब मथुरा में चतुर्व्यूह रूप से जो स्वरूप प्रकट हुआ उसका कार्य निरूपण करते हैं जिसमें पहले गोकुल से लौट कर कंस को मारा यों निम्न श्लोक में कहते हैं।

उद्धव उवाच श्लोक—**ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः।**
निपात्य तुङ्गाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्याम् ॥१॥

श्लोकार्थ—उद्धवजी ने कहा कि गोकुल से यहाँ माता-पिता को सुखी करने की इच्छा से बलदेव के साथ मथुरा नगरी में आकर, शत्रु समूह के स्वामी कंस को सिंहासन से गिराकर मारा, पश्चात् गत प्राणवाले को अपने बल से पृथ्वी पर घसीटने लगे ॥१॥

सुबोधिनी—तत इति। ततो गोकुलात्स भगवान् स्वपुरं मथुरामागत्य, स्वपित्रो शं चिकीर्षयोभयोः कार्यसिद्ध्यर्थम्, बलदेवेन संयुतो रिपुयूथानां नाथं कंसं तुङ्गान्मञ्चान्निपात्य, तदुपरि स्वयं पतित्वा, मृते तस्मिन् पित्रोः प्रियचिकीर्षया हतमपि तं **व्यकर्षत्**, विकर्षणं कृतवान्। एवं हि तेषां कामना स्थिता, क एनमित्थं करिष्यतीति। **ओजसेति।** यथा तस्याऽवयवा विशीर्णा भवन्ति, तथा महाप्रयत्नेन विकर्षणं कृतवानित्यर्थः। इदमेव भक्तानां मनः। भक्तानां मनसि स्थितं दैत्यं हत्वा तन्मनः स्वस्थं कृतमिति। एतादृशे चरित्रे कृते तेषां हृदये यज्जायते—अस्माभिरप्येवं कर्तव्यम्, भगवदपेक्षया स्थातव्यम्; भगवानेव चित्ते स्थितं दोषं परिहृत्य मनः स्थिरीकरिष्यतीति ॥१॥

व्याख्या—अपने माता-पिता को सुखी करने की इच्छा से, दोनों का कार्य सिद्ध करने के लिए बलदेवजी के साथ, वे भगवान् गोकुल से अपनी पुरी मथुरा में आकर, प्रथम ही शत्रु यूथ के नाथ कंस को सिंहासन से नीचे पटक कर, उसके ऊपर आप गिरे, जिससे वह मरा, तब माता-पिता को प्रसन्न करने की इच्छा से मरे हुए को अर्थात् उसकी मृतक देह को घसीटने लगे इस प्रकार की ही उन (माता-पिता) के मन की कामनाऐं थीं कि इसको इस प्रकार का बनाकर कौन घसीटेगा? इसके उत्तर में कहते हैं कि 'ओजसा' ऐसे भगवान् ही थे जिन्होंने यों कर अपने बल से ही इसको घसीटा, अर्थात् जैसे उसके अवयव विशीर्ण हो जावे, (अंग टूट जावे) वैसे महान् प्रयत्न से उसको घसीटने लगे, यह ही भक्तों का मन है, अर्थात् भक्तों के मन के भावों को जाननेवाला यह स्वरूप ही है, अतः भक्तों के मन में स्थित दैत्य को नाश कर, उनके मन को स्वस्थ किया, इस प्रकार के चरित्र होने से उनके मन में यह विचार उत्पन्न होता है कि हमको भी वैसे ही करना चाहिए अर्थात् भगवान् की अपेक्षा रखकर रहना चाहिए, क्योंकि भगवान् ही चित्त में स्थित हो दोष को निकाल अस्थिर मन को स्थिर करते हैं ॥१॥

आभास—एवं दुष्टनिग्रहं निरूप्य शिष्टपरिपालनं वक्तुं सतां सिद्धार्थं स्वयमाद्यं ब्रह्मचर्यलक्षणं धर्मं संपूर्णं कृतवा नित्याह—

आभासार्थ—यों दुष्टों के दण्ड देने का निरूपण कर अब सभ्य पुरुषों का पालन करने के लिए सत्पुरुषों के शिक्षार्थ, स्वयं आपने पहला ब्रह्मचर्य धर्म पूर्णरीति से पालन किया यह निम्न श्लोक में कहते हैं।

श्लोक—सान्दीपनेः सकृत्प्रोक्तं ब्रह्माऽधीत्य सुविस्तरम् ।
तस्मै प्रादाद्वरं पुत्रं मृतं पञ्चजनोदरात् ॥२॥

श्लोकार्थ—सान्दीपनि से सम्पूर्ण विस्तार सहित एक बार कहा हुआ वेद, आपने पढ़ लिया, पंचजन के उदर में प्राप्त होकर, मरे हुए गुरुपुत्र को लाकर गुरु को वर रूप दक्षिणा दी ॥२॥

सुबोधिनी – **सान्दीपनेरिति** । सन्दीपनस्य पुत्रः सर्वज्ञः, तस्य सकाशात् ब्रह्म वेदमधीत्य। **सकृत्प्रोक्त**मित्यतिसौबुद्ध्यं लोकप्रतीत्या निरूप्यते, विधिपरिपालनार्थं वा। सुष्ठु विस्तरमिति अर्थावबोधाङ्गादिसहितम्। अधीत्य, विद्यां समाप्य, गुरवे दक्षिणां दत्तवान्। सा दक्षिणा वररूपा, सोऽपिपुत्ररूपः, सोऽपि पूर्वं मृतरूपः। पूर्वं पञ्चजनोदरं प्राप्य मृतं पुत्रम्, मरणात् पूर्वावसरे स्थितरूपम्, तस्मै प्रादात्। भगवदाज्ञया कालेन मरणक्षणमारभ्य सर्वतत्त्वसमूहस्य सङ्घातस्य प्रतिक्षणं यो विकारो जातः, तं सर्वमेव विकारं काल उद्गिरणं कृतवान्; तदा स सर्वोऽपि सङ्घातः पूर्वस्थित एव भवति। इयमेव मनोधिकारिदेवता; चन्द्र एव हि क्षीणो वर्द्धते, शब्दहेतुश्च भवति ॥२॥

व्याख्या—सान्दीपन का पुत्र सान्दीपनि सर्वज्ञ था, उसके पास से वेद पढ़कर, कैसे पढ़ा? 'सकृत् प्रोक्तम्' गुरु ने एक बार कहा आपने याद कर लिया, यों कहकर यह दिखाया कि लोक प्रतीति से आपकी बुद्धि बहुत तीव्र (तेज) है। ऐसी बुद्धि वाले को गुरु के पास जाकर पढ़ने की क्या आवश्यकता थी? जिसके उत्तर में कहते हैं कि 'विधिपरिपालनार्थं वा' वेद की आज्ञा का परिपालन करने के लिए गुरु के पास पढ़े, जिससे अन्य भी वेदाज्ञा का पालन करें, केवल मूल वेद नहीं, किन्तु पूर्ण विस्तार सहित अर्थात् उसके अर्थज्ञान एवं अङ्गों सहित सम्पूर्ण ज्ञान प्राप्त कर लिया यों विद्या को (पढ़ने का कार्य) समाप्त कर, गुरु को दक्षिणादि, जो वर रूप थी, वह वर, भो पुत्र रूप था और वह पुत्र भी पहले मर गया था, अर्थात् जो गुरुपुत्र मर गया था, उसको जीवित लाकर दूँगा, ऐसा वर दक्षिणा रूप में दिया था, अतः वह पुत्र पहले जिस रूपवाला था वैसा ही लाकर भेट किया। कैसे मरा? पंचजन के उदर में प्राप्त होकर मरा था, भगवदाज्ञा से काल ने मरण के क्षण से लोक, सङ्घात के सर्वतत्त्व समूह में प्रतिक्षण, जो विकार होते थे, उन सब विकारों को बाहर निकाल दिया था इसलिए वह समग्र संघात जैसे पहले था वैसा ही रहा था,

यह ही मन का अधिकारी देव है, कारण कि क्षीण चन्द्रमा ही बढ़ता है और शब्द (वेद) जिसका कारण है वैसा ही होता है ।।२।।

आभास—एवमाचारेण शिष्टपरिपालनमुक्त्वा, द्वितीयाश्रमलक्षणं धर्ममाचारेण प्रवर्तयन् कृतवानित्याह—

आभासार्थ—इस प्रकार अपने आचरण से शिष्टों का परिपालन कहकर, गृहस्थाश्रम लक्षण वाले धर्म को आचरण से प्रवृत्त कराने लगे यों निम्न श्लोक में कहते हैं—

श्लोक—**समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषाम् ।**
गान्धर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ।।३।।

श्लोकार्थ—भीष्मक की कन्या को गान्धर्व विधि से प्राप्त करने की इच्छावाले जिन राजाओं को रुक्मी ने बुलाया था, उनके मस्तक पर पैर धरकर, इस के देखते हुए गरुड़ अपना भाग ले गए ।।३।।

सुबोधिनी—समाहुता इति । **भीष्मककन्ययैषां बुभूषया, श्रियः सवर्णेन** रुक्मिणा, ये **समाहुतास्तेषां मूर्ध्निपदं दत्त्वा गान्धर्ववृत्त्या** तां हृतवान् । **'गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ' इति** प्रथमविवाहे तदुभयं विधातुम्, रुक्मिण्यंशे गन्धर्वता, इतरविषये प्रसह्य कन्याहरणात् राक्षसत्वमिति गान्धर्ववृत्त्या जह्र इत्युक्तम् । तेषां **मूर्ध्नि पदं दधदिति** । बन्धुभिर्थत्तेभ्यो दत्तम्, तदेका बहुभ्यो दातुमशक्येति, यो रोचते, यो वा महांस्तस्मै देयमितिच्छाया जातत्वात् तत्सिद्ध्यर्थं सर्वेषां मस्तके स्वपदं सर्वानुकल्परूपं दत्तवान् । अनेन तेषामिच्छापि समर्थिता, सर्वप्रतिरूपत्वाद्भगवतः । श्रियः समानवर्णेन रुक्मिणीरूपेण ये **समाहृताः** इति वा पाठः । रूपेणव्यामुग्धाः सभागता इति, तेषां मस्तके पददानेन तस्मिन् पक्षे तेषां मेहो निराकृतः । भीष्मककन्यया कर्त्र्या, श्रियः सवर्णेन करणेन, गान्धर्ववृत्त्या बुभूषया ये समाहृता इत्यर्थे, अनियतत्वात् सर्वप्रतिरूपतया गान्धर्वत्वम् । प्रसह्य कन्याहरणं तु सर्वत्र तुल्यमेव । **मिषतामिति** चौर्यं निवारितम्, सर्वेषां बलहानिर्वा निरूप्यते । **स्वभागमिति** न वेधा दोषः । **सुपर्ण इति** । गरुडभावमापन्नो भगवानेव । तथा सत्यमृतमिव तां हृतवान् मातुः प्रियचिकीर्षया । स्वभागमिति वचनादियं ज्ञानशक्तिः । एषैप बुद्धिरधिकारिणो या 'भगवदेकपरा, भगवतैव सर्वान् दोषान् दूरीकृत्य, स्वार्थमेवात्मसात्कृता भवति ।।३।।

व्याख्या—भीष्मक की कन्या को प्राप्त करने की इच्छावाले जिन राजाओं को रुक्मी ने बुलवाया था, उनके मस्तक पर पांव धरकर गान्धर्व विध्यनुसार, उसका (रुक्मिणी का) भगवान् हरण कर गए, 'गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ' क्षत्रिय के लिए गान्धर्व और राक्षस ये दोनों विवाह, धार्मिक हैं, इसलिए भगवान् ने पहले ही विवाह में गान्धर्वपन और राक्षस पन

दिखाया है, जैसे कि रुक्मिणी के लिए यह विवाह 'गान्धर्व' था, कारण कि रुक्मिणी की इच्छा ही भगवान् से विवाह करने की थी, राजाओं एवं रुक्मी आदि की दृष्टि से बलात्कार से रुक्मिणी को ले जाना, 'राक्षस' विवाह था, 'उनके मस्तक पर पांव धर कर' इस पद का भावार्थ यह है कि भ्राताओं को पहले उनको देने की इच्छा थी किन्तु एक कन्या बहुतों को कैसे दी जायगी, अतः उनकी फिर ऐसी इच्छा हुई कि, जो राजा कन्या को पसन्द आवे अथवा जो महान् हो वह गान्धर्व विधि से ले ले, इसकी सिद्धि के लिए भगवान् ने सबके मस्तक पर, सबके काय करने में समर्थ अथवा सबके प्रतीक रूप अपने चरणधरे, इससे राजाओं की इच्छाओं की भी पूर्ति की, कारण कि भगवान् सर्व के मूल रूप हैं।

अथवा रुक्मिणी लक्ष्मी के समान शोभा वाली थी, जिससे उसके रूप ने राजाओं को मोहित कर बुलाया था, इस प्रकार का पाठ लेने आवे तो 'उनके मस्तक पर पैर धर कर' पद का भावार्थ होगा, उनका मोह दूर किया यदि, अपनी लक्ष्मी जैसी शोभा रूप साधन से रुक्मिणी ने राजाओं को गान्धर्व विधि से प्राप्त करने की इच्छा से बुलवाने का कार्य किया है तो भी यह निश्चय नहीं था। किसका वरण होगा, अतः भगवान् सर्व के प्रति रूप होने से गान्धर्व विवाह हुआ। बलात्कार से हरण करना तो सर्वत्र (सब पक्षों में) समान है 'मिषतां' देखते हुए पद से यह चोरी से ले गए, यों कोई भी नहीं कह सकेगा अथवा 'देखते हुए ले गए' इससे राजाओं की निर्बलता प्रकट की 'स्वभाग' अपनाभाग पद से यह सूचित किया है कि किसी प्रकार का धार्मिक दोष इसमें नहीं है, 'सुपर्ण' यह यहाँ इसलिए दिया है कि, भगवान् गरुड़भाव को यहां प्राप्त हुए हैं, अतः माता के प्रिय करने की इच्छा से अमृत की तरह रुक्मिणी को लेगए, अपने भाग शब्द का तात्पर्य यह है कि रुक्मिणी 'ज्ञान शक्ति' है, जो केवल भगवत्परायण हो, ऐसे अधिकारी की बुद्धि ऐसी ही होती है भगवान् ने ही, सर्व दोषों को दूरकर, अपने लिए ही उसका अङ्गीकार किया है ॥३॥

आभास—एवं सोमवंशे विवाहमुक्त्वा सूर्यवंशे सोत्सवं विवाहमाह—

आभासार्थ—यों चन्द्रवन्शों में विवाह कहकर अब सूर्य वंश में उत्सव सहित विवाह निम्न श्लोक में कहते हैं।

श्लोक—**ककुद्मिनो विद्धनसो दामित्वा स्वमंवरे नग्नजितीमुवाह ।**
तद्भग्नमानानपि गृध्नतोऽज्ञाञ्जघ्नेऽक्षतः शस्त्रभृतः स्वशस्त्रैः ॥४॥

श्लोकार्थ—वृष भी (साँडों) के नाकों में छेद कर, उसमें रज्जु (रस्सी) डालकर उनको भगवान् ने वश में कर लिया, जिससे स्वयंवर में नाग्नजिती से विवाह किया, साँडों से जिन राजाओं का अभिमान नष्ट हुआ है तो भी नाग्नजिती की प्राप्ति करने की इच्छावाले उन राजाओं को भगवान् ने आपेक्षत न होकर उनका नाश कर डाला ॥४॥

सुबोधिनी—ककुद्मिन इति । ककुद्मिनो वृषभान् पणत्वेन स्वीकृतान्, **विद्धनसः** कृत्वा नासिकां भित्त्वा, तत्र रज्जुं निपात्य, समाकर्षणेन **दामित्वा** भग्नवीर्यान् कृत्वा । तत्रापि **स्वयंवर** एव, न त्वाहूय दानम् । अनेन स्वधर्मोऽप्युक्तो गान्धर्वः । **नग्नजितः** पुत्री सत्यामुवाह । तस्यां राक्षसत्वमप्याह–**तद्भग्नमानान**, पूर्वं स्वयंवरार्थमागतान्, समयबन्धरूपैस्तैरेव वृषैर्भग्नो मानो येषाम् । तथाभूतानपि तन्मारकवृषभजेतुः भगवतः सकाशात्तां हर्तुं **गृध्नतो**ऽधिकाकाङ्क्षावतः, अत एव **अज्ञान्**, स्वयमक्षत एव स्वशस्त्रैस्तान् शास्त्रभृतो जघ्ने । अनेन तान् हत्त्वा नयनात् राक्षसत्वं निरूपितम् । इयमेव हि बुद्धिदेवता ब्रह्मरूपा । तस्या दोषा द्विविधाः नियता अनियताश्च । नियता मायाकृताः सप्तव्यसनात्मकाः, अनियतास्तु अनन्ता एव । तानुभयविधानपि भगवान् दूरीकृत्य, नग्नान् पाषण्डान् जयतीति वेदो धर्मो वा तज्जनिकां देवतां स्वनिष्ठामेव कृतवानिति, न स्वभावतोऽपि भगवदीयानां बुद्धिरन्यविषया भवति ।।४।।

व्याख्या—शुक्लरूप में स्वीकृत साँडों के नासिका को छेद कर उसमें रस्सी डाल, खींचने से उनके मद का दमन कर एवं उन्हें पराक्रम रहित कर, उनको वश में कर लिया, जिससे नाग्नजिती से विवाह हुआ ।

वह भी स्वयंवर–विधि से हुआ न कि उसके पिताने बुलाकर दान कर कन्या दी, इससे अपना धर्म गान्धर्व कहा, नाग्नजिती की कन्या सत्या से विवाह किया । उस विवाह में राक्षसपन भी था, वह कहते हैं कि, पहले स्वयंवर में आये हुए राजाओं का, शुक्लरूप में रखे हुए साँडों ने मान भंग कर दिया था । ऐसे होकर भी, उन राजाओं के मान भंग करनेवाले साँड़ों को जीतकर नाग्नजिती से विवाहित भगवान् से उसको (नाग्नजिती के) छीनने के लिए, विशेष आकांक्षा करने लगे, इस कारण से ही, आपक्षत न होकर, अपने शस्त्रों से उन अज्ञ शस्त्रधारियों को नाश कर डाला, उनको मारकर सत्या को ले आने से इस विवाह में राक्षसपन का निरूपण किया है ।

यह नाग्नजिती ब्रह्मरूप बुद्धि देवता है । उसके दोष दो तरह के हैं । (१) नियत और (२) अनियत, नियत दोष माया के किए हुए सात व्यसनात्मक हैं, किन्तु जो अनियत हैं वे तो अगणित हैं । इन दोनों प्रकार के दोषों को भी भगवान् दूर कर, 'नग्नान्, पाषण्डान् जयति इति वेदो धर्मो', पाषण्ड़ों को जीतता है वह वेद अथवा धर्म है उससे (वेद वा धर्म से) उत्पन्न देवता को अपने में निष्ठावान् किया, जो भगवदीय उनकी बुद्धि स्वभाव से भी भगवान् के सिवाय दूसरे विषय में नहीं लगती है ।।४।।

आभास—एवं विवाहमुक्त्वा तत्र रमणमासक्तिव्यतिरेकेण न भवतीति तदासक्तिकार्यमाह–

आभासार्थ—इस प्रकार विवाह का वर्णन कर, उसमें रमण बिना आसक्ति के हो नही सकता है, इसलिए उसकी आसक्ति का कार्य निम्न श्लोक में कहते हैं—

श्लोक—प्रभुः प्रियं ग्राम्य इव प्रियाया विधित्सुराच्छंद्द्युतरुं यदर्थे ।
वज्र्यद्रवत्तं सगणो रुषाऽन्धः क्रीडामृगो नूनमयं वधूनाम् ।।५।।

श्लोकार्थ—ग्रामीण की तरह प्रिया के प्रिय करने की इच्छावाले प्रभु ने पारिजात वृक्ष को स्वर्ग से ले आए अतः क्रोधान्ध हुआ इन्द्र जिस स्वर्ग के वृक्ष पारिजात को भगवान् से लौटाकर ले जाने के लिए गण सहित उनसे लड़ने लगा, कारण कि, यह इन्द्र वास्तव में स्त्रियों का वानर है ।।५।।

सुबोधिनी प्रभुरिति । प्रियायाः सत्यभामायाः **ग्राम्य इव प्रियं विधित्सुर्द्यु** तरुमाच्छंत् पारिजातमाहृतवान् । स्वर्गस्थितियोग्यं देवोपभोग्यमिति पारिजातमर्यादा; तां भङ्क्त्वा, प्रियार्थम् यथा ग्रामीणः कामरसाविष्टो मर्यादां भङ्क्त्वा रसमनुभवति, तथा दिव्यभोगं कृतवानित्यर्थः । पारिजातस्य स्वर्गेऽपि दुर्लभतां ख्यापयितुमाह–**यदर्थं इति** । यस्य पारिजातस्य अर्थे, **वज्री** इन्द्रो, वज्र गृहीत्वा स्वर्गार्थं ब्राह्मणवधमप्यङ्गीकृत्य, यो ब्राह्मणं वृत्रं हतवान् तादृशत्वं वज्रिपदेन सूच्यते, भगवताऽपि सह कलहार्थं सगणो देवादिसहितः, विचारानुत्पत्तये रुषाऽन्धः **आद्रवत्** आभिमुख्येन युद्धार्थमागतः । अनेन सर्वस्मादपि स्वर्गात् पारिजातोऽधिक इत्युक्तम्, यदथामिन्द्रादयोऽपि मर्तुं समुद्यता इति । नन्विन्द्रः सर्वज्ञो देवो बृहस्पतिशिष्यः कथमेवम् ? नीतिविरुद्धं सर्वप्रकारेणोपजीव्येन भगवता कथं विरोधं कृतवानित्याशङ्क्याऽऽह–**क्रीडामृगो नूनभयं वधूनामिति** । अयमिन्द्रो वधूनामिन्द्राण्यादीनां निश्चयेन क्रीडामृगो वानरः । वानरो यथा यथोक्तमेव करोतिनतु किञ्चिदपि विचारयति । वधूशब्देन च ता एव गृहपतय उक्ताः । तद्राक्षार्थमेवेन्द्रादीनामुपयोग इत्यर्थमहङ्कारो निरूपितः । भगवद्भक्तानाँ भगवतैव स्थापितोऽहङ्कारः फलायेति । अस्याऽभिमानिनी देवता रुद्रः । तद्भक्तनिराकरणेन भगवानेव तद्रूप इति भक्ताहङ्कारनिर्वाहकं रूपमुत्तरत्र वर्ण्यते ।।५।।

व्याख्या—अपनी प्रिया सत्यभामा का, ग्रामीण की तरह, प्रिय करने की इच्छावाले प्रभु, स्वर्ग का वृक्ष (पारिजात) वहाँ से ले आए, पारिजात वृक्ष की मर्यादा यह है कि वह स्वर्ग में रहे और उसका उपयोग देव ही करें । उस मर्यादा को तोड़कर, प्यारी के लिए ले आए । जैसे कायर सम्पूर्ण ग्रामीण, मर्यादा तोड़ रस का अनुभव करता है, वैसे ही प्रभु अलौकिक भोग करने लगे, यह पारिजात स्वर्ग में भी दुर्लभ है यह प्रसिद्धि करने के लिए कहते हैं कि जिस पारिजात के लिए इन्द्र ने यह पेड़ स्वर्ग में ही रहे इसलिए ब्राह्मण पुत्र का भी वध किया । इन्द्र का ऐसा होना वज्री विशेषण से सूचित करते हैं, क्रोध से अन्धा बनने से बिना विचार किए अपने देवादिगण सहित भगवान् के साथ लड़ने के लिए भगवान् के सम्मुख आ गया, यों कहने से सिद्ध किया है कि समस्त स्वर्ग से भी पारिजात विशेष उपयोगी है । जिस (पारिजात) के लिए इन्द्रादि भी मरने के लिए उद्यत हुए हैं । इन्द्र सर्वज्ञ देव है एवं ब्रहस्पति का शिष्य है, उसने सर्व प्रकार जो सबको जीविका आदि से जीवन देने वाले भगवान् हैं उनसे नीति विरुद्ध विरोध कैसे किया ? इस शंका का समाधान करते हैं कि 'क्रीड़ा' मृगोऽयंनून वधूनाम् यह इन्द्र इन्द्राणी आदि का निश्चय से क्रीड़ामृग अर्थात् वानर है । जैसे बन्दर को जैसे कहा जाए वैसे ही करता है वह कुछ भी सोचता

नहीं है, वैसे ही इन्द्र ने भी वानर के समान बिना विचारे किया है 'वधू' शब्द देकर यह बताया है कि, वे स्त्रियाँ घर की मालकिन हैं, उनकी रक्षा के लिए इन्द्राणि का उपयोग है इस प्रकार यह अहंकार निरूपण किया। अर्थात् सत्यभामा के रहे हुए अहंकार का संस्कार करना है। अथवा इससे इन्द्र का अहंकार दिखाया है। भगवद्भक्तों में भगवान् ने ही अहंकार स्थापित किया है, जिससे वह अहंकार फलदायी होता है। अहंकार का अभिमानी देवरुद्र है उसके भक्त का निराकरण करने से भगवान् ही अहंकार के देवता के रूपवाले बनजाते हैं। भक्तों के अहंकार को पालन करने वाले रूप का इसके बाद के ६ श्लोक में कहेंगे ।।५।।

आभास—भगवतो भोगोऽपि भक्तोष्टसिद्धयर्थमेवेति, तस्य दयां प्रतिपादयन्, दुष्टनिग्रहपूर्वकं भक्तानां सर्वमेवेष्टं प्रयच्छन्, भोगं करोतीत्याह–सुतं मृध इत्यादि चतुर्भि :—

आभासार्थ—भक्तों के इष्ट सिद्धयर्थ ही भगवान् भोग करते हैं, भक्त पर दया का प्रतिपादन करते हैं और दुष्टों का निग्रह आदि कर भक्तों को जो कुछ इच्छितप्रिय है वह सब देते हुए भोग करते हैं, यों 'सुतं मृधे' श्लोक से ४ श्लोकों में वर्णन करते हैं—

श्लोक—**सुतं मृधे खं वपुषा ग्रसन्तं दृष्ट्वा सुनाभोन्मथितं धरित्र्या ।**
आमन्त्रितस्तत्तनयाय शेषं दत्त्वा तदन्तःपुरमाविवेश ।।६।।

श्लोकार्थ—शरीर से आकाश को ग्रसने वाले पुत्र को युद्ध में सुदर्शन से खण्ड-खण्ड होके मरा हुआ देख, पृथ्वी से आमन्त्रित भगवान् उसके पुत्र (भगदत्त) को बचा हुआ सर्वराज्य देकर, उसके अन्तःपुर में प्रविष्ट हुए ।।६।।

सुबोधिनी—**सुतं** नरकासुरं भगवता हतं दृष्ट्वा धरित्री भगवन्तं प्रार्थितवती शेषरक्षार्थम्। कृते करणाभावात्, तदा तथा **आमन्त्रितस्तत्तनयाय** भगदत्ताय, शिष्टं सर्वमेव राज्यं दत्त्वा, तत्पुत्रोपयोगाभावपदार्थग्रहणार्थं **तदन्तः-पुरमाविवेशे**त्यन्वयः। भगवान् सर्वेषां स्वकीयानां सर्वमेव कार्यं स्वयं करोतीति भगवच्चरित्रमुक्तम्। इदमेव रूपमहङ्कारदेवतायाः। नरकासुरवधेहेतुः– **खं वपुषा ग्रसन्तमिति**। वृत्रतुल्यता निरूपिता। ब्रह्मणा हि कृतं जगत् परिपालयितुं समुद्यतो विष्णुः रुद्रप्रसादान्महाभूतग्रसनसामर्थ्यं प्राप्तवन्तं स्थित्यर्थं स्वपुत्रमपि हतवान्। पौत्रस्थापनं तु भार्याप्रार्थनया। दोषभावाय **मृध** इत्युक्तम्। संग्रामेहननं क्षात्रियाणां न दोषाय। शून्यं हि वस्तुना पूरितं भवति, **ख**माकाशं शरीरेण पूरितमिति तेन ग्रासो निरूप्यते। **ग्रसन्तमिति** वर्त्तमाननिर्देशेन प्रतिक्रियाकालोऽयमिति सूचितम्। **सुनाभं** सुदर्शनम्। **उन्मथनं** खण्डशश्छेदनम्। तच्छरीरं मथित्वा तत्र स्थितं जीवमुद्धतवानिति वा। तदन्तःपुरप्रवेशात् तमात्मनि सायुज्यं प्रापितवानिति लक्ष्यते। अत एव न दोषोऽपि केनाप्यंशेन। ताश्च देवस्त्रिय इति च। संबन्ध एव वरप्राप्त इत्यष्टावक्रशापप्रसादाभ्यामवगम्यते ।।६।।

व्याख्या—भूमि, अपने पुत्र नरकासुर को, भगवान् से मारा हुआ देख, उन (भगवान्) को शेष (बचे हुए) की रक्षा के लिए प्रार्थना करने लगी, 'कृते करणाभावात्' जो कार्य हो गया है,

उसके लिए यदि कोई कहे कि न करो, वह तो बनेगा ही नहीं अर्थात् वह तो होगा ही नहीं। सारांश कि नरकासुर मरा सो मरा, तब पृथ्वी द्वारा आमन्त्रित (बुलाए हुए) भगवान् ने उस (नरकासुर के पुत्र भगदत्त को शेष सब राज्य दे दिया, फिर भगदत्त के उपयोग में न आने वाले पदार्थों को लेने के लिए उसके अन्त: पुर में प्रविष्ट हुए, भगवान् अपने भक्तों के सर्वकार्य स्वयं ही करते हैं। यों भगवच्चरित्र कहा है। यह ही रूप अहंकार देवता का है अर्थात् मैं ही सब करता हूँ ऐसी भावना कर्तापन का अभिमान ही अहंकारदेव का रूप है। नरकासुर को क्यों मारा ? जिसका कारण बताते हैं कि 'खं वपुषा ग्रसन्तं' शरीर से आकाश को निगला जाना, मारने में यह कारण है, इस विशेषण से वृत्रासुर तुल्यता दिखाई।

ब्रह्मा के स्थान पर जगत् की रक्षा के लिए उद्यत विष्णु भगवान् ने महादेव के प्रसाद से आकाश को भी ग्रसने की सामर्थ्य रखने वाले अपने पुत्र को भी जगत् की स्थिति के लिए मार डाला, पौत्र को राज्य, स्त्री की प्रार्थना से दिया। मारने में दोष लगता है किन्तु 'मृधे' पद देकर यह सूचित किया है कि लड़ाई में मारने पर क्षत्रियों को दोष नहीं लगता है, जो स्थान खाली होय उसको वस्तु से भरा जा सकता है अत: नरकासुर ने आकाश को ग्रस कर अपने शरीर में भर दिया 'ग्रसन्तं' पद वर्तमान काल में देकर यह सूचित किया है कि यह चालू समय उपाय करने का था। भगवान् ने 'सुनाभं', सुदर्शन, 'उन्मथनम्' (खण्ड-खण्ड करना) सुदर्शन से उसके शरीर को खंड खंड करके मारा अथवा उस शरीर का मथन कर उसमें स्थित जीव को शरीर से पृथक् कर उसका (नरकासुर का) उद्धार किया। उसके अन्त:पुर में प्रवेश करने से उसको अपने में सायुज्य दिया, यों करने से यह सूचित किया है कि किसी भी अंश से भगवान् में दोष नहीं है और दोष न होने का दूसरा कारण यह है कि वे स्त्रियां, देव स्त्रियां थी। उन स्त्रियों का भगवान् से सम्बन्ध वरदान के कारण हुआ है। यों अष्टावक्र के शाप और प्रसाद (प्रसन्नता) से हुआ है, ऐसा समझा जाता है ॥६॥

आभास—तत्र ताभिर्वृत इत्याह

आभासार्थ—अन्तःपुर में स्त्रियों ने भगवान् को घेर लिया निम्न श्लोक में कहते हैं—

श्लोक—**तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबन्धुम् ।**
उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ॥७॥

श्लोकार्थ—वहां भौमासुर की लड़ाई हुई, राजकन्याएँ दु:खियों के बन्धु, हरि को देख उठकर उत्यन्त हर्ष, लज्जा और प्रेमपूर्वक अवलोकन से भगवान् को सर्व ने पति रूप में ग्रहण किया ॥७॥

सुबोधिनी—तत्राहृता इति। ताः पूर्वोक्ता देवस्त्रियः, साम्प्रतं नरदेवकन्याः कुजेन नरकासुरेण आहृताः, **तत्रान्तः-पुरे**, सर्वदुः खहर्तारमैहिकपारलौकिकदोषदूरीकरणसमर्थम्, स्वभोगार्थं तथा करोतीत्याशङ्कानिवृत्त्यर्थ**मार्तबन्धुमार्तानां** तदीयत्वे बन्धुवद्धितकर्तारम्, दृष्ट्वा **उत्थाय सद्य** एकवारमेव तं पतित्वेन जगृहुः। **हरिमार्तबन्धुमिति** विशेषणं न ज्ञातमुपयुज्यते, किन्तु स्वरूपसदेव।

अत एव भगवद्दर्शनमात्रेण बन्दीक्लेशबन्धुत्यागादिसर्वदुःखानामपुनःस्मरणं विस्मृतत्वात् । स्वगृहे पुष्टा इव कामकलापूर्णाः कन्दर्पकोटिलावण्यं भगवन्तं भोगेच्छया गृहीतवत्य इत्याह—**प्रहर्षव्रीडानुरागप्रहितावलोकैरिति**। भगवन्तं हस्तेन दीनतया शरीरेण वा बन्धुमिव न गृहीतवत्यः । किन्तु हर्षेण, व्रीडया, अनुरागेण च प्रहितानि यान्यावलोकनानि, आनन्दचित्सद्भावदृष्टयः । प्रथमतो भगवन्तमानन्दमयं दृष्ट्वा प्रकृष्टो हर्षो जातः, तेनानन्दानुभवार्थं दृष्टिः प्रथमं प्रेषिता । ततोऽधिमुज्यमाने भगवति पतिस्त्रीरूपं चेतनभावमापन्ना, व्रीडया भोगं निवार्य, तदीयत्वख्यापिका दृष्टिः प्रेषिता । ततोऽन्तःकरणे भगवति परमप्रेमोत्पत्तौ, भगवतोऽपि स्वस्मिन् दृष्टिपाते, अनु पश्चादुद्गतो रागो जातः । तेन परमवैषयिकभोगार्थं भगबति सा दृष्टिः प्रेषिता । तान्येवाऽवलोकनानि, भगवद्ग्राहकाणि । अनेन भगवदीयानामेवं चित्त भगवतोत्पाद्यत इत्युक्तम्।।७।।

व्याख्या—वे देव स्त्रियां अब राजग्रह में जन्म लेने से राजकन्याएें हुई हैं, जिनको भौमासुर ले आया था। वे अब अन्तः पुर में सर्वदुःखहर्ता ऐहिक तथा परलोक के दोषों को दूर करने में समर्थ और आर्तबन्धु हैं अर्थात् प्रभू जो तदीय है उनका बान्धव की तरह दुःख मिटाते हैं, अतः भोग के लिए यों करते हैं यह शंका भी आर्तबन्धु कहने से मिटादी, जिससे भगवान् को देखते ही उठकर एकबार ही सबने उनको पति बना लिया। इन्होने कृष्ण के लिए 'हरि' 'आर्तबन्धु' ये विशेषण जो दिए हैं वे जानने से नहीं दिए हैं किन्तु स्वरूप से ये गुण इनमें हैं यों प्रतीति होने से कहे हैं, इससे ही भगवद्दर्शन मात्र से, कारागृह का दुःख, बन्धु त्याग आदि सर्व दुःख ऐसे भूल गई कि मानो हुए ही नहीं हैं, जिससे उनका फिर स्मरण ही नहीं हुआ। स्वगृह में पुष्ट की तरह काम कला से पूर्ण, कोटि कन्दर्प लावण्यवाले भगवान् को भोगेच्छा से ग्रहण किया, ग्रहण का प्रकार बताते हैं कि भगवान् को हस्त से, दीनता से वा शरीर से बन्धु की तरह ग्रहण नहीं किया किन्तु अति हर्ष से, लज्जा से और प्रेम से जोड़े हुए अवलोकनों से अर्थात् आनन्दचित् और सत्‌भाव वाली दृष्टियों से ग्रहण किया।

प्रारम्भ में आनन्दमय भगवान् को देखकर अत्यन्त हर्ष हुआ, इसमें स्वरूप आनन्द के अनुभव के लिए पहले कि दृष्टि को भेजा जिससे भगवान् का अधिक योग होने से हम पत्नियां हैं और भगवान् पति हैं। ऐसा अनुभव होते ही, लज्जा का उद्‌भव हुआ, अतः भोग को रोककर हम आपको स्त्रियां हैं। ऐसे भाव वाली दृष्टि को भगवान् के पास भेजा। उससे अन्तः करण में भगवान् के लिए प्रेम की उत्पत्ति हुई, उस समय भगवान् की दृष्टि का पात भी अपने में देखकर पश्चात् राग विशेष प्रकट हुआ, उससे विशेषवैषयिक भोग के लिए भगवान् पर ऐसी दृष्टि डाली। येही अवलोकन थे जो भगवान् को पतिपन से ग्रहण करते थे। इससे यह सूचित किया कि भगवदीयों का ऐसा चित्त भगवान् ही बनाते हैं यों कहा है।।७।।

आभास—तासां भगवतः स्वीकारमाह—

आभासार्थ—'आसां' इस श्लोक में कहते हैं कि भगवान् ने उनको स्वीकार किया—

श्लोक—**आसां मुहूर्त एकस्मिन्नानागारेषु योषिताम् ।**
सविधि जगृहे पाणिमुरुरूपः स्वमायया ।।८।।

श्लोकार्थ—अपनी माया से अनेक रूपधारण कर एक ही मुहूर्त्त में प्रत्येक गृह में जाकर पृथक्–पृथक् रूप से इन स्त्रियों से भगवान् ने विधिपूर्वक विवाह किया ।।८।।

सुबोधिनी—आसां मुहूर्तं एकस्मिन्निति । समुदायेन भोगः । स्त्रीणां सुखकरो न भवतीति, तासां कालत इच्छाबाधनाभावाय भगवानुरुरूपो भूत्वा, लौकिकवाच्यतानिवृत्त्यै, **सविधि** विधानपूर्वकम्, समानफलसिद्धये भगवत्त्वख्यापनाय च, **एकस्मिन् मुहूर्ते** पाणिं जगृहे विवाहं कृतवानित्यर्थः । **स्वमायया** जगत्कर्तुः करणभूतया । केवलसच्चिदानन्देऽपि भोगार्थं तद्ग्रहणयोग्यत्वाय स्वरूपमाच्छादयतीति, मायायाः करणत्वम् । यथा सर्वमेव जगत् भगद्रूपं चिदंशमायया व्यवहितं सर्वैर्यथेष्टं व्यवह्रियते, तथा भगवान् स्वमायया तासामभिलषितभोगार्थमुरुरूपो जात इत्यर्थः । **योषितामिति** भोगदशा प्रदर्शिता । **नानागारेष्विति** पूर्णरसाविर्भावाय । अत्र विधिर्गान्धर्व इति प्रतिभाति, क्षत्रियाणां मुख्यत्वात् । एवं ग्रहणमेव चित्ताधिष्ठातुर्वासुदेवस्य भक्तान् प्रति चित्तप्रेरणमित्युक्तम् ।।८।।

व्याख्या—बहुत स्त्रियों के साथ में भोग हो वह स्त्रियों को आनन्ददायी नहीं होता है । कान के कारण उनकी इच्छा में बाधा न पड़े, इसलिए भगवान् ने बहुत रूपधारण किए, लोक में हीन भावना न दीखे इस वास्ते शास्त्र विधि के अनुसार समान फल की सिद्धि के लिए और भगवत्व की प्रसिद्धि के लिए एक ही मुहूर्त्त में भगवान् ने पाणि ग्रहण कर विवाह किया ।

जगत्कर्त्ता की साधनभूत अपनी माया से बहुत रूप धारण किए हुए भगवान् स्वयं सच्चिदानन्द होते हुए भी भोग के लिए, उसके ग्रहण की योग्यता के लिए अपने स्वरूप का आच्छादन करते हैं । इसमें माया का करणत्व है अर्थात् माया साधन है जैसे भगवद् रूप समस्त ही जगत् चिदंश की माया से आच्छादित होने पर ही सब अपनी इच्छानुसार अपना व्यवहार करते हैं । यों भगवान् भी अपनी माया से उनके इच्छित भोग की उनको प्राप्ति हो तदर्थं बहुत रूपवाले बने । 'योषिताम्' (स्त्रियों को) पद से भोग के योग्य स्थिति को सूचित किया, जुदे-जुदे घरों में कहने का भाव यह है कि एकान्त में पूर्ण रस का आविर्भाव होता है । यहाँ जो विधि कही है वह गान्धर्व विधि है । यों भासता है । क्योंकि गान्धर्व विधि क्षत्रियों में मुख्य विधि है इस प्रकार के ग्रहण को ही, चित्त के अधिष्ठाता वासुदेव का भक्तों के प्रति इस प्रकार चित्त की प्रेरणा है यों कहा है ।।८।।

आभास—तासां फलमाह—

आभासार्थ—उनको जो फल प्राप्त हुआ उनका 'तास्वपत्य' श्लोक में वर्णन करते हैं—

श्लोक—**तास्वपत्यान्यजनयदात्मतुल्यानि सर्वशः ।**
एकैकस्यां दश दश प्रकृतेर्विबुभूषया ।।९।।

श्लोकार्थ—प्रकृति की इच्छा हुई कि मैं बहूं इसलिए प्रत्येक स्त्री में से भगवान् ने सर्वप्रकार से अपने समान दश–दश अपत्य (सन्ताने) उत्पन्न किये ।।९।।

सुबोधिनी—तास्वपत्यान्यजनयदिति। अपत्यानि कन्यापुत्ररूपाणि। तासामधिकरणत्वेन तत्तुल्यापत्यजननं निवारितम्। तथा सति भगवदिच्छया प्रकृतिपुरुसंबन्धेनैव तासां पुत्रा जायेरंस्तद्व्यावृत्त्यर्थमात्मतुल्यानित्याह। **सर्वश इति** पञ्चधा। शरीरत इन्द्रियतः प्राणतोऽन्तःकरणत; स्वरूपतस्तत्सर्वधर्मतश्चेति। **एकैकस्यां दशदशेति** विध्यर्थः परिपालितः। **'दशास्यां पुत्रानाधेहि'** इति श्रुतेः। प्रकृतेर्विशेषभवनेच्छयेति करणं सङ्ख्यायाम्। साह्येकमेव पुरुषं सकृदुपलभ्य महत्त्वकार्यं कृतवती, पुनः सम्बन्धे प्रयोजनाभावात् सकामैव स्थिता। इदानी भगवांश्चेदनन्तरूपो भवति तदा तद्भोगार्थं पुनः पुनः पुरुषसंबन्धं प्राप्य कार्याणि जनयिष्यतीति। तस्या विबुभूषा सिध्यति। यागवत्करणताऽस्याः। भगवदिच्छया व्यापृता बहुधा जननं साधयतीति। अनेन साङ्ख्यवत् भगवद्भक्तानामिन्द्रियप्रवृत्तिरिति दशसङ्ख्यया बहिरिन्द्रियाणां स्वरूपमुक्तम्। ते ह्यग्रे न बीजभावं प्राप्नुवन्ति, भोगश्चान्येति; तत्रापि न भोगेच्छाकारणम्, किन्तु भवनेच्छैव कारणम्॥९॥

व्याख्या— 'अपत्य' पद का तात्पर्य है सन्तान, वह पुत्र हो या पुत्री हो, हालाँकि स्त्रियां सन्तान के उत्पत्ति का स्थान हैं तो भी उनके समान सन्तान उत्पन्न नहीं किए अर्थात् कन्याओं को उत्पन्न नहीं किया किन्तु भगवान् की इच्छा से प्रकृति पुरुष के सम्बन्ध से ही उन स्त्रियों को उनके समान सन्तान पुत्र उत्पन्न होवे, यों नहीं हुए इसलिए कहा है कि भगवान् ने 'आत्म तुल्यात्' सर्वप्रकार अपने समान पुत्र उत्पन्न किए। 'सर्वशः' पद का भावार्थ है कि भगवान् ने शरीर से, इन्द्रियों से प्राणों से, अन्तः करण से और स्वरूप से तथा उनके सर्वधर्मों से समान प्रत्येक स्त्री से 'दशास्यां पुत्रानाधेहि' इस श्रुत्यनुसार दश-दश पुत्र उत्पन्न किए। यों वेदाज्ञा का परिपालन किया प्रकृति की विशेष होने की इच्छा इसमें (दश संख्या होने में) 'करण' साधन है।

उस प्रकृति ने एक ही पुरुष को एक ही बार पाकर उससे भोग, भोगकर महत्तत्त्व उत्पन्न किया, फिर उससे सम्बन्ध करने की आवश्यकता न रहने से सकाम ही रह गई। अब जब भगवान् अनन्त रूपवाले हुए हैं तब उसके भोग के लिए फिर-फिर पुरुष से संबंध प्राप्तकर सन्तानों को पैदा करेगी, जिससे उसकी रही हुई इच्छा पूर्ण होगी। भगवद् इच्छा से कार्य में रूद्ध हुई यह बहुत प्रकार से उत्पत्ति करेगी, अर्थात् यह यज्ञ की तरह साधन बनेगी इससे अर्थात् इस श्लोक द्वारा स्कन्ध के विचार से यह वाक्य कहा है कि, सांख्य की तरह भगवद्भक्तों के आनन्द को उत्पन्न करने का भी इन्द्रियों की प्रवृति होती है। यों दश संख्या से बाहर की इन्द्रियों का स्वरूप कहा वे (साङ्ख्य जीव। आगे बीजभाव को प्राप्त नहीं होते हैं अर्थात् अपत्य रूप से उत्पन्न नहीं होते हैं। उनका भोग अन्य के लिए है अर्थात् दश की संख्या से इन्द्रियों का बाहर का स्वरूप बताया है इस अन्यार्थ भोग में भो भोग करने की इच्छा कारण नहीं है। किन्तु वहुत होने की इच्छा ही कारण है॥९॥

आभास—एवं कामलीलामुपपाद्य क्रोधलीलां सोपपत्तिकामुपपादयति—
कालमागधेत्यादि सप्तभिः—

आभासार्थ—इसी तरह काम लीला का प्रतिपादन कर 'कालमागध' श्लोक से लेकर सात श्लोकों में तर्क सहित क्रोध लीला का वर्णन करते हैं—

श्लोक—**कालमागधशाल्वादीननीकै रुन्धतः पुरम् ।**
अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशत् ।।१०।।

श्लोकार्थ—पुर को सैनाओं से रून्धने वाले काल, मागध, शाल्व आदि को, अपने पुरुषों को स्वयं अपना तेज देकर नाश किया ।।१०।।

कारिका—**कामक्रोधौ समौ कर्तुं सप्त सप्त निरूपिताः ।**
यल्लोभे गुणसङ्ख्यास्ते निवृत्तिः सप्तधा ततः ॥१॥

कारिकार्थ—काम और क्रोध को समान बनाने के लिए प्रत्येक के सात-सात श्लोक कहे हैं और लोभ के ५ श्लोक कहे हैं उनसे निवृत्ति सात प्रकार से कही है ।।१।।

कारिका—**ततो मध्ये चतुर्मूर्तेः प्रद्युम्नादेर्निरूपिताः ।**
वासुदेवाद्भक्तरक्षा तृतीया सा निरूप्यते ॥२॥

कारिकार्थ—चतुर्मूर्ति में से यहाँ प्रद्युम्नादि कहे हैं । वासुदेव से भक्त की रक्षा की जाती है वह तीसरी मूर्ति है ।।२।।

सुबोधिनी—कामजनकानि चत्वार्येव बहिरिन्द्रियाणि । इन्द्रियं, स्पर्शः, श्रोत्रं, चक्षुरिति । रक्ष्यते च चतुर्भिः क्रोधांशैः संवत्सररुद्रपालकसूर्यैः तत्र प्रथमं सर्वपरिपालनार्थं भूभाररूपान् शत्रूनत्युत्कटान् प्रथमं मारयतीत्याह । **कालेति** । त्रयो ह्युद्धृताः स्वयमागत्य भक्तद्रोहं कृतवन्त इति तान् हतवान् । तत्रं कालमागधौ मथुरापुरनिरोधकौ । शाल्वो द्वारकाया निरोधकः । कालः कालयवनः मागधो जरासन्धः । कालस्य प्रथमत उपादानमग्रे जरासन्धवधात् । आदिशब्दस्त्रिष्वपि संबध्यते । तेन ससमूहास्ते त्रय एवोक्ता भवन्ति तामसादिगणाध्यक्षाः । अनीकैरिति सेनानां रोधे करणत्वम् । अनेन तज्जयस्य दुर्लभता वा सूचिता । तथाप्यजीघनत् । **स्वयमिति** । भिन्नतया स्वोद्योगे, नतु तदुद्योगे । **स्वपुंसां** मुचुकुन्दभीमप्रद्युम्नबलभद्रादीनां तेज आदिशत् । अनेन प्रतिष्ठार्थं तान्मारकत्वेनोपस्थापितवान् । ते हि मार्गत्रयस्थाः लौकिकादिप्रकारेण ब्राह्मणब्रह्मशिवप्रपन्ना भक्तकामनाविक्षेपका भवन्ति । तन्निवारको भगवान् त्रिमूर्तिरपि त्रिविधकामनियन्ता ।।१०।।

व्याख्या—इन्द्रिय[1], स्पर्श[2], कान और नेत्र, ये चार बाहर की इन्द्रियां हैं ? वे काम को उत्पन्न करने वाली हैं और संवत्सर[3] रुद्र, पालक तथा सूर्य ये चार क्रोध के अंश उनके रक्षक हैं ।।१०।।

व्याख्या—क्रोधलीला में प्रथम जो कार्य किया वह इस श्लोक में कहते हैं कि सर्व पालनार्थ, भू-भार रूप उत्कट शत्रुओं का नाश करते हैं । तीनों ही प्रसिद्ध शत्रुओं ने स्वयं आकर भक्तों का

१-ब्रह्मदेवता का इन्द्रिय २-त्वग् इन्द्रिय ३-कालपवन का नाशक मुचुकुन्द संवत्सरात्मक हैं मागध आदि को मारनेवाला रूद्रात्मक है । पाण्डवों के पालकरूप हैं और यादव तो सूर्य हैं यों आगे स्पष्ट होगा ।

द्रोह किया इसलिए उनको मारा, उनमें काल और मागध ने मथुरापुरी को घेरा और शाल्व, द्वारिका का निरोधक (घेरने वाला) बना। काल का तात्पर्य काल भवन है। मागध, जरासन्ध का नाम है, जरासन्ध को काल पवन के बाद मारा है इसलिए काल पवन का नाम पहले दिया है। आदि शब्द का तीनों से सम्बन्ध है। इससे तामसादि गणों के तीनों अध्यक्षों को समूह सहित कहा है, 'अनीकैः' सेनाओं का पद से तात्पर्य है कि घेरा डालने में साधन सेनाएं हैं, अथवा 'अनीकैः' बहुवचनान्त से यह सूचित किया है कि उनको जीतना कठिन है, तो भी भगवान् ने उनको मार डाला, 'स्वयं पद से यह सूचन किया है कि स्वयं भगवान् ने ही उनको मारा है, न कि उनके पुरुष-मुचुकुन्द, भीम प्रद्युम्न और बलभद्र आदि ने मारा है। क्योंकि भगवान् ने उन (अपने पुरुषों में) अपना जो तेज स्थापित किया उससे वे (शत्रु) मारे गए। उनमें तेज की स्थापना उनके (पुरुषों) के यश वा प्रसिद्धि के लिए की थी, जिससे लोक समझें कि इन्होंने मारे हैं, काल, मागध और शाल्व ये तीन प्रवाह, मर्यादा और पुष्टि में स्थित थे, कालयवन लौकिक (प्रवाह) प्रकार से ब्राह्मणों का भक्त था, मागध वेदानुसारी होने से मर्यादी था और शाल्व ने अनुग्रह से शिव की शरणली थी अतः पुष्टि था किन्तु भक्तों की कामनाओं में रुकावट डालने वाले थे, उन रुकावटों के निवारक भगवान् त्रिमूर्ति[1] सात्विकादि तीनों कामनाओं के नियामक हैं ॥१०॥

आभास—एवमुद्यतान् त्रिविधान् हत्वा स्वतोऽनुद्यतान् अन्यद्द्वारैव कांश्चिन्मारितवानित्याह—

आभासार्थ—इस प्रकार भक्त द्रोहार्थ उद्यत हुए तीनों को मारकर और स्वयं उद्यत न हुए थे उनमें से कितनों ही को दूसरों से मरवाया यों 'शम्बरं द्विविदं' श्लोक में कहते हैं—

श्लोक—**शम्बरं द्विविदं बाणं मुरं बल्वलमेव च ।**
अन्यांश्च दन्तवक्रादीनवधीत्कांश्च घातहन् ॥११॥

श्लोकार्थ—शम्बर, द्विविद, बाण, मुर, बल्वल और दन्तवक्त्र आदि अन्यों को दूसरों से नाश कराया और कितनों ही को आपने भी मारा ॥११॥

सुबोधिनी—शम्बरमिति। शम्बरः प्रद्युम्नेन मारितः। द्विविदो बलेन। बाणः, छिन्नभुजो भगवतैव कृतः। बल्वलोऽपि बलेनैव। दन्तवक्रादयो भगवतैव। आदिशब्देन विदूरथादयस्तत्पक्षपातिनः। एतान् कांश्चित् घातयन् कांश्चिदवधीत्। हस्तावुक्तौ। भगवदीयैर्भगवत्कर्तव्यं भगवदाज्ञया कर्तव्यमिति ॥११॥

---

[1] १—मुचुकुन्द, भीम और प्रद्युम्न।

व्याख्या—शम्बर का प्रद्युम्न[१] से, द्विविद को बलराम से बाण की भुजाऐं भगवान् ने काटी। बल्वल को बलराम से ही मरवाया, दन्त, वक्र आदि को स्वयं भगवान् ने मारा आदि पद उनके पक्षपाती विदूरथ आदि को भी आपने मारा, इन्होंने किनको मरवाया और किनको मारा, इससे हाथों का संस्कार किया, भगवान् के भक्तों को भगवदाज्ञा से ही भगवान् का कर्त्तव्य कार्य करना चाहिये ॥११॥

आभास—एवं दोषनिर्हारार्थमुद्यताननुतांश्च दैत्यान् हत्त्वा शस्त्रसंन्यासं विधाय भूमिभारं निराकृतवानित्याह–अथेति द्वाभ्याम्–

आभासार्थ—इसी तरह दोष दूर करने के लिए, भक्तद्रोहार्थ तत्पर हुए अथवा जो न हुए उन सब दैत्यों को मारकर भूमि का भार उतारा फिर शस्त्रों का त्याग कर दिया जिसका वर्णन निम्न दो श्लोकों में करते हैं—

श्लोक—**अथ ते भ्रातृपुत्राणां पक्षयोः पतितान् नृपान्।**
चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥१२॥

श्लोकार्थ—पश्चात् जिनकी घुसकर आती हुई सेना की कुरुक्षेत्र की भूमि काँपने लगी थी उस तेरे भाई के पूत्रों के पक्ष में आए हुए राजाओं को मरवाया ॥१२॥

कारिका—**भक्तानामेव यद्दुःखं दोषरूपं न्यवारयत्।**
भूमेस्तु देहेजो भारो न शस्त्रेण निवार्यते ॥१॥

कारिकार्थ—भक्तों को ही जो दोष रूप दुःख था उसका भगवान् ने स्वयं नाश किया किन्तु भूमि को जो राजाओं के सैन्यों की देह से जो कष्ट हुआ वह शस्त्र से नहीं उतारा जा सकता है ॥१॥

कारिका—**उत्तारितस्तु भू भारः कण्डूयां जनयेद्ध्रुवम्।**
ततस्तस्या निवृत्त्यर्थं नखरूपैर्हि पाण्डवैः ॥२॥

कारिकार्थ—उतरा हुआ भूमि का भार अवश्य खुजली पैदा करता है इससे उस (खुजली) को मिटाने के लिए नखों की आवश्यकता होती है शस्त्रों से वह नहीं मिटती है। अतः नख रूप पांडवों को आपने ही प्रयत्न कर, प्रेरणा की, जिससे उन्हों के द्वारा बाहर की खुजली स्वयं ही दूर कर दी ॥२॥

१—जरासन्ध की लायी हुई महती सेना, तीन कोटि म्लेच्छ सेना और अन्य दुष्टों का मथुरा के समीप मारने से शल्वादिकों का द्वारका के समीप डालने से, पौण्ड्रकादिका वहाँ ही मारने से आपने ही भार उतारा है—श्लोक में 'अथ' पद से मित्र प्रक्रम कहने का भाव इससे समझाया है।

कारिका—**प्रयत्नप्रेरितैर्बाह्यां स्वयमेव न्यवारयत् ।**
अन्तरन्यां च तामेव पूर्वस्पर्शसमुद्भवाम् ॥
कृमिकण्टकरूपां तां तन्नाशेनाऽवधीत्पुनः ॥३॥

कारिकार्थ—प्रथम स्पर्श से उत्पन्न हुई भीतर को कृमि कीट रूप, दूसरी खुजली, जिसका वर्णन १४ वें श्लोक में है, उसका नाश यदुकुल के नाश से किया ॥३॥

सुबोधिनी—अथेति । प्रक्रमान्तरे सारथ्यभावेन । ते भ्रातृपुत्राणां पाण्डवानां दुर्योधनादीनां च पक्षयोः सहाययोः पतितान् धर्ममनपेक्ष्य स्नेहाग्रह**भा**वेन पतितान् घातयन्निति पूर्वेण संबन्धः । तेषामाधिक्यमाह–**चचालेति** । कुरुक्षेत्ररूपा भूः । धर्मक्षेत्रे हि तेऽधर्मभावं प्रापिताः । चलनमधर्मात् ते सर्वेह्यधर्मैकनिष्ठा ज्ञातिघातिनः । अत एव येषां बलैर्भूश्चचालेति । देवेन्द्रकार्यं कृतवानित्यर्थः ॥१२॥

व्याख्या—'अथ' पद सारथि के अभाव से, प्रथक् प्रक्रम बताने के लिए दिया है, तुम्हारे भ्रातृपुत्र पाण्डव और दुर्योधनादि के पक्षों में जो धर्म की अपेक्षा न कर, स्नेह का ही आग्रह रखकर अधर्म के पक्ष में गिरे उन पतितों को मरवाए, इसका पूर्व श्लोक से सम्बन्ध है, उनकी अधिकता कहते हैं, कुरुक्षेत्र की भूमि काँपने लगी, क्योंकि वह भूमि धर्म का स्थान है, वहां अधर्म कार्य करने लगे, पृथ्वी के कांपने का कारण अधर्म है वे सबके बल अधर्म में ही निष्ठा वाले और ज्ञाति का घात करने वाले थे । इस कारण ही इनकी सैन्यों से पृथ्वी काँपने लगी, इस लीला से हस्त के देव इन्द्र का कार्य सिद्ध किया ॥१२॥

आभास—किञ्च । अप्रधानवधमुक्त्वा प्रधानवधमाह—

आभासार्थ—अब तक अमुख्यों (साधारणों) का वध कहा, अब मुख्य (दुर्योधन) का वध निम्न श्लोक में कहते हैं—

श्लोक—**सकर्णदुःशासनसौबलानां कुमन्त्रपाकेन हतश्रियायुषाम् ।**
सुयोधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननन्द पश्यन् ॥१३॥

श्लोकार्थ—दुर्योधन, कर्ण, दुःशासन तथा शकुनि की दुष्टमन्त्रणा (सलाह) के फलस्वरूप जिसकी लक्ष्मी एवं आयुष्य का नाश हुआ है, ऐसे, जिसने अन्य राजाओं का नाश कराया है, पृथ्वी पर हुए टूटी जाँघोंवाले दुर्योधन को अनुचरों के साथ देखकर भगवान् सन्तुष्ट न हुए ॥१३॥

सुबोधिनी—सकर्णदुःशासनेति । ननु जीवनादृष्टे विद्यमाने कथं सर्वे संभूय मृताः । नह्येकमदृष्टं सर्वेषामित्याशङ्क्य दुर्योधनपक्षपातेनैव सर्वेषामायुः क्षीणमित्याह–सकर्णो दुर्योधनः कर्णसहितः । दुःशासनो भ्राता । सौबलिः शकुनिर्मातुलः । एते चत्वारो दुष्टा; एतेषां कुमन्त्रस्य यः

परिपाकस्तत्कुमन्त्रे ये स्थिताः, तेषां श्रीः, आयुश्च पाकेनैव हतमित्याह—**हतेति** हता श्रीरायुश्च येषामिति । येषामिति विशेषणम् । दुर्योधनमपि हतवानिति संबन्धः । अनुचरसहितो भग्नोरुः शयानः पश्यतिकर्म । एवं सर्वं कार्यं कृत्वापि भारनिवृत्तये समागतो निवर्तकैर्भारं जनयन् पूर्वंभारं दूरीकृत्यापि न ननन्द सन्तोषं न कृतवान् । स्पर्शरूपता निरूपिता । भगवदीयानां स्पर्शनेन्द्रियं ज्ञानहेतुरेव न सुखहेतुरिति ॥१३॥

व्याख्या—जब जीने का अदृष्ट था तो सब इकठ्ठे एक ही समय में कैसे मरे ? सबका प्रारम्भ एक सम न होगा ? इस शंका का उत्तर देते हैं कि, दुर्योधन के पक्षपात करने से सबकी आयु क्षीण हो गई थी । कर्ण सहित दुर्योधन, दुःशासन भ्राता था, शकुनि मामा था ये चारों दुष्ट थे । इनकी कुमन्त्रणा का जो फल यह हुआ, जो इस कुमन्त्रणा में शामिल थे उनकी आयु तथा श्री समाप्त हो गई, दुर्योधन भी मारा गया, टूटी हुई जाँघ वाले अनुचर सहित सोया[1] हुआ देखा गया, यों सर्व कार्य करते हुए भी भार को उतारने के लिए प्रकट हुए भगवान् सन्तुष्ट नहीं हुए, क्योंकि जिनके द्वारा भार उतरवाया था वह भार अब पृथ्वी पर था, भगवदियों की स्पर्श करने वाली इन्द्रियाँ ज्ञान ही उत्पन्न करती है किन्तु सुख उत्पन्न नहीं करती है । यों स्पर्श रूपता का निरूपण किया ॥१३॥

आभास—द्वितीयं भारं दूरीकर्तुमनन्दनमेवाऽऽह—

आभासार्थ—अन्यभार दूर करने के लिए 'कियान्' श्लोक में भगवान् की प्रसन्नता ही कहते हैं—

श्लोक—**कियान् भुवोऽयं क्षपितोरुभारो यद्द्रोणभीष्माजुनभीममूलैः ।**
अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम् ॥१४॥

श्लोकार्थ—द्रोण, भीष्म, अर्जुन और भीमसेन जिनमें मुख्य हैं ऐसे मेरे अंशों ने भूमि पर जो अठारह अक्षौहिणी सेना का भार था वह उतार दिया, किन्तु वह कितना बड़ा भार था ? मेरे अंश रूप यादवों के सैन्य का इतना बड़ा भार है, जिसके स्वल्प को भी कोई सहन नही कर सकता है ॥१४॥

सुबोधिनी—**कियानिति** । क्षुद्रनिराकरणार्थं क्षुद्रग्रामे यदि महाराजः समायाति तदा तत्सेनयैव ग्रामो नश्यति । तत्रत्यः क्षुद्रस्वल्पमेव नाशयति, सैनिकास्तु सर्वमिति न्यायेनाऽऽह—**भुवः कियान् वा भारो मया क्षपितः मदंशैः** करणैर्दूरीकृतः । तानंशानाह—**यद्द्रोणभीष्मार्जुनभीममूलैरिति** । द्वयं द्वयमुभयत्र । तेषां मूलभूतैः स्वतेजोभिरेव । एवं चतुर्विधैरपि तेजोभिश्चतुरङ्गसेनारूपोऽष्टादशाक्षौहिणिकस्तावदक्षौहिणीभिर्जातो भारो यस्मात । दूरीकृतस्ततोऽप्यधिको भारोऽस्तीत्याह—**आस्ते**

---

[1]—यह 'पश्यन्' का कर्म है ।

बलमिति । अधिकत्वे हेतुः–**दर्विषहमिति** केनापि सोढुमशक्यम् । दुर्विषहत्वे हेतुः–**मदंशैरिति** । सर्वस्यापि भगवदंशत्वेऽपि यदूनां संबन्धिभिर्मदंशैरिति भक्तपक्षपातादनिवार्यत्वं निरूपितम् । वायुरत्र बलाधिष्ठाता भगवत्संबन्धिनीमेव स्पर्शबुद्धि जनयति तत्र सुखं पूर्णम्, न तेन परिच्छिन्नेन ग्रहीतुं शक्यत इति परिच्छिन्नतुल्यतया ज्ञानं न भगवदभिप्रेतमिति स्पर्शदेवतानिर्णयः ।।१४।।

व्याख्या—क्षुद्रों (तुच्छों) के निराकरण के लिए उन के गाँव में यदि महाराज आता है तो उसकी सेना से ही गाँव का नाश हो जाता है, वहाँ के रहने वाले क्षुद्र तो बहुत थोड़ा ही नाश करते हैं सैनिक तो सबका ही नाश करते हैं, इस न्यायानुसार कहते हैं कि 'भुवः कियान् वा भारो माया क्षपितः यन्दशैः करणैर्दूरीकृतः' साधन रूप मेरे अंशों द्वारा मैंने पृथ्वी का कितना भार उतारा ? उन अंशों, मुख्यों के नाम कहते हैं कि जिनमें द्रोण, भीष्म, अर्जुन और भीम जिनमें मुख्य हैं । दोनों सेनाओं में दो–दो मुख्य थे, उनके मूलभूत और अपने तेजों से ही कितना भार उतारा ? इस प्रकार चार प्रकार के तेजों से चतुरंग सेनारूप अठारह अक्षौहिणियों से हुए भार को दूर किया, किन्तु अब तक उससे भी अधिक भार भूमि पर विद्यमान है । 'आस्ते वलं' पद से कहा है, वह अधिक है जिसमें करण 'दुर्विषहं' उस भार के बोझ को कोई भी सहन नहीं कर सकता है, उनके असह्यबल का कारण यह है कि वे यादव, मेरे संबंध वाले अंशों से युक्त हैं, अन्य सब मेरे साधारण अंशवाले हैं, वे यादव भगवद्भक्त हैं अतः उनमें ऐसा अंश स्थापित किया है कि जिससे उनके बल का बोझ कोई सहन न कर सके, इससे भक्तों का पक्षपात दिखाया है । यहाँ वायु बल का अधिष्ठाता है । भगवत्संबन्धी ही स्पर्श बुद्धि उत्पन्न करता है, उसमें (भगवान् में) पूर्ण सुख है, इससे परिच्छन्न उसको ग्रहण नहीं कर सकते हैं । परिच्छन्न की समानता वाला ज्ञान, भगवदभिप्रेत नहीं है । यों स्पर्श देवता का निर्णय कहा है ।।१४।।

आभास––तस्याऽपि भारस्य निवृत्त्युपमाह–

आभासार्थ—उस भार के भी उतारने का उपाय 'मिथो यदेषाम्' श्लोक में कहते हैं—

श्लोक––**मिथो यदेषां भविता विवादो माध्व्या मदाताम्रविलोचनानाम् ।**
नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं स्म ।।२।।

श्लोकार्थ––इनके वध का उपाय इतना ही है कि ये मदिरा के मद से लाल नेत्र वाले होकर अर्थात् नशे से उन्माद दशा में आकर परस्पर वाद करते हुए लड़े, अन्य कोई उपाय नहीं है । किन्तु दूसरा उपाय यह है कि मैं उद्यत हो जाऊं, जिससे ये स्वतः स्वयं नाश हो जावे ।।१५।।

सुबोधिनी—**मिथो यदेषामिति** । यत् यदा एषां यादवानां मिथो विवादो भविता । सोऽपि विवादो विवेकरहितो मौढ्यान्नाशपर्यवसायी जात इत्यभिप्रायेणाऽऽह–**मध्व्या मदा ताम्रविलोचनानामिति** । माध्वी मदिरा बहुपानसिद्ध्यर्थं मधुररसां तामुक्तवान् । तया यो मदः गर्वो देहविवेकादिविस्मरणात्मकः । तेन आताम्राणि विलोचनानि येषाम् । नन्वन्योन्यघातेन मदिरया निषिद्ध-

मरणेन च भ(ग) वत्सहायार्थमागतानां भ(ग) वदीयानामयुक्ततेत्याशङ्क्य प्रकारान्तराभावादेवं क्रियत इति आह–**नैषां वधोपाय इयानतोऽन्य इति**। एषामियानेव वधोपायो नत्वन्यः। तत्र हेतुमाह–**मय्युद्यत इति** । अन्यस्तूपायः सांशे मय्युद्यते स्वयमेवान्तर्दधते । न हि सूर्याणां निराकरणं तमसा भवति। तुल्यात्वाच्च नैकेन। स्मेति प्रसिद्धे। यदा यदा यादवनाशार्थं मागधादयः प्रवृत्ताः, तदाऽहमुद्यतस्तान् हन्तुम् । तदा मयि ऊद्यते, अन्ये उपाया अन्तर्दधते। ननुकेयं भगवतो लीला यत्स्वकीयान् सेवकान् स्वसङ्गे समागतान् अनन्यशरणान् स्वयमेवमन्यायेन नष्टान् करोतीति। उच्यते, सर्गार्थमेवमिति । स्वात्मना सह च तुल्यता, अतो नात्यन्तभक्ति–विरोधः । स्वतस्तेषामाविर्भावसामर्थ्याभावात् माययैव आविर्भावतिरोभावौ । खेदाभावाय तथावस्था । उत्पत्तिलीलार्थमिति न लीला–विरोधः। यथाऽस्य सर्गहेतुत्वं तथाऽग्रे वक्ष्यते। न च तेषां दुर्गतिः । मुक्तोवतदर्थमेवोक्तत्वात् सर्गादौ मुक्त्यन्ते चोक्तत्वात्। सर्वत्र तान् विना नाश्रयो निरूपयितुं शक्य इति सूचितम् । तस्मात्स्वाविर्भावे तेषामाविर्भावं कारयन्, स्वतिरोभावे च तांस्तिरो भावयन् स्वसमानान् करोतीति न भक्तेषु कापि तिरस्कारलीला । एवंविसर्गो निरूपितः ॥१५॥

व्याख्या—यदि इन यादवों में परस्पर मूर्खतापूर्ण ऐसा कलह हो जिससे उनके विवेक का नाश हो जावे, यह ही इनके वध का उपाय है। यों कैसे होगा ? जिसका उपाय बताते हैं, मधुर रस वाली (माध्वी) मदिरा बहुत पी जा सकती है, ये भी जब वह विशेष पियेंगे तब उनके नशे से लाल नेत्र वाले दो विवेक को भूल जाएंगे, तो अहंकाराविष्ट दशा में परस्पर विवाद करते हुए आपस में लड़कर एक दूसरे को मारकर नष्ट हो जाएंगे, जो भगवदीय यादव, भगवान् की सहायता करने के लिए आए हैं उनका इस प्रकार मदिरा से मदान्ध बन आपस में लड़कर मरना तो उचित नहीं है, इस शंका के निवारणार्थ ही कहा है कि इसके सिवाय इनके मरने का उपाय अन्य है ही नही। जिसका कारण कहते हैं मय्युद्यतेऽन्तर्दधते स्वयं स्म' दूसरा उपाय तो, मेरे अंशों में उद्यत होने पर स्वयं नष्ट हो जाता है अन्धकार सूर्यों का निराकरण नहीं कर सकता है। यही दोनों समान होते हैं तो कोई किसी को नाश नही कर सकता है 'स्म' पद प्रसिद्धि अर्थ में है, जब जब यादवों के नाशार्थ जरासन्धादि प्रवृत हुए तब मैं भी उनको मारने के लिये उद्यत हो गया। तब मेरे उद्यत होते ही उनके मरने के उपाय तिरोहित हो गए। अतः यह ही इनके नाश का उपाय बचा है।

सुबोधिनी—भगवानिति । अनैश्वर्यतिरोभावे हेतुः । स्वस्य य आत्मा चिदंशः, तस्यं मायाया **गतिं** प्रवृत्तिं कार्यं करणमिति यावत् । **तां** पूर्वोक्ताम् । **अवलोक्ये**त्युत्तरत्र साधनम् । **स** इति तदर्थं प्रवृत्तः । अनैश्वर्यतिरोभावो द्वयेन भवति, वेदैर्वैष्णवैश्च । तदुभयं कृतवानित्याह–**सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशदिति** । सरस्वती वेदात्मिका, सैव नदी तदुपस्पर्शनं स्नानम् । अनेन वेदेषु स्वात्मानं स्थापितवानित्युक्तम् । द्वितीयमाह–**वृक्षमूलमिति । 'वैष्णवा वै वनस्पतयः'** इति श्रुतेः । तस्य मूल येन रूपेण विष्णुना ते जनितास्तद्बीजात्मकं मूलम् । तत्र विष्णौ बीजात्मकेऽर्थांशं स्थापितवानित्यर्थः । एवमैश्वर्यादिगुणानेकत्र, स्वरूपं चैकत्र स्थापयित्वा आश्रयाभावेनाऽनैश्वर्यं निराकृतवानित्यर्थः । ननु भगवान् बीजे किमिति स्थापितवान् ? बैकुण्ठे हि स्थापनीयम् । तत्राऽऽह–**उपाविशदिति** । उष समीपे वैकुण्ठे स्थितेन सर्गलीलाकर्तुमशक्या, अतस्तत्समीप एव **आ** सर्वतः सर्वभावेन तत्र प्रविष्टः सृष्टयर्थम् । एतदर्थमेव प्रथमत इयं कथा कथिता यथा भगवान् ऐश्वर्येण बीजे प्रविशति । अयमेव चाऽधिकारः । माहात्म्यम्, (स्व) रूपम्, लीला, विषयः, चरित्रम्, इन्द्रियाणि, स्वांशेन कारणप्रवेशः, बुद्धिरिति बीजरूपोऽयं सर्गः । विष्णोर्जाता वैष्णवाः विष्णोरिमे इति च । अतो भगवान् स्वयं बृक्षमूले उपविश्य सृष्टिकारणबीजगुपपाद्य मोक्षकारणबीजमप्युपवादयितुं वैष्णवमुद्धवं पूर्वमेव विचारितवान् । नयसु लीलासु प्रथमा मया कर्तव्या, अन्तिमा त्वनेन, मध्यमास्तु कालदिभिरिति । उद्धवस्य च कामना **'स्वधाम नय मामपि'**

इति । तद्यदा यत्र तिष्ठति तत् स्वधाम । इदानीं बीजात्मके कारणरूपे विष्णौ स्वयं स्थितः । तं च कारणरूपे अमृतदर्यात्मकबदर्यामानन्दानभवार्थ मोक्षैकसाधनतपः संनिधाने तिष्ठत्विति विचारितवान् ॥३॥

व्याख्या—श्री कृष्ण ने अपने में अनैश्वर्य का (माया मनुष्य रूप का) तिरोभाव करना चाहा, जिसका कारण दिखाने के लिए कहा है कि वे (भगवान) हैं षड्गुण संयुक्त विभु प्रभु होने मे सर्व करने में समर्थ हैं । अपने चिदंश आत्मा की व्यामोहिका माया का कार्य देकखर अर्थात मद्यपान से विपरीत बुद्धि होने से परस्पर संघर्ष कर वेणुवत नाश होना देखकर अपने अनैश्वर्य के तिरोभाव की लीला करने की इच्छा की ।

अनैश्वर्य का तिरोभाव दो प्रकार से होता है ?—वेदौं से २ वैष्णवों से, वे दोनों साधन करने लगे 'सरस्वती उपस्प्रश्य बृक्षमूलमुपाविशत्' सरस्वती वेदरूपा नदी है । उसमें स्नान कर दिखाया कि अपनी आत्मा को वेदों में स्थापित किया है ।

२-बृक्ष की मूल में विराजे, इससे सूचित किया है कि 'वैष्णवा वैवनस्पतयः' इस श्रुत्यनुसार वृक्षादि लता पताकाऐं सर्व वैष्णव हैं । जिस रूप से विष्णु ने पैदा किए उनकी बीज रूप मूल (जड़) है अतः बीज रूप विष्णु में अर्थांश को स्थापित किया इसी तरह ऐश्वर्यादि गुणों को एक स्थान पर और स्वरूप को दूसरे स्थान पर स्थापित करने से अनैश्वर्य का कोई आश्रय नहीं रहा जिससे उसका स्वतः निराकरण हो गया ।

भगवान् ने इनको बीज में क्यो स्थापित किया ? वैकुण्ठ में स्थापित करना चाहिए था । इस शंका का निराकरण 'उपविशत्' पद से किया है जिसका आशय यह है कि बैकुण्ठ दूर है । वहाँ स्थापित करने से 'सर्गलीला' करने में परिश्रम वा वह कार्य अशक्य होता । अतः यहां बीज में स्थापित इसलिए कि फिर सर्ग करने के समय देरी व श्रम न हो, इसलिए ही पहले यह कथा कही है जैसे भगवान् बीज में प्रविष्ट होते हैं । यह (बुद्धि में स्थित) ही अधिकार है ।

माहात्म्य, रूप, लीला, विषय, चरित्र, इन्द्रियां अपने अंश से कारण में प्रवेश और बुद्धि यह सर्व बीजरूप सर्ग हैं ।

जो विष्णु से उत्पन्न हैं वे वैष्णव हैं । और जो विष्णु के ये सेवकादि हैं वे भी वैष्णव हैं ।

अतः भगवान् स्वयं वृक्षमूल में विराजमान् होके, सृष्टि के कारणरूप बीज को और मोक्ष कारण रूप बीज को उत्पन्न करने के लिए पहले ही उद्धवजी को ध्यान में रखा था । नव लीलाओं में से पहली मुझे (भगवान् को) करनी चाहिए, अन्तिम इसको (उद्धव को) तथा बीच की लिलाऐं कालादि करते रहेंगे ।

उद्धवजी की कामना थी कि 'मुझे भी स्वधाम ले चलो ।' यह शंका कि उद्धव को क्यों नहीं ले गए ? जिसका उत्तर है कि जहां आप (भगवान्) विराजते हैं वह स्वधाम (भगवान् का धाम) ही है । अब बीजात्मक कारण रूप विष्णु में आप विराजमान हुए हैं ।

उद्धवजी भी कारण रूप अमृत की गुफारूप बदरीकाश्रम में आनन्द के अनुभवार्थ मोक्ष का एक ही साधन रूप तप है जो वहां सुलभ (समीप) ही है। वहां उद्धवजी रहे। यों भगवान् ने विचारा है ॥३॥

आभास—तस्याऽपि पूर्वस्थितिविनाश एव भवतीति, विनाशस्थाने प्रभासे समागच्छत्विति चेच्छां कृतवान्। अतो द्वितीयं बीजं निरूपयन् निश्चयरूपां बुद्धिमेकोनविंशतिश्लोकैराह। अष्टादशविद्यास्थानातिक्रमे हि बुद्धिर्निश्चयमवलम्बते। तत्र सप्ताऽङ्गानि मीमाँसया सहितानि, द्वादशात्मा स्वतन्त्रतया प्रकाशकत्वात्। अनेनैव पूर्वावस्था गच्छतीति ज्ञापितम्। मुक्तौ तु कारणस्याऽवक्तव्यत्वादिमामेव लीलामन्यथोक्तवान्। बीजात् फले विस्तारो भवतीति च। अतः प्रथमं भगवदुक्तमाह—

आभासार्थ उसकी भी प्रथम स्थिति का नाश होने वाला है इसलिए विनाश स्थान प्रभास में आवे एसी इच्छा की। अतः द्वितीय बीज का निरूपण करते हुए निश्चयात्मिका बुद्धि का वर्णन उन्नीस श्लोक से करते हैं। अष्टादश विद्या के अतिक्रमण करने के बाद ही बुद्धिनिश्चित होती है। मीमाँसा सहित वेद के अङ्ग स्वतन्त्रता से प्रकाश देने वाला द्वादशात्मक सूर्य, इससे ही प्रथम अवस्था का नाश होता है। मुक्ति में तो कारण कहा नहीं जा सकता है। इस ही लीला को अन्य प्रकार से कहा है जैसे बीज से ही फल में विस्तार होता है। अतः पहले उद्धवजी वह कह बताते हैं जो भगवान् ने उनको कहा।

श्लोक—अहं चोक्तो भगवता प्रपन्नार्त्तिहरेण ह।
बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥४॥

श्लोकार्थ—शरणागतों की आर्ति देखने वाले और अपने कुल को साथ ले जाने वाले प्रभु ने मुझे कहा कि तुम शीघ्र बदरी को जाओ ॥४॥

सुबोधिनी—अहं चोक्त इति। स्वकोया अन्येऽपि प्रभासगमनार्थं मुक्ताः, अहं चोक्तः **बदरी त्वं प्रयाहीति**। चकारात् प्रभासे गत्वेति हृदयम्। **भगवतेति** कार्यसिद्धयावश्यकता तद्वाक्ये सूचिता। ननु किमित्येवमुक्तवानित्याशङ्क्याऽऽह—**प्रपन्नार्तिहरेणेति**। प्रपन्नानामार्ति सर्वक्लेशं सृष्टौ सर्वैश्वर्यदानेन दूरीकरिष्यामीति तथोक्तवान्। हेत्याश्चर्यम्, विपरीतेन साधनेन साध्यमिति। बदर्यप्यरण्यात्मिका, फलार्थममृतरूपा च। वस्याऽमृतस्य दरी बदरीति। **त्वं प्रयाहीति** विशेषतया निर्दिष्टम्। प्रकर्षेण गमनं पदार्थाविस्मरणात्। अन्यत्तु, **स्वकुलं** स्वसमूहः। ते सृष्टावेवोपयुज्यन्ते अतः स्वार्थं सम्यक् जिहीर्षुः, अन्यथा अनन्तविधा सृष्टिर्न स्यात् ॥४॥

व्याख्या—जो दूसरे अपने थे, उनको कहा कि प्रभास जाओ, केवल मुझे कहा कि तू बदरी जल्दी जा। किन्तु श्लोक में 'च' पद का आशय है कि प्रभास होकर पश्चात बदरी जा। 'भगवता' पद से यह समझाया है कि आपके इस प्रकार के वाक्यों से कार्य सिद्धि अवश्य होगी। इस प्रकार

की आज्ञा उद्धव को क्यों दी ? इसके उत्तर में उद्धव कहता है कि जाप शरणागतों के दुःखों को हरने वाले हैं अतः सृष्टि में सब प्रकार के ऐश्वर्य देकर शरणागतों के सर्व क्लेशों को हरूंगा। इस आज्ञा से इस प्रकार की सूचना दी है। 'ह' पद से आश्चर्य प्रदर्शित किया है क्योंकि विरुद्ध साधनों से साध्य सिद्ध करना है। 'वदरी' 'आरण्यरूप'[1] है किन्तु फलार्थ अमृतरूप है। कारण कि 'बदरी' शब्द का अर्थ है 'अमृत की दरी (गुफा)' वहां तू शीघ्र जा, जल्दी कहने का आशय है कि 'वदरी' पद का यौगिक भावार्थ उसको भूल न जाओ, अपने कुल जो सृष्टि में उपयोग में आते हैं उनको अपने साथ ले जाने की इच्छा वाले। अन्यथा अनन्त प्रकार की सृष्टि न हो सके ।।४।।

आभास—यद्यपि भगवता मुखत एवमुक्तम्, तथापि प्रभासे समागत्य गन्तव्यमिति हृदयाभिप्रायः। अन्यथा पूर्वावस्थापरित्यागो न स्यात्। तदाह—

आभासार्थ—हालाँ कि भगवान् ने मुख से यों कहा कि बदरी जाओ तोभी हृदय का अभिप्राय था कि प्रभास हो के फिर बदरी जल्दी जा, क्योंकि वहां जाने से पूर्वावस्था का त्याग न हो सकेगा। वह इस निम्न श्लोक में कहते हैं।

श्लोक—**अथापि तदभिप्रेतं जानन्नहमरिन्दम !।**
पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ।।५।।

श्लोकार्थ—तो भी हे शत्रुदमन ! उनका अभिप्राय जानने वाला मैं स्वामी के चरणों में पृथक् होने से उनके पीछे जाने लगा ।।५।।

सुबोधिनी—अथापीति। तदभिप्रेतं पूर्वोक्तम्। **जानन्नहमिति** उपदेशज्ञानेन सर्वज्ञताया जातत्वात्। भगवत्कृपया तदपि ज्ञातम्, परं मयैव। **अरिन्दमेति**। संबोधनमभिप्रायज्ञानार्थम्। राजनीतावपि प्रभोरभिप्रेतमपि कर्तव्यम्, नैतावता वाक्योल्लङ्घनम्। तथापि सह न गतम्, प्रथमतयैव बदरीकाश्रमयात्रा कृता। गिरिदुर्गपर्यन्तं समागत्य पश्चात्प्रभासं गत इति लक्ष्यते। अभिप्रायस्य सन्देहेऽपि पूर्वावस्थाया विद्यमानत्वात् स्नेहादपि गत इत्याह–पादयोर्विश्लेषणं वियोगः, पूर्वावस्थाया वा परित्यागः, तत्राऽहमक्षमः ।।५।।

व्याख्या—उनके मन का अभिप्राय जो प्रथम कहा वह जान लिया था। कैसे जाना ? इस प्रश्न के उत्तर में कहते हैं कि भगवदुपदेश से प्राप्त ज्ञान से मेरे में सर्वज्ञता उत्पन्न हुई जिससे यों जान लिया एवं भगवत्कृपा भी इस ज्ञान के होने में कारण है। किन्तु मैं ने ही यह जाना, हे अरिन्दय ! यह सम्बोधन विदुर को यह ज्ञान हो इसलिए दिया है राजनीति के अनुसार भी स्वामी के हार्दिक अभिप्रायानुसार कर्त्तव्य करना सेवक का धर्म है, इससे मौखिक आज्ञा का उल्लंघन नहीं होता है।

---

[1] —अरश्वह वैण्यश्चदार्णवौ ब्रह्म लोके इति श्रुतेः, स्मृति में भी कहते हैं कि ब्रह्म लोक में अमृत समुद्र एवं सागर दोनों हैं अतः बदरी अरण्य ब्रह्म लोकात्मक है।

तो भी प्रभु के साथ न गया, पहले ही बदरीकाश्रम की यात्रा की विदुरजी गिरनार तक साथ आकर पश्चात् प्रभास गया यों जाना जाता है।

भगवान् के अभिप्राय में सन्देह होने पर भी पूर्वावस्था के विद्यमान (मौजूद) होने से स्नेह भी गया। यों कहते हैं कि प्रभु के चरणों का वियोग अथवा पूर्वावस्था (प्रेम) का त्याग दोनों का होना आवश्यक है, जिससे मैं (विदुर) प्रभास गया ॥५॥

आभास—अभिप्रेतोऽर्थस्तर्कितोऽपि प्रमितो जात इत्याह—

आभासार्थ—यद्यपि (हालांकि) इच्छित विषय का केवल विचार ही किया था तो भी वह सचमुच हो गया। यह निम्न श्लोक में कहते हैं।

श्लोक—**अद्राक्षमेकमासीनं विचिन्वन् दयितं पतिम्।**
श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् ॥६॥

श्लोकार्थ—ढूँढ़ते हुए मैंने सरस्वती के किनारे पर बिराजमान केतन रहित, लक्ष्मी के धाम रूप प्रिय स्वामी को अकेले बैठा हुआ देखा ॥६॥

सुबोधिनी—**अद्राक्षमिति**। तदा भगवत ऐश्वर्यस्य प्रादुर्भूतत्वात् षोडशाऽपि कलास्तदा भगवति दृष्टाः। स पूर्णो भवति। **अतोऽत्र** भगवतः षोडश विशेषणानि। एतान्येव गुणोपसंयारे षोडशाधिकरण्या प्रतिपादितानि। एवं सर्वार्थस्य सर्वगुणविशिष्टस्य साक्षात्कारो जात इत्यद्राक्षमित्युक्तम्, ब्रह्मसाक्षात्कारादेव पूर्वावस्थापरित्यागात्। तत्र प्रथमं भगवतोऽयमसाधारणो गुणः–यत्सर्वप्रपञ्चातीतः सर्वमुपसंहृत्य एको भवति, कारणरूपश्च भवति। किञ्च। भगवानासीनो भवति सर्वत्रैव, विशेषतो वैष्णवानां समीपे। अव्यग्रत्वाय चोक्तम्, कार्याभावात्। उपविष्ट एव हि सृष्टिं करोतीति च ज्ञापितम्। अनेन लोकेष्ववयवोपसंहारश्च ज्ञापितः। भगवतोऽपि दर्शनं भगवदिच्छयैव जातमित्याह–**विचिन्वन्निति**। सर्वत्र सरस्वतीतीरे गरुडध्वजादिरथान्वेषणेन क्वाऽस्तीति विचारयन् यत्रोपविष्टः स्थितस्तत्र दृष्ट इत्यर्थः। अनेन विचारदशायां सर्वभूतस्थितमेकमेव विचारयेत्। तदनन्तरं स प्रियत्वेनाऽऽत्मत्वेन पर्यवस्यति, ततोऽपि ब्रह्मवित्त्वे ब्रह्मात्मभावे जाते पतित्वेन पर्यवस्यति, अक्षरस्यापि पुरुषोत्तमः पतिरिति। एवं चतूरूपं प्रमेये निरूपितम्, साधनफलभेदेन। प्रमाणे तस्य रूपत्रयमाह–अर्थशब्दफलानां तत्र प्राधान्यात्। तत्रार्थः **श्रीनिकेतः** अनेन प्रपञ्चयज्ञसौभाग्यैर्युक्त इत्युक्तः। **सरस्वत्यां कृतकेतमिति** वेदैकसमधिगम्यता। **अकेतनमिति** फलम्। सर्वाश्रयराहित्येन स्वरूपस्थित इति, स्वरूपे तादृशस्यैवोक्तत्वात्। श्रीवत्से लक्ष्मीश्चाऽत्रोपविष्टा दृष्टा। सरस्वतीतीरे च शुद्धे उददेशनार्थं स्थितो दृष्टः। अनाश्रितत्वेन सर्वे हेतुवादा विरोधाश्च परिहृताः, गृहरथासनाद्यभावश्च। एवमेकेन प्रमाणप्रमेयनिर्णयः। चतुर्मूर्तिस्त्रिमूर्तिश्चोक्तः। एकः सङ्कर्षणः, आसीनो वासुदेवः, दयितः प्रद्युम्नः पतिरनिरुद्ध इति। श्रीनिकेतो विष्णुः, इतरौ ब्रह्मशिवौ ॥६॥

व्याख्या—उस समय भगवान् का ऐश्वर्य पूर्णतः प्रकट हुआ था जिससे मैंने भगवान् के स्वरूप में षोडश १६ कलाओं का दर्शन किया । वह पूर्ण थे इस कारण से यहां भगवान् के सोलह विशेषण दिए हैं । ये सोलह विशेषण (गुण) व्यास सूत्रों के तृतीयाध्याय तीसरेपाद (गुणोपसंहार) में षोड़शाधिकरणों से प्रतिपादन किए हैं—

इसी तरह सर्वगुण विशिष्ट (फलरूप) भगवान् के मैंने साक्षात्कार दर्शन किए जो भगवान् सर्व का उपसंहार कर सर्व प्रपंचातीत होने से 'एक' हो के विराजे हैं । वे ही कारण रूप हैं और विशेष यह है कि भगवान् सर्वत्र ही बैठे हुए हैं विशेष रूप से वैष्णवों के समीप उस समय व्यग्रता नहीं थी क्योंकि कोई कार्य नहीं था । इससे यह भी सूचित किया है कि मैं यों बैठे बैठे ही सृष्टि कर देता हूँ इससे श्लोकों में अवयवों का उपसंहार (छिपाने) का सूचन किया है । भगवान् के दर्शन भी भगवदिच्छा से हुए हैं, क्योंकि सर्वत्र गरुड़ध्वज वाले रथ को ढूंढ़ा कि वह कहां है ? किन्तु देखने में नहीं आया, अन्त में भगवत्कृपा हुई, उनको इच्छा से जहां विराजे थे वहां आ गया और दशन किए इससे यह जताया है कि जब भगवान् का विचार (चिंतन) किया जाए तब सर्वभूतों में स्थित उस एक का ही चिन्तन करें । जबयों किया जाता है तब वह प्रियत्व और आत्मत्व से जाना जाता है अनन्तर वही ब्रह्मात्मभाव वाला हो जाता है । ऐसी परिस्थिति के बाद ही वह पति रूप से अन्तः करण में विराजता है वह ही फलरूप आत्मा सर्व प्रकार असीम आनन्द रसपान कराता है, कारण कि अगणितानन्द अक्षर ब्रह्म का भी वह पुरुषोत्तम पति है ।

इस तरह प्रमेय में चतुरूप प्रभु ने कहे, साधन और फल के भेद से प्रमाण में उसके तीन रूप हैं । वे कहते हैं वहां अर्थ शब्द और फल की प्रधानता है इनसे ७ श्रीनिकेतनः पद से अर्थ कहा है और इससे भगवान् की प्रपंचरूप यज्ञ एवं सौभाग्य वाला कहा हैं । सरस्वती पर बैठक होने से यह सूचित किया है कि आप वेद से ही जाने व पाए जाते हैं । 'अकेतन' (जिसको किसी अन्य के आश्रय की आवश्यकता नहीं है) पद से बताया है कि यह ही फलरूप हैं । क्योंकि सर्वाश्रय रहित होने से स्वरूप में ही स्थित स्वरूप 'फलरूप' होती हैं ।

दर्शन के समय उद्धव जी ने श्री वत्साचिन्ह पर लक्ष्मी बैठी है ऐसा दर्शन किया । शुद्ध सरस्वती के तीर पर स्थित होने का कारण उपदेश देने के लिए स्थित होता है । किसी प्रकार का आश्रम आदि का आश्रय न लेने से यह सूचित किया है कि सर्व प्रकार हेतुवाद और विरोध आदि का परिहार कर लिया है । अतः गृह, रथ और आसनादि भी वहां नहीं थे । इस तरह एक ही श्लोक में प्रमाण और प्रमेय का निर्णय किया, जिससे चतुर्मूर्ति और त्रिमूर्ति बताई । एक होने से 'सङ्कर्षण' बैठने से 'वासुदेव' प्रिय होने से 'प्रद्युम्न' पति होने से 'अनिरुद्ध' रूप है । यों चार स्वरूप कहे हैं 'श्रीनिकेतन' पद से विष्णु कहा है, दूसरे दो ब्रह्मा और शिव कहे । जिसके ६-७ दो विशेषणों से ज्ञात होता है ।।६।।

आभास—एवं प्रमेयप्रमाणे निरूप्य फलरूपं भगवन्तं पञ्चरूपमाह—

आभासार्थ—इस प्रकार प्रमेय तथा प्रमाण रूप भगवान् का निरूपण कर, निम्न श्लोक में भगवान् के फलस्वरूप पाँच स्वरूपों का वर्णन करते हैं—

श्लोक—**श्यामावदातं विरजं प्रशान्तारुणलोचनम् ।**
दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च ।।७।।

श्लोकार्थ—श्याम और वही तेजस्वी, रजरहित, बिशेष शान्त और लाल नेत्र वाले चार भुजाओं और पीत रेशमी वस्त्र वाले प्रभु को देखा ।।७।।

सुबोधिनी—**श्यामावदातमिति** । श्यामश्चासाववदातश्चेति । मध्यन्दिनसवितृमण्डलमध्यसदृशवत् भासत इत्यर्थः । **आदित्यवर्णं तमसः परस्तात्**' इति श्रुतेः । अनेन सारूप्यरूपा मुक्तिरप्युक्ता भवति । **विरजं** निर्मलम्, व्यापिवैकुण्ठे रजोऽभावः अनेन सालोक्यमप्युक्तम्, उत्पादकसंस्कृतभूताभावश्च; तेन सालोक्येऽपि पुनरुत्पत्तिर्निवारिता । मुक्त्युपदेष्टारमेनं प्रति तथाविधमात्मानं प्रदर्शयति फलत्वाय । अनेन षोडशकलोऽयं मनोमयो वेदात्मा सूचितः । **प्रशान्तारुणलोचनमिति** । प्रकर्षेण शान्ते अरुणे लोचने यस्य । ज्ञानशक्तिक्रियाशक्ती लोचने यस्येत्युक्तम् । प्रकर्षः साधनसाहित्यम्, अनेन सार्ष्टिरुक्ता । समानैश्वर्यम् । इदमेव हि सामीप्यम्, ज्ञानक्रियाशक्तिमत्त्वस्यैव तथात्वात् । अनेन वेदार्थोऽप्येतावानेवाऽत्र प्रसिद्ध इति सूचितम् । **दोर्भिश्चतुर्भिर्विदितमिति** । **विदितं** ज्ञातम् । अनेन सायुज्यमुक्तम्, उभयोर्बाहुचतुष्टयं ज्ञापितमिव । अत्र यत् पदत्रयम्, क्रियया, भक्त्या, ज्ञानेन च सायुज्यं भवतीति ज्ञापयितुम् । **दोर्भिः** क्रियाभिः **चतुर्भिः** पादसेवनादिभिः । विशेषेण दितं यस्मादिति सर्वाज्ञाननिवर्तकं ज्ञानं कालनिवर्तकं वा, अन्यथा चतुर्भुजमित्येवोक्तं स्यात्, प्रकटचतुर्भुजार्थं वा । **पीतकौशाम्बरेण चेति** । पीतं कौशं कौशेयं यदम्बरम्, तेन च विदितम् अनेन ब्रह्मभावेऽपि ज्ञानमङ्गमिति तदेव विशेषणमाह—**पीतमिति**, अहन्ताममताभावः । **कौशमिति** कुशसंबन्धिनो यमनियमादयः । **अम्बरमिति** अवस्थात्रयपरित्यागेन निर्लेपता । एतानि ब्रह्मभावे ज्ञानसाधनानि । **वैराग्यं च तपश्चैव समाधिरिति साधनम्**' एकमेवैतत्, न प्रत्येकपर्यवसायि । चकारोऽनुक्तसर्वफलसमुच्चयार्थः । सर्वफलरूपो भगवानित्यर्थ ।।७।।

व्याख्या—१ श्यामावदातं- प्रभु श्याम होते हुए भी सूर्य मण्डल स्थहिरणमय पुरुष के समान प्रकाश स्वरूप थे । 'आदित्यवर्णं तमस. परस्तात्' इति श्रुते, इस श्रुति अनुसार जैसे सूर्य का वर्ण तम से परे प्रकाश स्वरूप है वैसे ही प्रभु भी थे । सूर्य मण्डल में जो कृष्णता दिखतां है वह 'तन्मध्ये यत् कृष्ण तदन्नस्य' इस श्रुत्यनुसार पार्थिवांश है, किन्च हिरण्यमय पुरुष का भास्वर (प्रकाशमान) श्याम रूप है. कि पार्थिव श्याम, इस स्वरूप के वर्णन से यह सूचित किया है कि, सारूप्य रूपा मुक्तिदाता यह स्वरूप है ।

२—'विरजं' रज (रजोगुण) रहित निर्मल स्वरूप थे इससे यह सूचित किया कि व्यापि वैकुण्ठ में रजोगुण का अभाव है अर्थात् इसी स्वरूप में वैकुण्ठस्थ स्वरूप के भी दर्शन दिए । यह

स्वरूप सालोक्य मुक्तिदाता है । अतः वहाँ उत्पति कराने वाले रज तथा कर्म के संस्कारवाले महाभूत भी नहीं हैं, इससे यह बताया है सालोक्य मुक्ति हो जाने के अनन्तर फिर जन्म लेना नहीं पड़ता है इसलिए जिस को मुक्ति का उपदेश दे रहे हैं उसको ऐसे स्वरूप का दर्शन देकर बताते हैं कि वह मेरा ज्ञानियों के लिए फलरूप स्वरूप है एवं षोडश कलावाले मनोमय वेदरूप भी हैं ।

३—'प्रशान्तारुण लोचनम्' विशेष शान्त और लाल नेत्र वाले, इससे यह सूचित किया है कि आपके दो नेत्र ज्ञान शक्ति तथा क्रिया शक्ति रूप हैं, दोनों नेत्र साधनों के साहित्य रूप हैं अर्थात् ज्ञान एवं क्रिया (क्रम) दो ही साधन हैं यों दिखाया है । इसके सार्ष्टि मुक्ति की प्राप्ति कही है ।

समान ऐश्वर्य दिखा कर यह बताया है कि यहाँ ही सामीप्य है मुक्ति है क्योंकि ज्ञान और क्रिया शक्ति सम्पन्न पुरुष ही भगवान् के समीप रह सकता है । इससे यह भी बताया है कि यहां वेदार्थ भी इतना ही प्रसिद्ध है ।

४—'दोर्भिश्चतुर्भिर्विदितमिति' वाम पार्श्व की दो भुजा, दक्षिण पार्श्व की भुजाएं मिला कर चार भुजा कही गई है । ऐसे चतुर्भुज स्वरूप से दर्शन दे रहें हैं । इस स्वरूप से यह सूचित किया कि सायुज्यमुक्तिदाता मैं हूं और दोर्भिः, चतुर्भिः और विदितं इन तीन पदों के साथ में कहने का भावार्थ यह है कि क्रिया (कर्म) ज्ञान और भक्ति से 'सायुज्य' मुक्ति की प्राप्ति होती है । दोर्भिः पद से क्रिया सूचित किया है 'चतुर्भिः' पद से पाद सेवनादि भक्ति कही और 'विदितं' विशेषण हितं जिसका भावार्थ है सर्व प्रकार के अज्ञान को नष्ट करने वाला ज्ञान व काल का भी निवर्तक ज्ञान यदि कर्म, ज्ञान एवं भक्ति तीनों का सूचन न करना होता तो केवल 'चतुर्भुज' ही कहते ।

५—'पति कोशाम्बरेण' पति रेशमी वस्त्र से विदित है, (जाना जाता है) । इससे बताया है ब्रह्मभान होने में भी 'ज्ञान' अङ्ग है । इस लिए इस प्रकार विशेषण दिया है 'पति' पद से वताया है कि आप में अहंता, ममता का अभाव है । जिसका भावार्थ है कि जो पुरुष अहंता ममता का त्याग करता है उसको सायुज्य प्राप्ति होती है 'कौशेय' वस्त्र से यह शिक्षा दी है कि यह वस्त्र कुश संबंधी हैं । जिससे यमनियम का सूचन किया है । यम नियमादि का पालन करोंगे तो सायुज्य पाओगे 'अम्बर शब्द से यह शिक्षा दी है कि जाग्रति स्वप्न और सुषुप्ति इन तीतों अवस्थाओं के अतिक्रमण करने पर सायुज्य प्राप्ति होगी । उपर्युक्त तीन अवस्थाओं के परित्याग से अम्बर (आकाश) (ब्रह्मा) वत् निर्लेपता आती है, वैराग्य, तप और समाधि ये तीन ही ब्रह्मभाव होने मैं ज्ञान के साधन हैं 'च' पद से यह सूचित किया है कि जो फल नहीं कहे हैं वे भी भगवान् हैं क्योंकि सर्व फल रूप भगवान् हैं ।।७।।

आभास—एवं फलरूपं निरूप्य साधनरूपं चतूरूपं निरूपयति—

आभासार्थ—इस प्रकार फलरूप भगवान् का निरूपण कर, अब साधन रूप भगवान् चतुर्रूप हैं जिसका वर्णन निम्न श्लोक में करते हैं ।

१—ज्ञान और क्रिया दोनों शक्ति रूप ऐश्वर्य जिस मैं है ।

श्लोक—**वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहम् ।**
अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलम् ।।८।।

श्लोकार्थं—वाम उरु पर दक्षिण चरण कमल को धरकर छोटे (बाल) पीपल का आश्रय कर विराजमान, अकृश (पूर्ण ज्ञान स्वरूप) जिसने कर्म फल त्याग कर दिया है ।ऐसे प्रभु के दर्शन किए ।।८।।

सुबोधिनी—वाम ऊराविति । **वामे ऊरौ दक्षिणाङ्घ्रिसरोरुहमधिश्रित्य** स्थितम् । दक्षिणमङ्घ्रिसरोरुहं यस्येति वा । भक्तिरनेन साधनत्वेनोक्ता । वामा मनोहरा ये भगवत्प्रतिच्छायरूपाः, तेषु भगवद्भक्तिमार्गः कमलवत्सुन्दरः सर्वाप्यायकश्च स्थापितः । सरोरुहत्वेन प्रेम्णैव तदुद्गच्छतीति सूचितम् । दक्षिणपदेन भक्तिमार्गे त्रीणि विशेषणानीति सूचितम । **चातुर्यं, दक्षिणो देशः, पाषण्डाभाव एव च** । भक्ते चोरुपदं सकुटुम्बस्य भक्तिपरत्वाय, स्त्रीपुत्रादिस्थानेऽपि भक्तिरेवेति वा । अधिश्रयणं पाकार्थे यथा सर्वोपयोगि भवति । वैष्णवैः संस्कृतो भक्तिमार्गः साधनमिति । एवं भक्ति साधनत्वेन निरूप्य, कर्माणि साधनत्वेन निरूपयति-**अपाश्रितार्भकाश्वत्थमिति** । अपाश्रित आश्रितोऽर्भकाश्वत्थो येन । आश्रितः पश्चादिति वा । अर्भाणां कं सुखं यस्मात्, बालकसुखदायी । अर्भकरूपः कोमलोऽश्वत्थो वा । तस्यैवाऽरणी भवतः । कर्माणि सर्वाणि तत्साधनान्येव । अपाश्रयपदेन च साधनत्वेनैव कर्मणामपेक्षा, न तु तद्गतं फलमप्यपेक्षत इति सूचितम् । अपाश्रिता अर्भका यस्मिन्निति बालाधिकारः कर्मणि सूचितः । **अकृशमिति** ज्ञानम्, पूर्णत्वात्, अन्येषां परिच्छेदरूपत्वात् । अनेन पूर्णमेव ज्ञानं साधनमिति, न तु खण्डब्रह्मज्ञानानि शरीरकादीनि । सर्वेषां भक्तानामुपसंहृतत्वाद्दौवल्यमाशङ्क्य निराकृतम् भक्तानां तत्रैव प्रवेशात् अनेनाऽन्येऽपि दैहिका धर्मा निवारिताः । उत्पत्तिकार्यतपस्यादीनि चाऽक्षरसाम्यान्निवारितानि । **'अस भुवि' 'डुकृञ् करणे' 'शम उपशमे'** इति धात्वादयो गृहीताः । प्रपञ्चकर्मज्ञानानि वा ज्ञानसाधनानि; ततः ससाधनं ज्ञानमुक्तं भवति । **त्यक्तपिप्पलमिति** । त्यक्तं पिप्पलं कर्म फलं येन । वैराग्यमेतत् । पिप्पाल्लातीति पिप्पलम् । पिपः पान्तीति पिप्पाः । पिब्तीति पिः कालः, अविशेषेण सर्वभक्षकत्वात् । तद्रक्षकाणि कर्माणि, कालविशेष एव विहितत्वात् । कर्माणि च फलमेवाऽऽदत्ते, फलकामनयैव कर्मकरणात् । तत्रैकवचनं सर्वं त्याज्यत्वेनैकरूपमिति । अनेन वैराग्ये लौकिकानि, दैहिकानि भक्तिमार्गस्थानि वा विरक्तस्य न निषिद्धानि, न वा नित्यानि, फलेन तेषामप्यनाकर्षात् । नैमित्तिकानि चार्द्धनिषिद्धानि, कालपोषकत्वात् । अग्निहोत्रादीन्यपि नियतकालकर्तव्यानि नैमित्तिकान्येव । सर्वदा कर्तुं शक्यान्येव नित्यानि । योगेनाऽऽत्मदर्शनम्, दानादि परार्थक्रिया, भगवद्भजनमित्यादि; एतेषां न कालपरिपालकत्वम् । अतो वैराग्ये नित्यानि कर्तव्यान्येव, नैमित्तिकानि विकल्पन्ते; काम्यानि तु त्यक्तव्यान्येवेति सूचितम् । गीतायां यद्भगवद्वचनम्–'**यज्ञदानतपः** ...' इति । तत्रापि यज्ञा नित्याः, जरामर्यादादयो वा । दानमपि ज्ञानोपदेशादयः सर्वदा दातुं शक्याः, अक्षयत्वात् । तपोऽपि नित्यमेव यत्सम्भवति, ऊर्ध्वरेतआदिरूपम्, न तु कृच्छ्रादि; तेषां सर्वदा कर्तमशक्यत्वात् । एवं षोडशकलं भगवन्तं दृष्टवान् ।।८।।

व्याख्या जिस प्रभु ने अपना दक्षिण चरण, कमल अपनी वाम ऊरू पर धरा है वैसे प्रभु स्वरूप के दर्शन किए, इस प्रकार के स्वरूप से यह सूचन किया है कि मेरी प्राप्ति का साधन

भक्ति ही है। भगवान् स्वरूप जैसे सुन्दर परम भगवदीयों में कमल सुन्दर (कोमल) तथा सर्व को तृप्ति (ग्रानन्द) देने वाला भगवद् भक्ति मार्ग मैंने स्थापित किया है, चरण को सरोरुह विशेषण देकर यह सूचित किया है कि वह भक्ति प्रेम से ही प्रकट होती है। दक्षिण पद से भक्ति मार्ग में तीन विशेषण (गुण) सूचित किए हैं ६ चातुर्य दक्षिणोदेशः पाषण्डाभावः, १—चतुराई २ — दक्षिण देश और ३— पाषण्ड का अभाव, ये तीन गुण हैं। 'ऊरू' पद से प्रकट किया है कि भक्त कुटुम्ब सहित भक्ति परायण होता है तथा उनके पुत्र स्त्री आदि में भी भक्ति होती है जिससे पाकादि सेवा में सब उपयोगी होते हैं। अतः वैष्णवों से संस्कृत (संस्कार प्राप्त) भक्ति मार्ग साधन होता है। यों भक्ति का साधनपन निरूपण कर अब कर्मों का साधनत्व निरूपण करते हैं 'अपाश्रितार्भकाश्व त्थमिति' छायार्थ जिसने छोटे (कोमल) पीपल का आश्रय लिया है। अर्भक' पद का आशय बताते हैं कि वह पीपल बालकों[1] को सुख देने वाला है अथवा छोटा होने से अभी तक कोमल है। इस वृक्ष की लकड़ी से अरणियाँ बनाई जाती हैं। वे ही अरणियाँ सर्व कर्मों के साधनरूप हैं। उनके बिना कर्म पूरा नहीं होता है। 'अपाश्रय' पद का भावार्थ है कि साधन रूप से कर्मों की अपेक्षा है, किन्तु कल को अपेक्षा नहीं है। इस लीला से यह स्पष्ट किया है कि कर्म में बालकों[2] का अधिकार है।

'अकृशं' विशेषण से भगवान् का पूर्णत्व बताया है तथा वे ज्ञानरूप हैं। इसी तरह भगवत्स्वरूप कहने का आशय यह है कि दूसरे अपूर्ण होने से परिच्छेद वाले हैं इसलिए भगवत्प्राप्ति का पूर्ण सत्य ज्ञान ही साधन है, न कि शारीरिक भाष्य में कहे हुए मायावादादि खंडब्रह्मज्ञान साधन है। 'भक्त' ज्ञानियों से दुर्बल (कम) हैं। इस शंका का निवारण भगवान् ने भक्तों को अपने में सायुज्य मुक्ति दे के किया है जिसमें वे निर्बल नहीं किन्तु सब से सबल हैं यों सिद्ध किया है, इसके दूसरे वैदिक धर्म उनमें (भगवान् में तथा भगवदीयों में) नहीं है यह भी सिद्ध किया है।

जैसे अक्षर ब्रह्म में उत्पति, कार्य तथा तपस्या आदि नहीं है, वैसे भगवान् में भी नहीं है कारण कि आप ब्रह्म होने से अक्षर के समान भी हैं,

'अकृशं' पद में असुभुवि धातु डुकृञ्करणे धातु एवम् शम उपशमे धातु इन तीनों धातुओं के प्रथम अक्षर लिए हैं, जिससे प्रपंच, कर्म और ज्ञान अथवा ज्ञान के साधन कहे हैं। इससे समझा जाता है कि साधन सहित ज्ञान कहां है।

'त्यक्तपिप्पलम्' त्यागा है पिप्पल (कर्म फल) जिसने ऐसे प्रभु के दर्शन किए, इससे वैराग्य प्रदर्शित किया है।

पिप्पल 'पिप्पाँन् लाति इति' पिप्पलम् जो कार्मो को करावे वह पिप्पल है, 'पिपः पान्ति इति पिप्पाः' काल की रक्षा करने वाले (कर्म), 'पिबति इति पिप्पलम्' सबको पी जाता है वह काल, यह काल सर्व को भक्षण करता है इस काल के रक्षक कर्म हैं, कारण कि वे समय-समय

---

[1] —'अर्भक बालक पद का गूढ़ अभिप्राय यह है कि कर्मरूप साधन बालकों (अज्ञों) के लिए है। [2] - ज्ञान एवं भक्ति के अधिकारी।

पर किए जाते हैं। कर्म फल प्राप्ति के लिए किए जाते हैं अतः कहा गया है कि कर्म निष्काम होकर करने चाहिए अर्थात् कर्मफल की इच्छा मात्र भी नहीं करनी चाहिए जिससे वैराग्य दृढ़ हो जाय।

वैराग्यानन्तर भी लौकिक, दैहिक एवं भक्ति मार्ग के सेवादि कर्म करने का निषेध नहीं है, इसी तरह नित्य कर्म (सन्ध्या बन्दनादि) करने का भी निषेध नहीं है,। कारण कि वे फल देकर चित्त को लोभ द्वारा आकर्षक नहीं करते हैं। नैमित्तिक कर्म किये वा न किए जाए स्वेच्छा है, शेष काम्य कर्म तो नहीं करने चाहिए।

गीता में यज्ञ, दान, तप रूप कर्म का त्याग नहीं करना चाहिए ऐसी आज्ञा है। ये सर्व वृद्धावस्था में भी किए जा सकते हैं अतः नित्य, सदा करने की अनुमति दी गई है। किन्तु जब तक सुख पूर्वक बन सके तब तक अवश्य करने चाहिए। इसी तरह षोण्डशकला वाले परमात्मा के दर्शन किए ॥८॥

कारिका—**प्रमेय साधने चैव चतुर्मूर्तिः फले पुनः।**
पञ्चात्मकस्त्रिमूर्तिस्तु प्रमाण इति निश्चयः॥

कारिकार्थ—प्रमेय तथा साधन में चतुर्मूर्ति, फल में पाञ्चरूप वाले और प्रमाण में तीन रूप वाले भगवान् हैं इस प्रकार ६ कला वाले हैं यों निश्चय है।

आभास—यदैव मया भगवान् दृष्टः, तदैव मैत्रेयोऽपि समागतः, विदुरोद्धारार्थं तदानयनात्। अत एवं मुख्यं भागवत मैत्रेयोक्तमपि भवति, ब्रह्मसमानत्वात्, साक्षाद्भगवता त्रयाणां स्थाने निरूपितत्वात्। अतः शुकोक्तत्वमपि पृष्ठतः कृत्वा मैत्रेयोक्तत्वमेवोक्तम्। एकान्तरितत्वाल्लीलाद्वयेन कृतार्थता विदुरस्य, एवमुद्धवोक्तेऽपि भविष्यति कल्पान्तरे। ब्रह्माद्धवमैत्रेयाणां सूक्ष्मलीलामात्रश्रवणेनैव कृतार्थता। सा च लीला आश्रयरूपा, 'परमां स्थितिम्' इति वचनात्। तस्याऽप्यागमनं भगवदिच्छया। पूर्वमपि स वेदव्यासतुल्यः, शुकतुल्योऽपि, नारदन्तुल्योऽपि। अतो ब्रह्मपरम्परायां यावन्तस्ते सर्वे मैत्रेय एक एवेति, न परम्पराद्वयस्याऽल्पमपि वैलक्षण्यमिति। तादृशरूपो मैत्रेयः समागत इत्याह—

आभासार्थ—जब मैंने (उद्धवने) भगवान् के दर्शन किए तब उस समय मैत्रेयजी भी आ गए क्योंकि विदुर के उद्धारार्थ उनको (मैत्रेय को) भगवान् लाए थे, इससे मैत्रेय के कहे हुए भगवान् भी मुख्य हैं, मैत्रेय ब्रह्मा जैसे हैं कारण कि भगवान् ने जैसे ब्रह्मा को भागवत् सुनाया वैसे ही यहाँ मैत्रेय भी भगवान् से सुनेंगे, अत. ब्रह्मा, उद्धव और मैत्रेय तीनों इस बिषय में समान स्थिति वाले हैं, अतः शुक का कहा हुआ न कह कर मैत्रेय ने जो कहा वही कहा। एक के ही मध्य में रह जाने से दो लीलाओं से ही विदुर कृतार्थ हो गया, इसी तरह उद्धव प्रोक्त भागवत से कल्पान्तर में यों होगा। ब्रह्मा, उद्धव और मैत्रेय तीनों सूक्ष्म लीला मात्र श्रवण से कृतार्थ हो

गए हैं 'परमो स्थितं' इस वाक्य से जाना जाता है कि वह लीला 'आश्रय रूपा थी' उस (मैत्रेय) का आना भी भगवदिच्छा से हुआ है। प्रथम भी वह वेद व्यास के समान थे तथा शुक और नारद के समान भी है, अतः ब्रह्मा की परम्परा में जितने सर्व भागवत वक्ता हुए हैं। उतना एक ही मैत्रेय है इससे दोनों परम्पराओं में किंचित्मात्र भो विलक्षणता (भेद) नहीं है, ऐसे मैत्रेय वहां आये यों निम्न श्लोक में कहते हैं।

श्लोक—**तस्मिन् महाभागवतो द्वैपायनसुहृत्सखा।**
लोकाननुचरन् सिद्ध आससाद यदृच्छया ॥६॥

श्लोकार्थ—द्वैपायन (व्यास) का हितकारी एवं मित्र, महान् भगवदीय मैत्रेयजी लोकों में घूमते हुए अकस्मात् स्वेच्छा से वहाँ आ गए ॥६॥

सुबोधिनी—तस्मिन् महाभागवत इति। **तस्मिन्** देशे काले च। भगवद्भक्तानामपि कृतार्थकरणसामर्थ्यात् महाभागवतत्वम्। **द्वैपायन** इति तदर्थमेव पुष्टया भगवदवतारः, तथाऽयमपीति ज्ञातव्यम्। तस्य सुहृत्, तस्यापि हितकारी सखा च, पराशरशिष्यत्वात्। अनेन पुराणमेव व्यासवत् परम्परया पराशरादवगतम्, न तु भागवतमिति सूचितम्। व्यासोऽपि नारदादेव भागवतं ज्ञातवान्। अनेन मैत्रेयस्याऽपि भगवदाज्ञया पुराणकथनं न व्यासस्याऽधिकारिणो विरोधहेतुः; तत्पुत्रोपदेशाच्च। एतदर्थं मित्रत्वमुक्तम्। **लोकाननुचरन्निति** शुकवत्स सिद्ध उक्तः। शुको ह्याचरन्नेव सिद्धो जातः। **आससाद यदृच्छयेति** नारदतुल्यता निरूपिता, स हि यादृच्छिकः ॥६॥

व्याख्या— उस देश में और उसी समय मैत्रेयजी आ पहूंचे, वे(मैत्रेय) परम भगवदीय थे यों कहने से यह सूचित किया जाता है कि उनमें भगवद्भक्तों को भी कृतार्थ करने का सामर्थ्य था।

द्वैपायन इस नाम से बताया है कि भागवत के रचने के लिए ही यह भगवदवतार[1] पुष्टि (अनुग्रह) मे हुआ है, यह (मैत्रैय) भी वैसे ही हैं, मैत्रैय पाराशरजी के शिष्य होने के नाते उनका (व्यासजी को) हित करने वाले और मित्र हैं। इससे यह भी सूचित किया है कि इसने परम्परा से व्यास का तरह पुराण पाराशरजी से सीखे हैं न कि भागवत व्यास ने भी नारद से ही भागवत[2] जाना मैत्रैय पुराणों की कथा भगवदाज्ञा से करने लगे। अतः अधिकारी व्यासजी के साथ विरोध होने का कोई कारण नहीं है और शुकदेवजी को भी मैत्रैय ने उपदेश किया है जिससे भी विरोध का अभाव और मित्रता का भाव होना उचित ही है, मैत्रेय लोकाटन करता वहां पहुँचा इससे वह शुकवत् सिद्ध है। अचानक स्वेच्छता से आ गए यों कहकर नारद की समानता दिखाई है, नारद भी रटन करते रहते हैं, अचानक स्वेच्छा से कहीं भी आ जाते हैं ॥६॥

---

[1]—ज्ञानावतार व्यासजी। [2]—भगवान् की लीलाओं का वर्णन करो यह ज्ञान प्राप्त किया अनन्तर समाधि में अनुभव कर लीलाओं का वर्णन्त किया।

आभास—एवं भगवान् सर्वसंविधानं विधाय पूर्वावस्थां त्याजयितुं स्वस्य कृपामसाधारणं कारणं स्वयमेव सम्पादितवानित्याह—

आभासार्थ—इसी प्रकार भगवान् सबकी पूरी तरह स्थिति का विधान कर पूर्वावस्था को छुड़ाने के लिए जो असाधारण कारण कृपा है वह (कृपा) स्वयं ही करने लगे, जिसका वर्णन निम्न श्लोक में कहते हैं।

श्लोक—**तस्याऽनुरक्तस्य मुनेर्मुकुन्दः प्रकृष्टमोदानतकन्धरस्य।**
आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥१०॥

श्लोकार्थ—विशेष आनन्द से नम्रगर्दन वाले उस प्रेम पूर्ण मुनि के सुनते हुए प्रेम सहित एवं हासयुक्त द्रष्टि से मेरे श्रम का निवारण करते हुए मुकुन्द मुरारी मुझे कहने लगे ॥१०॥

कारिका—**सास्याऽनुरक्तस्येतिजनु गोप्या दयोपदेशश्च, उपदशो न हि द्वयोः।**
भिन्नप्रकारयोर्जात्या स्वरूपेण गुणेन च ॥१॥

कारिकार्थ—दया और उपदेश दोनों को गुप्त रखना चाहिए अतः जाति स्वरूप और गुण से जो भिन्न प्रकार के हों उन दोनों को साथ में उपदेश नहीं देना चाहिए।

सुबोधिनी—इत्याशङ्कयाऽऽह-**अनुरक्तस्येति**। **अनुरक्तस्य** प्रसिद्धस्य **मैत्रेयस्य आशृण्वतो मामोहेति** सम्बन्धः। अन्यत्र कथनाभावाय **मुनेरिति**। कृपाकथने हेतुः-**मुकुन्द इति**। स हि मोक्षदाता सर्वेषाम्, यथा जगत्कर्ताः, अतस्तथोक्तवान्। तह्युभयोः प्रधानत्वं कथं नोच्यते? तत्राऽऽह-**प्रकृष्टमोदानतकन्धरस्येति**। प्रकृष्टो यो मोदस्तेन आनता कन्धरा यस्य। स हि प्रेमभरेण गृहीतो ज्ञानाधारमधः कृत्वाः प्रेमाश्रु मुञ्चन्, चरणमेव पश्यन्, स्थितः। अतः साक्षादुपदेशानधिकारी, भक्त्या च कृतार्थः। अतस्तस्य शृण्वत एव सतो मामुद्दिश्यैवाऽऽह। स्वस्थे हि चित्ते उपदेशो घटते। स्वास्थ्यं च देशकालवैपरीत्यदर्शनात्, श्रमादिना च न सम्भाव्यते। अत आह-**अनुरागहाससमीक्षयेति**। अनुरागाद्भयवृत्तिः, न ह्यनुरक्तो भगवान् मारयति। हासेन च मोहः। भगवता पूर्णं कृतं पश्यन्नपि नानुसन्धत्ते। सम्यगीक्षा समीक्षणं दयासहितम्, तेन देशकालभयानि सर्वाण्यपि निवृत्तानि। विशिष्टेन श्रमाभावः। अनुरागपूर्वको यो हासस्तत्सहिता समीक्षेति ॥१०॥

व्याख्या—उपर्युक्त शंका का निवारण इस श्लोक द्वारा करते हैं—यहाँ जो उपदेश दिया है वह मुख्यतः उद्धव को ही दिया है यद्यपि हालाँकि वहाँ मैत्रेयभी थे किन्तु वे भक्ति से कृतार्थ हो गए थे इसलिए 'अनुरक्तस्थ' विशेषण से उनकी प्रेम निमग्नता कही है। और 'मुनि' विशेषण से यह सूचित किया है वह जो कुछ भी उपदेश सुनेंगे तो भी दूसरे को नहीं बताएँगे यह उपदेश प्रभु कृपाकर दे रहे हैं इसलिए यहाँ आपका नाम मुकुन्द' दिया है, जैसे आप स्वेच्छा से कृपाकर लीलार्थ जगत् की रचना करते हैं वैसे ही आप सबका मोक्ष करने वाले हैं।

यदि यों है तो दोनों (विदुर और मैत्रेय) को मुख्य श्रोता क्यों नहीं किया। इसके उत्तर में कहते हैं 'प्रकृष्ट मोदानतकन्धरस्य' अतिशय आनन्द के कारण जिसकी ग्रीवा न भी हुई है जिससे नयनों से प्रेमाश्रुओं की वर्षा करते हुए चरणों में दृष्टि वाले थे अतः प्रेमरस में मग्न हो जाने से वे श्रवण नहीं कर सकते थे जिसका अन्य कारण था कि वह इस उपदेश का अब तक साक्षात् अधिकारी नहीं हुए थे। भक्ति से ही कृतकृत्य हो गए थे अतः उसके सुनते हुए मुझे उद्देश कर उपदेश दिया, किन्तु उपदेश स्वस्थ चित्त में ही स्थिर होता है। देश काल की विपरीतता तथा परिश्रम होने से स्वस्थ चित्तता रह नहीं सकती है। मेरी दशा ऐसी ही थी, किञ्च पुष्टिस्थ, प्रभु अपने सेवकों पर कृपा करते हैं जिसमे स्वयंसाधन बन जाते हैं। इसलिए यहाँ भी आपने प्रथम अनुराग तथा हास्य संयुक्त दृष्टि से मुझे सर्वप्रकार निर्भय कर मेरी थकावट दूर की एवं स्वस्थ चित्त बना दिया जिससे हास्य द्वारा उत्पन्न मोह से देखते हुए भी अनुसंधान न रहा तो भी उपदेश चित्त में स्थिर हो गया ॥१०॥

आभास—पूर्वम् 'अतिव्रज्य गतीस्तिस्रो मामुपैष्यसि केवलम्।' इति भगवता प्रोक्तम्, तदुद्धवस्थ सर्वथा हितमिव भवति। स हि भगवन्तमेव प्राप्तुमीष्टे, निरन्तरं च निकटे स्थातुम्। साधनानि च न कर्तुं वाञ्छति। तादृशस्य बदरिकाश्रमप्रेषणं नाऽत्यन्तमभीष्टमिति तदिच्छामनुवदन् देयान्तरमाह। अस्मिन दत्ते तदेतच्चाऽन्यार्थं भविष्यति। अहमिव तथा करिष्यतीत्यभिप्रायेणाऽऽह—

अभासार्थ—प्रथम भगवान् ने उद्धव को कहा था कि 'तीन गति' (फलों) को उल्लंघन कर केवल मुझे प्राप्त करेंगे' यह कहना सर्वप्रकार उद्धव के लिए हितकर जैसा था, वह (उद्धव) भगवान् को ही प्राप्त करना चाहता था और सदैव पास में रहने की इच्छा वाला था। साधन करने की भी उसकी (उद्धव की) इच्छा नहीं थी, ऐसे उद्धव को बदरिकाश्रम भेजना अत्यन्त इच्छा विरुद्ध था। यह इच्छा प्रकट करते हैं कि आप विचार न करें आपको अन्य फल दूँगा। इसके देने पर वह और यह अन्य के लिए होगा। जैसे मैं करूंगा, उद्धव भी वैसा ही करेगा, इस अभिप्राय से निम्न श्लोक कहते हैं—

श्रीभगवानुवाच–श्लोक—**वेदाऽहमन्तर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः।**
सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो! त्वयेष्टः ॥११॥

श्लोकार्थ—श्रीभगवान् उद्धव को कहने लगे, कि जो तेरे मन में इच्छा है उसको मैं जानता हूँ, दूसरों को जो मिलना कठिन है वह तुम्हें देता हूँ। हे वसु! विश्व की रचना करने वाले वासुओं के यज्ञ में मुझे प्राप्त करने की इच्छा से तुमने मेरा सप्रेम यजन किया था ॥११॥

सुबोधिनी—वेदाहमिति । ते यदन्तर्मनसीप्सितं तदहं वेद । इदं वाक्यमनुवादकम्, तत् फलं दास्यामीत्येतदर्थम् । एवमुक्ते प्रथमत एवाऽऽश्वासो भवति, अन्यथा काकतालीयशङ्का च स्यात् अन्यथाभिप्रायशङ्का च । ननु तद्भगवदात्मकं लौकवेदतोऽदेयं कथं दास्यतीत्यत आह–**ददामि यत्तदिति** यत्त्वया मनसि कृतं तदेव दास्यामीत्यर्थः । तस्याऽसाधारणत्वमाह–**दुरवापमन्यैरिति** । त्वद्व्यतिरिक्तैः सर्वैरेव दुरवापम् । तां कामनां विस्मृतामिव स्मारयति–**सत्रे पुरेति 'विश्वसृजः प्रथमाः सत्रमारात'** इति श्रुतौ सहस्रसमयागे विश्वसृजां मध्ये वसवोऽपि स्थिताः, तन्मध्ये त्वमेको मत्सिद्धिकामः; न हि सर्वे । **'एतेन वै विश्वसृज इदं विश्वमसृजन्त'** इति श्रुतेः, **'ब्रह्मणः सायुज्यं सलोकतां यन्ति'** इति श्रुतेश्च विश्वसामर्थ्यंम् ततो विश्वं सृष्ट्वा ब्रह्मसायुज्यं प्राप्नुवन्तीति सर्वेषां फलम् । तदधिकारीविशेषप्रयुक्तं विश्वकरणसामर्थ्यं यागस्य । स्वतः साम्र्थ्यं हिरण्मयशकुनिरूपब्रह्मोत्पत्तिः । तदा ते विश्वं सृष्ट्वा ब्रह्मसायुज्यं प्राप्ताः । भवांस्तु तदुभयं न काङ्क्षितवान्, किन्तु सङ्घानुरोधेन यागे प्रवृत्तो मत्सिद्धिमेव काङ्क्षितवान् । मम सिद्धिर्मद्भावः 'पुरुषोत्तमो मम भवतु, अहं वा भवामि' इति; तच्च सर्वथा दुर्लभं यागात् । अतो यागः कामितत्वाभावान्न नियतं फलं दत्तवान् । एतच्च दातुमसर्थस्त्वामेवरूपमुत्पाद्य मत्सेवां कारितवान् । अतो मया सेवाफलं बदरीस्थाने पुरुषोत्तमप्राप्तिरूपं यथा सिद्धयति तथोपाय उक्तः । यागफलं तु न दत्तम्, तदिदानीं दास्यामीत्यर्थः । **वसो** इति सम्बोधनमेतदर्थानुसन्धानं भगवत्कृपया तस्य जातमिति ख्यापनार्थम् । फलार्थमेव याग इति त्वयऽहमेवेष्टः ।।११।।

व्याख्या—तुमने जो प्राप्त करने की जो इच्छा मन में की थी वह मैं जानता हूँ, यह वाक्य 'अनुवादक' है, जिसके कहने का भावार्थ है कि जो तुम फल चाहते हो वह ही दूँगा, इससे यह सिद्ध होता है कि फल प्राप्ति का पहले ही भगवान् ने आश्वासन दे दिया है, जो यों नहीं होवे तो फिर काकतालिय न्याय की तरह अचानक फल मिला, ऐसी शंका होने लगे और नहीं तो अभिप्राय की शंका होवे कि ऐसा फल क्यों और किसलिए दिया और वह फल भगवदात्मक है जिसे लोक तथा वेद से अदेय होने पर कैसे देंगे ? इसे शंका निवारणार्थ कहते हैं कि 'ददामि यत्तदिति' जो तुमने मन में चाहा है वह मैं देता हूँ (दूँगा) जो तुमने चाहा है और मैं दूँगा वह असाधारण है, अतः कहते हैं कि 'दुरवापभव्यैः' तुम्हारे सिवाय दूसरा कोई इसको पा नहीं सकता है, वह जो तुम्हारी कामना है वह तुम भूल गए हो मैं उसकी याद दिलाता हूँ 'सत्रेपुरा इति' पूर्वकाल में यज्ञ में तुम ने यह कामना की थी 'विश्वसृजः प्रथमाः सत्रभासत' इति श्रुतौ, श्रुति में यों कहा है कि विश्व रचनेवालों ने पहले सहस्रवर्ष पर्यन्त सत्र किया था उनके मध्य में वसु भी बैठे थे उन वसुओं में तुम एक थे जिसको मेरी प्राप्ति की उत्कट इच्छा थी, दूसरे किसी को नहीं 'एतेन वै विश्वसृजः इदम् विश्वमसृजन्त' इति श्रुने 'ब्रह्मणः सायुज्यं सलोकतां यान्ति' इति श्रुतेश्च विश्व सामर्थ्यम् । अर्थ—इससे (सत्र करने से) विश्व रचकों ते निश्चय इस विश्व की रचना की रचना की और

ब्रह्मा का सायुज्य एवं उसकी सलोकता प्राप्त को' तथा इससे विश्व रचने की सामर्थ्य प्राप्त कर ली, विश्व रचना के अनन्तर ब्रह्म सामुज्य को प्राप्त होते हैं। यह फल सर्व को प्राप्त हुआ। सत्र का विश्व रचने की सामर्थ्य रूप फल विशेष अधिकारियों को मिला और सुवर्णमय पक्षीरूप ब्रह्मा की उत्पत्ति तो यज्ञ के स्वतः सामर्थ्य से हुई, तब वे विश्व की रचना कर ब्रह्म सामुज्य को प्राप्त हुए, तुमने तो दोनों की (विश्व रचना और ब्रह्म सामुज्य की) इच्छा नहीं की, किन्तु केवल सत्र के अनुरोध (आग्रह) से सत्र में प्रवृत्ति की, किञ्च कामना तो केवल मेरी प्राप्ति की ही थी। वह कामना यह थी कि 'पुरुषोत्तम मेरा हो या मैं पुरुषोत्तम का हो जाऊँ' वह तो यज्ञ करने से दुर्लभ है। अतः यज्ञ जिन कामनाओं को दे सकता है उनमें यह कामना नहीं थी अतः वह न देकर नियत फल हो यज्ञ ने दिया, जो तुम चाहते थे उसके देने में असमर्थ होने से तुम्हें यादव कुल में पैदा कर मेरी सेवा कराई अतः मैंने सेवा का फल बदरिकाश्रम में रहने से जैसे पुरुषोत्तम प्राप्ति रूप फल सिद्ध हो (मिले) वह उपाय बताया, यज्ञ का फल तो नहीं दिया वह (जो देना है) अब दूँगा। वसो! यह सम्बोधन! कृपा कर इस अर्थ के अनुसंधान के लिए दिया है। फलार्थ ही तुमने यज्ञ किया उस यज्ञ से तुमने मेरा ही पूजन किया और मुझे ही चाहा था ॥११॥

आभास——तर्हि किं दातव्यम्? कथं दातव्यम्? इत्याकाङ्क्षायामाह——

आभासार्थ—तो क्या देना चाहिए? कैसे देना चाहिए? इस आकाँक्षा पर निम्न श्लोक कहते हैं।

श्लोक——**स एष भावश्चरमो भवानामासादितस्ते मदनुग्रहो यत्।**
यन्मां नृलोकान् रह उत्सृजन्तं दिष्ट्या ददृश्वान् विशदानुवृत्त्या ॥१२॥

श्लोकार्थ——तुम्हारे जन्मों में यह तुम्हारा जन्म अन्तिम है। अर्थात् इसके अनन्तर तुम नहीं जन्मे क्योंकि इस जन्म से तुम्हें मेरी कृपा सम्पादन करती है, और जब एकान्त में नृलोकों को छोड़ते थे उस समय भाव से मेरे दर्शन कर लिए ॥१२॥

सुबोधिनी—स एष इति। स एष भावो जन्म, ते भवानां चरमः। यदीदानीं न दत्तं स्यात्, तदा तवाऽग्रे जन्माभावात्फलं न भवेदेव। ततः किमत आह-यद्यस्मिन् जन्मनि प्राप्तःममानुग्रहः फलसूचकोऽनन्तिमजन्मनोऽप्यन्तिमत्वं साधयति। एवमन्तिमे जन्मन्यनुग्रहो जात इति फलमावश्यकम्। किञ्च, न योग्यता मात्रम्, किन्तु फलमुखमेव तज्जातमित्याह-**यन्मां नृलोकान् रह उत्सृजन्तमिति।** नृलोकान् सर्वानेव एकान्ते स्थित्वा उत्सृजन्तं मां ददृश्वान् दृष्टवानसि ॥१२॥

व्याख्या—वह यह तुम्हारा जन्मों में अन्तिम जन्म है अतः जो अब फल दूँगा तो आगे तो तुम्हारा दूसरा जन्म नहीं होगा तो फल कैसे लोगे? यों कहने का क्या आशय है? इस पर कहते हैं कि जब तस अन्तिम जन्म में मेरा अनुग्रह प्राप्त किया है तो फल भी अवश्य मिलना है। वह फल भी कैसा? यदि अन्तिम जन्म न होवे तो भी उसको अन्तिम बना दे। किन्तु यह अनुग्रह केवल

योग्यता ही प्राप्त कराने वाला नहीं है बल्कि वह अनुग्रह फलमुख (फलप्रद) है। अतः सर्व नृलोकों (जन्मों को) एकान्त में स्थित हो त्याग कर उच्चता को जाने के समय मेरे दर्शन पाए ॥१२॥

आभास—एतच्च दर्शनं निर्मलया सेवया जातम्; अतः ससाधनत्वात्तत् स्थिरम् न काकतालीयम् । उत्सृजन्तमित्यनेन त्यजन्तमूर्ध्वं सृजन्तं चेत्यर्थद्वयं विवक्षितम् । तेन यागप्रयोजनं मद्भावश्च एकरूपो भवति । मद्भावेप्येतद् द्वयं कर्तव्यम्. गुप्ततया स्थित्वा विश्वजननं सर्वलोकपरित्यागश्च । जगज्जन्मनश्चरमत्वादेव परित्यागः सिद्धः । मद्भावेन जगज्जननमव शिष्यते । तत्र मत्सायुज्ये जगज्जननमन्यथासिद्धं भवति, एकीभावश्रुतेः । 'यथा सर्वासामपां समुद्र एकायनम्' इति । भिन्नतया ब्रह्मभावे 'जगद्व्यापारवर्जम्' इति न्यायान्न जगत्कर्तृत्वम् । अतः सर्वाविरोधेन मद्भावेन जगज्जननं यथा सिद्धति तथा वक्ष्यामीत्यभिप्रायेण, ब्रह्मणोऽप्येतदेव मयोक्तमित्येतदर्थज्ञानेन यथा ब्रह्मा मद्रूपो भूत्वा मद्रूपं जगत्कृतवान्, क्रियया तस्य तथाऽधिकारात्; त्वमप्येतज्ज्ञानान्मद्रूपो भूत्वा मद्रूपं जगत् ज्ञानेन करिष्यसीत्याशयेन तज्ज्ञानमाह––

आभासार्थ—अन्तिम समय में यों मेरे दर्शन होने का कारण यह है कि तुमने मेरी शुद्ध भाव से सेवा की है, वह दर्शन से, सेवा रूप साधन से, होने के कारण स्थिर है न कि काकतालीय न्यायवत् अचानक मात्र है, किन्तु 'उत्सृजन्तं' पद के यहाँ दो अर्थ इच्छित हैं, एक शरीर 'छोड़ने के समय' 'दूसरा ऊँचे से सृष्टि करते हुए, इसलिए यज्ञ का प्रयोजन आदि मेरा भाव (पुरुषोत्तम स्थिति) दोनों एक रूप हुए हैं, मुझमें (मेरे में) स्थिति होने पर भी ये दोनों ही कर्त्तव्य हैं, गुप्त रूप से स्थित हो विश्व की उत्पत्ति करनी और सर्वलोक परित्याग तुम्हारा यह अन्तिम जन्म है, इससे सर्वलोक परित्याग तो सिद्ध ही है। मेरे भाव में स्थिति रहकर जगत् की उत्पत्ति करना शेष है, उसमें मेरे सायुज्य हो जाने पर जगत् की उत्पत्ति अन्य प्रकारसे सिद्ध होगी, क्योंकि श्रुति में एकीभाव कहा है जैसे 'सर्वसामयां समुद्र एकायनम्' सर्व जलों का समुद्र ही एक स्थान है अर्थात् सर्व जल समुद्र में मिल जाने पर समुद्र बन जाते हैं, तब जो कार्य होता है वह समुद्र ही करता है न कि नदी। वैसे ही ब्रह्मभाव होने पर 'जगद्वया पादवर्जम्' इस न्यायानुसार जीव में जगत्कर्त्तृत्व नहीं हैं। यों कहना असत्य ठहरेगा, अतः किसी का भी विरोध न होवे वैसे मेरी स्थितिवान् होते हुए भी जैसे जगत् की उत्पत्ति कर सको वह प्रकार इस श्लोक में बताऊँगा, ब्रह्मा को भी यही कहा था, उसके अर्थ के ज्ञान से जैसे ब्रह्मा ने मेरा रूप होकर मेरा रूप जगत् बनाया है, क्रिया से उसका वैसा अधिकार हो ऐसे तुम भी इस ज्ञान से मद्रूप होकर मद्रूप जगत् ज्ञान से करोगे इस आशय से निम्न श्लोक में वह ज्ञान बताते हैं।

श्लोक—पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममाऽऽदिसर्गे ।
ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदन्ति ॥१३॥

श्लोकार्थ—आदि सृष्टि करने के समय, मेरी नाभि से उद्भूत कमल में स्थित अज (ब्रह्मा) को, मेरी महिमा जिसमें प्रकाशित हो रही है और जिसको सूरि (कवि–विद्वान) भगवान् कहते हैं। उस (भागवत) के द्वारा वह उत्तमज्ञान दिया। जिससे वह (ब्रह्मा) सृष्टि रच सका ॥१३॥

सुबोधिनी—पुरिते। एतद्वक्ष्यमाणं ज्ञानम्, मम नाभ्ये पद्मे निषण्णाय अजाय आदिसर्गे प्रोक्तम्। तत्र हि सर्वे कृतयुगे ब्रह्मविदो ब्रह्मरूपाः मच्छिक्षया ब्रह्मा पुरुषोत्तमरूपान् कृतवान्। **'यदा विवेकनिपुणा आदौ कृतयुगे युगे'** इति भगवद्वाक्यात्। नाभौ भवं नाभ्यम्। **अज** इति योनिद्वारा न जात इति। असंबन्धेन देहे संबन्धेन वा। समष्टिव्यष्ट्युभयरूपत्वाभावात्। तस्य स्वरूपमग्रे वक्तव्यम्। **'रजोभाजो भगवतो लीलेयम्'** इत्यतोऽयमजः। यदुक्तं तत्किमित्याकाङ्क्षायामाह–**ज्ञानं परमिति**। ज्ञानमध्यात्मरूपमपि भवति, तद्व्यावृत्त्यर्थमाह–**परमिति** तदौपनिषदमपि भवतीति ततोऽप्युत्कृष्टमाह—**मन्महिमावभासमिति**। मन्महिम्नोऽवभासो यत्रेति यस्मिन् ज्ञाने मम पुरुषोत्तमत्वं भासते। माहात्म्यप्रतिपादका गुणाः, कर्माणि, शक्तयश्च, अलौकिकं च सामर्थ्यम्; एतत्सर्वं यत्र भासते तद्भागवतमिति लोके प्रसिद्धमान्। सूरयस्तथा वदन्तीत्यतोऽस्मिन्नपि शास्त्रे वादिनामपि वाद एव ॥१३॥

व्याख्या—यह ज्ञान जो अब कहूँगा वह मेरी नाभि से उत्पन्न कमल पर बैठे हुए अज (ब्रह्मा) को आदि सृष्टि के समय कहा था। क्योंकि उस समय में कृतियुग था जिससे सर्व ब्रह्मवेत्ता होने से ब्रह्मरूप थे, जिस कारण से उस युग के ब्रह्मा ने मेरी शिक्षा से सर्व पुरुषोत्तम रूप किए थे अतः सर्व विवेक में निपुण थे। यों भगवान् के वाक्य हैं, 'नाभ्यम्' पद का अर्थ है जो नाभि से उत्पन्न हुआ, 'अज' पद से यह सूचित किया है कि ब्रह्मा योनि द्वारा उत्पन्न न होने से अजन्मा कहा जाता है। देह से सम्बन्ध न होने से अथवा सम्बन्ध होने से वह (ब्रह्मा) समष्टि व्यष्टि दोनों रूप नहीं है। उसका (ब्रह्मा का) क्या रूप है वह आगे कहा जाएगा।

रजोगुण रूप भगवान् की यह लीला है, इस वाक्यानुसार ब्रह्मा 'अज' है। ब्रह्मा को कौन सा ज्ञान दिया इसके जानने की इच्छा होने पर, वह उत्तम ज्ञान उत्तरार्ध में कहते हैं। उत्तम शब्द से यह बताया है कि यहज्ञान जाव के सम्बन्धवाला नहीं है तो यह ज्ञान उपनिषदों में कहा हुआ वा आध्यात्म रूप होगा ? तो कहते हैं कि नहीं, उससे भी उत्कृष्ट है यों बताने के लिए 'मन्महिमावभासं' विशेषण दिया है। जिस ज्ञान में मेरी पुरुषोत्तम स्वरूप की महिमा प्रकाशित हो रही है। महात्म्य को प्रतिपादन करने वाले गुण, कर्म, शक्तियाँ और अलौकिक सामर्थ्य, यह सब जिसमें प्रकाशित हो रहा है वह ज्ञान 'भागवत' है। यों लोक में प्रसिद्ध है सूरि (विद्वान) यों कहते है अतः इस शास्त्र में भी वादियों का नाम मात्र दिखावटी वाद है ॥१३॥

आभास—तत्कथयिष्यामिति तु नोक्तम्, वस्तुनिर्देश एव परं कृतः। 'नाऽपृष्टः कस्यचिद् ब्रूयात्' इति शास्त्रमर्यादा। वस्तुनिर्देश एव पृच्छेत्यस्य ज्ञापकः। अतोऽधिकारी भगवदभिप्रायं ज्ञात्वा पृष्टे वक्तव्यमिति पृष्टवानित्याह——

आभासार्थ—वह ज्ञान मैं (भगवान्) बताऊँगा, यों तो प्रभु ने कहा नहीं केवल वस्तु(विषय) का निर्देश ही किया' 'विना पूछे किसी को कहना नहीं चाहिए यह शास्त्र की मर्यादा है, विषय निर्देश से ही उद्धव को पूछने के लिए इंगित कर दिया है अतः जब अधिकारी पूछे तब कहना भगवान् की ऐसी इच्छा वा आज्ञा जानकर उद्धव पूछने लगा यों निम्न श्लोक द्वारा कहते हैं।

श्लोक—**इत्यादृतोक्तः परमस्य पुंसः प्रतिक्षणाऽनुग्रहभाजनोऽहम्।**
स्नेहोत्थरोमा स्खलिताक्षरस्तं मुञ्चन् शुचः प्राञ्जलिराबभाषे ॥१४॥

श्लोकार्थ—परम पुरुष का प्रतिक्षण अनुग्रह पात्र मैं इस प्रकार आदर किया हुआ और पूछने के लिए कहा हुआ तथा स्नेह से जिसके रोमाँच खड़े हो गए हैं, बोलते हुए अक्षर भी पूरे नहीं निकलते, ऐसा मैं अश्रुओं को गिराता हुआ हाथ जोड़ नम्रता पूर्वक उन (भगवान्) को कहने लगा ॥१४॥

सुबोधिनी—इत्यादृतोक्त इति। आदृतश्चासावुक्तश्च। 'वसो' इत्यादिसंबोधनपूर्वकं पूर्वकृतसेवानुवादादादृतः, वस्तुनिर्देशादुक्तश्च। आदृत एव वा उक्तः, 'प्रष्टव्यम्' इति। अन्यथोत्तरस्य वाग्व्ययरूपस्य क्लेशरूपत्वाद्भक्तस्य प्रश्नो न घटेत आज्ञायां तु सर्वथा कर्तव्य एव। तदुक्तमुक्त इति। आदरस्तु स्फुरणार्थः। अनेन प्रमाणबलं प्रमेयबलं च दत्तमित्युक्तम्। ततः किं जातमित्यत आह—**परमस्य पुंसः प्रतिक्षणानुग्रहभाजनोऽहं** जात इति। अहमेतावत्कालं कालस्य स्थितः, इदानीं परमस्य जातः। ननु कालोऽपि पर एव। तत्राऽऽह—**पुंस इति।** ज्ञानेनाऽक्षरभावो वा परशब्देन प्राप्तः पुरुषशब्देन निर्वार्यते किञ्च। न संबन्धित्वमात्रम्, किन्तु प्रतिक्षणानुग्रहभाजनः। भक्तं दृष्ट्वा भगवदनुग्रहस्य तरङ्गा उद्गच्छन्ति, तेषां भाजनं पात्रमहमेव जातः, न त्वचेतने समुद्रे तरङ्गाणां लय इव भगवत्येवाऽनुग्रहो लीन इति, निरन्तरं मद्विषयक एव जात इति वा। तदा भगवदनुग्रहस्य कार्यं मयि जातमित्याह—**स्नेहोत्थरोमेति।** अन्तर्भक्तिरसः पूर्णः। तदा स्नेहेनोत्थितानि सर्वाण्येव रोमाण्यवयवशः। सर्वत्रैवाऽङ्गे लोमशो देवताः सन्ति, ते भगवति सन्तुष्टे सर्वे सन्तुष्टा एवोस्थिताः। तत्रापि स्नेहेन महदस्य सुखं कर्त्तव्यमिति। स्खलिताक्षरश्च जातः, पदवाक्योच्चारणं दूरे, अक्षराण्यपि उच्चारयितुं धृतानि क्षरन्तीति। अनेन मर्यादा सर्वथाऽपि शान्ता, वाचः प्रयत्नपरित्यागात्। किञ्च, **मुञ्चन् शुचः।** नेत्राभ्यां शोकाश्रूणि मुञ्चन्। अनेन ससाधनं ज्ञानं पूर्वस्थितं निवृत्तमिति ज्ञापितम्। **प्रकृष्टोऽञ्जलिर्यस्य।** अञ्जलिमेव पुरतो निधाय विज्ञापितवान्। अनेन तस्य प्रश्नाधिकारः सूचितः। **आ** ईषद्भाषे यथा कथञ्चिन्मुखाद्वर्णा निःसृता इत्यर्थः ॥१४॥

व्याख्या—हे वसो ! इस संबोधन से पूर्वकृत सेवा का स्मरण कर मेरा आदर किया तथा वस्तु (विषय) का निर्देश कर आज्ञादी कि तुझे पूछना चाहिए, अन्यथा (बिना पूछे) यदि उत्तर दिया जावे तो केवल वह वाणी के व्यय समान होने से दुःख रूप होता है, फिर भक्त का प्रश्न करना ही न बने, आज्ञा मिलने पर सर्वथा आज्ञा का पालन करना ही चाहिए अर्थात् प्रश्न करना ही चाहिए। इसलिए 'उक्तः' कहा है, 'आदर' इसलिए किया कि वह स्फूर्ति हो कि क्या पूछूँ, इस तरह भगवान् ने प्रमाण बल तथा प्रमेय बल दोनों दिए है, इनके देने का फल क्या हुआ ? इस पर कहता है कि 'परमस्य पुंसः प्रतिक्षणानुग्रह भाजनोऽहम् जातः' परम पुरुष का प्रतिक्षण कृपा पात्र में बना इससे पूर्व, काल के आधीन था अब पुरुषोत्तम का हो गया हूँ काल भी तो 'पर' है, इस पर 'पुंसः' पद देकर स्पष्ट करते है कि 'पर' शब्द ज्ञान से अक्षर भाव को जताता है अर्थात् 'काल' अक्षर सम वा अक्षर रूप है और आप उससे उत्तम 'पुरुषोत्तम' हैं। मैं केवल यादव होने से संबन्धी नहीं हूं किन्तु प्रति क्षण कृपा पात्र हूँ। भगवान् जब भक्त को देखते है तब उनके हृदय रूपी उदधिमें अनुग्रह रूप तरंग उछलने लगती है। उनका पात्र में ही हुआ हूं। अचेतन समुद्र में तो तरंग फिर लीन हो जातो है किन्तु भगवत् हृदय चेतन होने से उसमें अनुग्रह तरंग लीन नहीं होती है, इतना ही नहीं प्रति क्षण उच्छवलित होती रहती है, जिससे वह अनुग्रह मत्संबन्धी ही हुआ। जब यों हुआ, तब भगवदनुग्रह रूप कारण का कार्य (परिणाम-भक्तिरस) मुझे प्राप्त हुआ, क्या प्राप्त हुआ ? इस पर कहता है कि 'स्नेहोत्थरोया' अन्तः करण भक्तिरस से पूर्ण हौ गया जिससे (स्नेह से) सर्व रोमांच (रोंगटे) खड़े हो गए। समग्र शरीर के प्रत्येक अग में जो रोम हैं वे देवता हैं। वे भगवान् के प्रसन्न होने पर स्वयं भी सन्तुष्ट होकर खड़ हो जाते हैं कि जिसको हमारे प्रभु ने प्रेमदान देकर सुखी किया है उसको हमभी सुख देवें। ऐसी रसपूर्ण अवस्था में पद, वाक्य कहना तो दूर रहा किन्तु अक्षर भी स्पष्ट नहीं कह सकता हूँ, इससे कहने की जो मर्यादा है वह शान्त हो गई अर्थात् बोलने का प्रयत्न करना छोड़ दिया फिर नेत्रों से आँसू बहाते हुए हाथ जोड़ प्रार्थना करने लगा। पहले जो साधन सहित ज्ञान था वह निवृत्त हो गया, प्रार्थना करते समय भी जैसे-तैसे मुख से अक्षर निकलने लगे, जिससे गद्-गद् वाणी से प्रार्थना की ॥१४॥

आभास—उद्धवः स्वाभीप्सितं प्रार्थयितुमन्यनिषेधं तत्र हेतुं चाऽऽह त्रिभिः। तत्र ब्रह्मणे मया भागवतं प्रोक्तमिति श्रवणे प्रायेणाऽयं मां ब्रह्माण्डान्तरे ब्रह्माणं करिष्यतीति प्रतिभातं निवारयति—

आभासार्थ—उद्धव अपना इच्छित पाने के लिए प्रार्थना करता है और अन्य फलों के लिए निषेध करता है कि वे मुझे नहीं चाहिए जिनके लिए तीन श्लोकों से हेतु भी बताता है। उद्धव के मन में यह विचार हुआ कि भगवान् कहते हैं कि मैंने ब्रह्मा को भागवत (ज्ञान) दिया, जिससे वह सृष्टि कर्ता ब्रह्मा बना, कदाचित मुझे भी यह ज्ञान देकर अन्य ब्रह्माण्ड में ब्रह्मा बनाएँगे यों मुझे भासता है, अतः उसके लिए निषेध करता हैं।

श्लोक—**को न्वीश ! ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह ।**
तथापि नाऽहं प्रवृमोमि भूमन् ! भवत्पदाम्भोजनिषेवणोत्सुकः ॥१५॥

श्लोकार्थ—हे ईश ! आपके चरण कमल के सेवकों को चारों पुरुषार्थों में से कौनसा पुरुषार्थ मिलना दुर्लभ है, कोई दुर्लभ नहीं सभी सुलभ हैं । तो भी हे भूमन् ! आपके चरणकमलों की सेवा का अभिलाषी मैं सेवा के सिवाय अन्य कोई पुरुषार्थ नहीं चाहता हूँ ॥१५॥

सुबोधिनी—**को न्वीशेति**। **ईशेति** संबोधनं सर्वसामर्थ्यबोधनाय। ते पादसरोजभाजां संबन्धिषु चतुर्ष्वप्यर्थेषु को नु दुर्लभः ? चरणरूपा पृथिवी, ब्रह्माण्डमपि पृथिव्यात्मकमेव, तत्तु प्राप्य दुग्धपानवत्सेव्यते । तत्रापि सरोरुहं जलोद्भवं पद्मम्, जलस्यापि फलरूपम् । अनेन सर्वमेव ब्रह्माण्डे स्थितं फलम्, तापापनोदश्च त्वद्भजने स्वतः सिद्ध अत्र तीर्थैकदेशे मुक्तिः प्रसिद्धा, लक्ष्म्येकदेशेऽर्थः प्रसिद्धः, फलत्वेन सेवनया कामः प्रसिद्धः विहितत्वाद्धर्मः सिद्ध एव । अतस्तेषां को वा दुर्लभः ? **ईशेति** । संबोधनादसाध्यमपि सिद्ध्यति । **चतुर्ष्वपीति** निर्द्धारवचनम् । अवान्तरभेदेन सर्व एवैतेष्वन्तर्भवन्तीति सूचितम्, तथापि सूक्ष्मतया प्राप्तमपि स्थूलतया प्राप्तव्यमिति चेत्तत्राऽऽह—**तथापि नाऽहं प्रवृणोमीति**। यदि भगवदिच्छा तथैव भविष्यति, तदा केन निवारयितुं शक्या । तथापि तन्नास्मदभिप्रेतम्, न वा याचनीयम् । किञ्च । न च ब्रह्मत्वं दुर्लभम्, बहव एव ब्रह्माणो जायन्ते, यतो भूमा भगवान् ब्रह्माण्डकोटिविग्रहः तत्र किमेकस्मिन् ब्रह्माण्डे स्थितेन ब्रह्मणा कार्यं भविष्यतीति, संपूर्णं परित्यज्य कोऽप्यंशग्रहणात् । अतोऽहं भवत्पदाम्भोजनिषेवणोत्सुक एव । चिन्तामणिवत्सर्वसाध्यापेक्षया साधनमेवाऽधिकम् न हि चिन्तामणिर्वस्त्र प्रयच्छतीति कश्चित् चिन्तामणिं परित्यज्य वस्त्रमिच्छति । तस्मात्किं ब्रह्मत्वेनेत्यर्थः ॥१५॥

सुबोधिनी—ब्रह्मशापापदेशेनेति। ब्रह्मशाप इत्यपदेशमात्रम्, किन्तु स्वाज्ञाकारिणा कालेन सर्वं कुलं संहृत्य आज्ञामपीच्छयैव कृतवान्। पश्चात्स्वयमेव सर्वमेव लोकं त्यजन्, बीजभावेन प्रवेशं कुर्वन्, एवमचिन्तयत्। तदाह—**अस्माल्लोकादिति।** निश्चयेन मया अयं लोकस्त्यक्तव्यः। तत्र गुणपञ्चकानां कार्यस्य जातत्वात् ज्ञानकार्यमवशिष्यते। तत्तु न ग्रन्थमात्रेण भवति, प्रत्यग्रसन्देहानां तत्राऽनिराकरणात्। अतः केनचित्पुरुषेण तत्प्रवर्त्तकेन स्थातव्यम्। तत्र ममाऽनन्तगुणत्वेऽपि, प्रचार्यमाणे ज्ञाने अहं वा, उद्धवो वा प्रचारणसमर्थो भवति। यतस्तत् ज्ञानं मद्विषयकमेव, न ह्यन्यो मां जानाति। अहं वा जानामि, '**भक्त्या मामभिजानाति**' इति ज्ञानपूर्णभक्तो वा। अत उद्धवं ज्ञानपूर्णं भक्तं ज्ञात्वा स्वस्थाने तं स्थापितवान्। किञ्च, तत् ज्ञानं मदाश्रयम्, मामेवाऽऽश्रित्य तिष्ठति, भगशब्दवाच्यगुणमध्यपातात्। शब्दाश्रितं तु

ज्ञानं वाक्यश्रवणात् सर्वस्यैवाऽधिकारिणो भवति इदं तु मय्येव हृदि स्थिते । मत्सङ्गेन समायाति नारदादयोऽपि शास्त्राश्रितमेव ज्ञानं समाश्रिताः, इदं तु पुष्ट्यात्मकम् । अहं तु स्वस्मिन् वा भक्ते वा तिष्ठामि, अतो भक्तोत्तमत्वात् साक्षादुद्धव एवाऽर्हति । ननु सन्ति ज्ञानिनोऽन्येपि भक्ताश्च, कोऽस्मिन् विशेष इत्याशङ्क्याऽऽह— **सम्प्रत्यात्मवतां वर इति**। सम्प्रति मज्ज्ञानधारकः कोऽपि नास्ति । अत्राऽङ्गत्रयमपेक्ष्यते; ज्ञानम्, भक्तिरतिजितेन्द्रियता च । तत्रयं कस्याऽपि नास्ति, एकेन द्वयेन वा नेदं ज्ञानं तिष्ठति । अयं च कालः सर्वनिबाऽजितेन्द्रियानेव करोति, तस्मादुद्धव एव सम्प्रत्यात्मवतां वरः ॥२९ ३०॥

किञ्च, **नोद्धवोऽण्वपि मन्न्यूनः** । ज्ञानाधारत्वार्थं ये गुणा अपेक्ष्यन्ते, ते मय्येव; उद्धवेऽपि सर्वे सन्ति सर्वप्रकारेण । अतोऽणुमात्रमपि मत्तो न्यूनो न भवति । तत्र प्रमाणमाह–**यद्गुणैर्नार्दित इति** । मज्ज्ञाने स एवाऽधिकारी यस्य गुणक्षोभो न भवति । गुणा हि बहुधा हृदये क्षोभमुत्पादयन्ति । किं बहुना, तत्क्षोभरहितो ब्रह्माऽपि न भवति, अतोऽयमेब गुणैर्नार्दितः । तत्र हेतुमाह– **प्रभुरिति** । प्रभुः समर्थः स्वभावनियन्ता, स एव शूर इत्युच्यते । शूर एव हि लोके प्रभुर्भवति । तथाऽस्मिन् शास्त्रे य एवं स्वभावं जयति, स एव प्रभुः ताह शश्वोद्धवः । क्षत्रियः, शूरः, सबन्धी पितृव्योऽपि भूत्वा नीचादपि नीचभावेनैव सेवते, अयमेव हि स्वभाव जयःइदमेव प्रभुत्वं भगवदवगतम् अतो **मद्वयुनं** मज्ज्ञानम्, **लोक**मधिकरिण ग्राहयन् भक्तिज्ञानोपदेशेन जितेन्द्रियत्वं च शिक्षयन् **इह** लोके तिष्ठतु । एवमचिन्तयदिति सम्बधः ॥३१॥

व्याख्या– ब्राह्मणों का शाप तो केवल बहाना (मिस) था । किन्तु अपने आज्ञानुसारी काल द्वारा अपने सर्व कुल का संहार कर पश्चात् स्वयं भी सर्व लोक का त्याग करते हुए अर्थात् अधिकारियों में बीजभाव से प्रवेश करते हुए, यों विचार करने लगे वह कहता है कि 'अस्माल्लोकादुपरते' निश्चय से अब इस लोक को प्रकट रूप से त्याग करना है किञ्च पांच गुणों का कार्य तो पूर्ण हुआ है, ज्ञान गुण का कार्य शेष रह गया है । वह तो केवल ग्रन्थों के पढ़ने से नहीं आता है कारण कि नवीन संशय उत्पन्न होते हैं उनका निराकरण ग्रन्थों में नहीं है, अतः यहां कोई ऐसा योग्य पुरुष होना चाहिए जो उसका (ज्ञान का) प्रचार करे । ज्ञानमें मेरे अनन्त गुण हैं तो भी जिस ज्ञान गुण (धर्म) का प्रचार करना है, उस ज्ञान के प्रचार (स्थापन) के लिए मैं अथवा उद्धव ही समर्थ हैं, अन्य कोई नहीं है। कारण कि वह ज्ञान मत्सम्बन्धी है । उद्धव के सिवाय दूसरा मुझे नहीं जानता है अथवा मैं स्वयं को जानता हूं। 'भक्त्यामामभिजानाति' इस गीता वाक्यानुसार ज्ञान पूर्ण भक्त मुझे जानता है । अतः उद्धव को ज्ञानपूर्ण भक्त जानकर अपने स्थान पर उसकी स्थापना की, किन्तु वह ज्ञान मेरा आश्रय करके ही रहता है । 'भग' शब्द से जो मेरे ६ गुण कहे गए हैं उनमें 'ज्ञान' भी मेरा एक गुण है, शब्द का आश्रित जो ज्ञान है वह वाक्यों के (शास्त्र वचनों के) श्रवण से सब अधिकारियों को प्राप्त हो जाता है यह ज्ञान तो मदाश्रित होने से जब में हृदय मैं आकर स्थित होता हूँ तब मेरे साथ आता हैं, नारदादिकों को भी जो ज्ञान है वह शास्त्राश्रित ज्ञान है वह ज्ञान तो पुष्टिरूप (अनुग्रहात्मक) ज्ञान है । मैं तो अपने स्वरूप में वा

भक्त में रहता हूँ। अत: भक्तों में उत्तम भक्त होने से उद्धव ही इस ज्ञान लेने का अधिकारी हैं, दूसरे भी ज्ञानी और भक्त हैं। इसमें उनसे क्या विशेषता है। इस पर कहा है कि 'सम्प्रत्यात्मवताम् वर:' इस समय आत्मवेत्ताओं में यह उत्तम है और अन्य कोई भी मेरे ज्ञान को धारण करने वाला नहीं है, इस ज्ञान के तीन अंग है ज्ञान, भक्ति और पूर्ण जितेन्द्रियता। ये तीन किसी में भी नहीं है किसी में एक हो वा दो हो तो भी यह ज्ञान नहीं ठहरता है। यह काम ऐसा है सब को ही अजितेन्द्रिय कर देना है। इस कारण से तीनों गुणों से युक्त इस समय एक उद्धव ही आत्मवेत्ताओं में श्रेष्ठ है ।।२९,३०।

किन्तु ज्ञान का आधार बनने के लिए जिन गुणों की अपेक्षा है वे मुझमें ही हैं तथा उद्धव में भी सर्व प्रकार से सब गुण हैं, अत: मुझ मे उद्धव अणुमात्र भी न्यून नहीं हैं। उसमें प्रमाण देते है कि गुण उद्धव को अपने वश में नहीं ला सकते हैं जिससे वह गुणाधीन न होने से उनसे पीड़ित नहीं होता है। अर्थात संसार में डूबता नहीं है, इस मेरे ज्ञान का वही अधिकारी है. जिसको गुणों से क्षोभ नहीं होता है गुण ही बहुत कर हृदय में क्षोभ करते हैं बहुत क्या कहें गुणों के क्षोभ से ब्रह्मा भी नहीं छूटा है। केवल यह (उद्धव) ही गुणों से क्षोभ नहीं पाता है। उसमें कारण बताते है कि 'प्रभु' समर्थ है स्वभाव को नियम में रख सकता है जो स्वभाव को नियम में रखे वह ही शूर है। शूर ही लोक में प्रभु (समर्थ) होता है तथा इस शास्त्र में जो इस प्रकार स्वभाव को जीतता है वह ही प्रभु (समर्थ) है। वैसे उद्धव ही हैं, क्षत्रिय हैं, शूर हैं, सम्बन्धी हैं और पितृत्य (काका) होकर भी नीच से नीच भाव से (दीन से दीन भाव से) सेवा करते हैं। यह ही स्वभाव को जीतना है भगवान् ने इसको ही प्रभु (समर्थ) माना है। अत: मेरा ज्ञान अधिकारी को ग्रहण कराता हुआ भक्ति तथा ज्ञानोपदेश से जितेन्द्रियत्व सिखाता हुआ इस लोक में रहे, यों भगवान् ने विचारा यों (वाक्य का) सम्बन्ध है ।।३१।।

आभास—ततो भगवता आज्ञप्तस्तथैव कृतवानित्याह—

आभासार्थ—पश्चात जैसे भगवान् ने आज्ञा दी थी वैसे ही करने लगे। यों इस श्लोक में कहते हैं—

श्लोक—एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना ।
बदर्याश्रममासाद्य हरिमीजे समाधिना ।। ३२ ।।

श्लोकार्थ—वेद कर्ता तीन लोकों में जगद्गुरु की इस प्रकार की आज्ञा पाकर उद्धव बदरिकाश्रम जाकर समाधि से हरिका पूजन करने लगा ।।३२।।

सुबोधिनी—एवं त्रिलोकगुरुणेति । एवमेव प्रमेयंबोधयित्वा त्वं तिष्ठेत्याज्ञप्तः, **'आज्ञा गुरूणां ह्यविचारणीया'** इति ममैतदसाध्यमिति ज्ञात्वाऽपि, जगद्गूरुवाक्यं स्वशक्त्यनुसारेण कर्त्तव्यमिति कृतवान् ननु भगवानेव सर्वनिवानधिकारिणो ज्ञात्वा किमित्युद्धवं स्थापितवानित्याशङ्क्याऽऽह—**शब्दयोनिनेति** । स हि वेदकर्ता, सर्वाधिकारेण पदार्थान्, वदति । यत्रैव तदधिकारेणाऽऽविशति, स्वयं स एवाधिकारी भवतीति, नास्याऽधिकाराऽनधिकारविचारः कश्चन । **'प्रजापतिरात्मनो वपामुदखिदत्'** इत्युपक्रम्य **'स एतं प्राजापत्यमजं तूपरमालभेत'** इत्याह । न ह्येतादृशस्तूपरः केनचिदुत्पादयितुं शक्यते । तथापि सर्वप्रकारेण क्रीडां कुर्वन्, एतत्कर्मणि यमेव यजमानं कृत्वा क्रीडितुं वाञ्छति, तमेव स्वप्रवेशेन तथा करोति । अतोऽत्रापि शब्दयोनिनोपदिष्ट इति, बदरिकाश्रमे गत्वा, भगवदुक्तार्थसिद्ध्यर्थं साधनान्तरमलभमानः, सर्वदुःखहर्तारं भगवन्तं स्वमनःक्लेशमपि निवारयिष्यतीति समाधिना तमीजे । अतो भगवदाज्ञया स्थित इति न शापादेर्बाधकत्वम्, न वा साधकत्वम, यादवभावत्यागोऽपि न परमार्थतः, इदानीमपि भगवतो यादवत्वात्, तथैव भक्तानामनुभवात् । लोकप्रतीत्या लीलायामपि स्वैच्छयैव तथात्वम् ॥३२॥

व्याख्या—इसी तरह हरि ने उद्धव को प्रमेय (ज्ञान) समझाकर आज्ञा की कि तू यहां ठहर। यह आज्ञा पाकर उद्धव ने विचारा कि, यह आज्ञा पालन मुझसे होना कठिन है किन्तु 'आज्ञा गुरूणाम ह्य विचारणीया' गुरुओं की आज्ञा पाकर बिलकुल न मानना उचित नहीं है कुछ न कुछ वह तो माननी ही है। अतः जगद्गुरु की आज्ञा स्वशक्ति के अनुसार पालन ही करनी चाहिए। यों निश्चय कर आज्ञा का पालन करने लगा। भगवान् ने जब सबको अनधिकारी जाना तब उद्धव को ऐसे कार्य के लिए कैसे स्थापित किया ? इस शंका के उत्तर में कहते हैं कि 'शब्दयोनिना' वह भगवान् ही वेद के रचयिता हैं। सर्व के अधिकारानुसार पदों के अर्थो को कहते हैं जहाँ (जिसमें) ही उसके अधिकारानुसार आप प्रवेश करते हैं वह ही अधिकारी बन जाता है इसलिए भगवान् को अधिकार वा अनधिकार देखने की आवश्यकता नहीं है 'प्रजापतिरात्मनोवपामुदरिवदत् इत्युपक्रम्य' सएत प्रजापत्यमजंतूपरमालभेत' इत्याह, अर्थात् प्रजापति ने अपनी चर्बी खेंचली, यहाँ से प्रारम्भ कर उसने इस प्रजापति से बना हुआ तूपर इस प्रकार का खिलोना प्राप्त किया। इसी प्रकार तूपर कोई बना नहीं सकता है, तोभी उसमें ही सर्व प्रकार से क्रीड़ा करते थे कर्म में जिसको ही यजमान बनाकर क्रीड़ा करना चाहते हैं। उसको ही अपने प्रवेश से वैसा बना देते है, अतः यहाँ भी वेद कर्ता ने उपदेश दिया है कि बदरिकाश्रम में जाकर भगवद्भक्ति कार्य की सिद्धि के लिए दूसरा साधन बन सके। अत सर्व दुःख हर्ता भगवान् अपने मन के क्लेष को भी दूर करेगा। इसलिए समाधि मे उनका पूजन किया अतः भगवदाज्ञा से यहाँ ठहरे हैं इससे शापादि इसमें बाधक नही हो सकते हैं वा न साधक हो सकते हैं। यादव भाव का त्याग भी वास्तविक नही है। अब भी भगवान् यादव हैं ऐसे भक्तों के अनुभव से जाना जाता है। लोक प्रतीति से लीला में जो कर दिखाया (आकृति संवारण) वह भी स्वेच्छा से ही किया है, शापादि से नहीं।३२॥

आभास—एवं प्रासङ्गिकं परिहृत्य प्रस्तुतमाह—

आभासार्थ—प्रसंग से की हुई कथा को इस प्रकार पूर्णकर अब इस निम्न श्लोक से चालू कथा को कहते हैं—

श्लोक—**विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मन ।**
क्रीडयोपात्तदेहस्य कर्माणि श्लाधितानि च ।।३३।।

देहन्यासं च तस्यैवं धीराणां धैर्यवर्धनम् ।
अन्येषां दुष्करतमं पशूनां विक्लवात्मनाम् ।।३४।।

आत्मानं च कुरुश्रेष्ठ ! कृष्णेन मनसा धृतम ।
ध्यायन् गते भागवते रुरोद प्रेमविह्वलः ।।३५।।

कालिन्द्याः कतिभिः सिद्ध अहोभिर्भरतर्षभ ! ।
प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ।।३६।।

श्लोकार्थ—क्रीड़ार्थ देह धारण करने वाले परमात्मा श्री कृष्ण के प्रशंसीय कर्म धीर पुरुषों के धैर्य को बढ़ाने वाले तथा भयभीत पुरुषों से एवं पशुओं से जो कार्य न होने वाले तथा उसके देह त्याग का अपूर्व प्रकार उद्धव से सुना और हे कौरवोत्तम श्री कृष्ण के मन की बात भी सुनी, अनन्तर जब उद्धव रवाना हो गए तब सब बातों का ध्यान करते हुए विदुर प्रेम विह्वल हो रोने लगा, हे 'भरतर्षभः' कितने हो दिन कालिन्दी द्दर बिराज, सान्त्वनासिद्ध की, पश्चात् मित्रा का पुत्र (मैत्रेय) जहाँ देव नदी पर था वहाँ कुशलता से प्राप्त हुआ ।।३६-३६।।

सुबोधिनी—विदुरोऽपीति । सिद्धान्तस्याऽनुक्तत्वात् विपययमायासबन्धस्तत्राऽपि सिद्धः । अतस्तच्छेषत्वेन विदुरकथाऽपि कथ्यते । अत एवाऽग्रे विदुरोऽन्यथा । वक्ष्यति '**स एष भगवान् कालः सर्वेषां नः समागतः**' इति । यथोद्धवो बदरिकाश्रमं गतः, एवं विदुरोऽपि "**प्रापद्यत स्वःसरितम्**' इति संबन्धः । मध्ये स्वस्य सम्यक् ज्ञानं नास्तीति ज्ञापयितुम, भागवते उद्धवे निर्गते स्वयं प्रेम्णा विह्वलः सन् रुरोद । रोदनहेतवश्च भगवच्चरित्रश्रवणम्, भगवन्मोहकलीलाश्रवणम् भक्तेषु भगवत्कृपाश्रवण च । सात्विकमेतत् । आद्यं राजसम् । अतस्त्रिभिरपि त्रिविधप्रेमोद्गमात् रोदनम् । उद्धवमुखाच्छ्रुतत्वात् । नाऽन्यथाभावशङ्का । लोकप्रसिद्धयनुसारेण च पदार्थान्नि-

रूपयति—**कृष्णस्येति** । चरित्राणां भक्तिजनकत्वाय स्वरूपमाहात्म्यमाह—**परमात्मन इति** । विदुराधिकारेणैवमुक्तम्, स्मृत्यनुसारेणैव तस्य भगवत्स्वरूपज्ञानात् । परमात्मा पुरुषोत्तमः । आत्मा भूत्वा स एव परमः । चिन्तामण्यादेर्लोकप्रतीत्या परमत्वेऽपि नाऽऽत्मत्वम् न वा जीवस्य परमत्वम्; अत उभयप्रकारेण भगवानेव ज्ञायत इति तथोक्तम् । क्रीडया बालकनटवत् कपटमानुषवेषं कृतवान्, तदेवोपात्तदेहत्वेनोच्यते । तादृशस्य सर्वैरेव श्लाघितानि कर्माणि भूभारहरणादीनि, गोवर्द्धनोद्धरणादीनि वा । **चकारात्** गुप्तान्यपि, अद्भुत चरित्रं गिपिकारमणं वा ।।३३।।

व्याख्या—सिद्धान्त न सुनने के कारण विपरीत ज्ञान और माया का सम्बन्ध विदुर को भी हुआ था अतः उसके शेष भाग रह जाने से विदुर की कथा भी कही जाती है इस कारण से ही आगे विदुर अन्यथा (विपरीत) कथा कहेगा । 'स एष भगवान् काल सर्वेषान: समागतः अर्थात् वह यह काल रूपी भगवान् सबके लिए आया है । जैसे उद्धव बदरिकाश्रम गए वैसे ही विदुर भी देव नदी पर गया, मध्य में जब तक वहाँ कालिन्दी पर था तब तक मुझे पूर्ण ज्ञान नहीं हुआ है यह प्रकट करने के लिए भगवदीय उद्धव के जाने पर स्वयं विदुर प्रेम से विह्वल होकर रोने लगा । रोने का कारण भगवान् के जो चरित्र सुने थे उनकी स्मृति हो आने से प्रेम उभरा जिससे रोने को रोक न सका क्योंकि चरित्रों में जो भगवान् की मोहक लीलाएँ सुनी थी और भक्तों पर भगवान् ने लीलाओं द्वारा दुःख दूर कर कृपा की थी वे चरित्र भी सुने थे । ये चरित्र सात्विक राजसादि त्रिविध थे अतः त्रिविध प्रेम बढ़ आया जिससे रोने लगा । यह भी शंका मन में न हुई कि ये सच्चे होंगे वा नहीं ? क्योंकि उद्धव के मुंह से सुने थे अतः सच्चे ही हैं यह निश्चय था ।

लोक प्रसिद्धि के अनुसार पदार्थों का निरूपण करते हैं । श्री कृष्ण के चरित्र भक्ति जनक हैं । इसलिए स्वरूप के महात्म्य दिखाने के लिए 'परमात्मन' नाम कहा है । विदुर के अधिकार से ही यों कहा है, स्मृत्यनुसार ही उसको भगवत्स्वरूप का ज्ञान है । परमात्मा का तात्पर्य है 'पुरुषोत्तम' आत्मा होकर वह ही परम (उत्तम) है । चिन्तामणि आदि भी लोक प्रतीति से उत्तम हैं किन्तु उनमें आत्मापन नहीं है और जीव में भी परमत्व नहीं हैं । अतएव दोनों प्रकार से भगवान् ही जाना जाता है । इसलिए उसी तरह 'परमात्मन' नाम कहा है । जैसे बालक नट का रूप धारण कर राजा, सेवक और चोर बनते हैं वैसे ही भगवान् ने बालक के समान कपट मानुष रूप धारण किया, जिसको ही लोक में भगवान ने देह धारण किया कहते हैं । उस लीला तनु से ही सब भू भार हरणादि कार्य और गोवर्द्धन धारण आदि लीलाएँ की 'च' पद से गुप्त चरित्र जैसे गोपिका रमण आदि अद्भुत चरित्र हैं ।।३३।।

सुबोधिनी—देहन्यासमिति । देहस्य न्यासः कारणे स्थापनम्, शब्धच्छलेन नटवत् त्यागो वा **एवमिति** श्रुतप्रकारेण । **धीराणां** वैराग्यानुसन्धानानाम् । **धैर्यं** साहसम्, सर्वपरित्यागेनैवं योगेनै-

वैतत्त्याज्यमिति । स्वरूपे गत इति फलप्रदर्शनादवान्तरक्लेशो नाऽनुसन्धेय इति धैर्यवर्द्धनम् । **अन्येषामविवेकिनां** देहात्ममानिनां दुष्करतमम्, न ह्येवं कश्चित् कर्तुं शक्तः । तत्रापि **पशुनाम**ग्रिमहिताहितविवेकानुसन्धानरहितानाम् । तत्रापि **विक्लवात्मनाम्**, विक्लव आत्मा येषाम्, वैक्लव्यमेव येषामन्तःकरणधर्मः सहजः मौर्ख्येणाऽपि येषां साहसाभावस्ते पशुभ्योऽपि विशिष्यन्ते ।।३४।।

व्याख्या 'देह न्यास' देह का कारण में स्थापन करना अथवा शब्द के छल से नट की तरह किया हुआ त्याग, उद्धव से जिस तरह सुना वैराग्य का जिनका ध्यान है ऐसे धीर पुरुषों का धैय (साहस) बढ़ाने वाला जैसे सर्व परित्याग किया वैसे योग से ही इस स्वरूप का भी त्याग करना चाहिए । स्वरूप के तिरोहित होने से फल का प्रदर्शन हो गया जिससे दूसरे किसी क्लेश का अनुसन्धान नहीं करना चाहिए इसलिए यह लीला धैर्य बढ़ाने वाली है जो देहात्मवादी अविवेकी है उनको इससे धैर्य होना अत्यन्त दुष्कर है । इस प्रकार अन्य कोई करने के लिए समर्थ नहीं है । पशु अर्थात् जो अपने हित, अहित को पहले से ध्यान में नहीं लाते हैं, उनमें भी जिनके अन्तःकरण मे सदैव मरने का भय रहता है । ऐसे मूर्ख मनुष्य जो मूर्खता से भी ऐसा साहस नहीं कर सकते हैं वे पशुओं से गए गुजरे हैं ।। ३४ ।।

सुबोधिनी—**किञ्च, आत्मानं** च भगवता **मनसा** धृतमिति श्रुत्वा । **कुरुश्रेष्ठेति** संबोधनं तत्पूर्वजैः कृतानि पुण्यान्येवं वंशीयेषूतिष्ठन्त इति ज्ञापनार्थम् **चकाराद्**उपदेशनार्थं मैत्रेयाज्ञापनम् । न केवलं स्मरणमात्रम्, किन्तु मनसि स्थापितम् । **'ये यथा मां प्रपद्यन्ते'** इति न्यायव्यतिरेकेणाऽपि बहिर्मुखेऽपि भक्ते पलायमानमपि मनसा धृतम् । तादृशं कृपापात्रमात्मानं ध्यायन, गुणान्तर–कथनाभावात् गते भागवते । रुरोद । प्रेम्णा च विह्वलो जातः, मूर्च्छितोऽभूदित्यर्थः ।।३५।।

व्याख्या—विदुरने यह भी सुना कि भगवान् ने मन में मुझे भी याद कर रखा है अर्थात् मेरे हित का भी भगवान् को ध्यान है । हे कुरु श्रेष्ठ ! यह संबोधन इसलिए दिया है कि उसके पूर्वजों के किए हुए पुण्य कर्म, इसी प्रकार उनके वंशजों के भीतर होने से उपयोगी होंगे 'च' पद से यह सूचित किया है कि मुझे (विदुर को) उपदेश देने के लिए मैत्रेय को भी आज्ञा दे दी है । केवल स्मरण नही किया था किन्तु मुझको मन में स्थापित किया है 'ये यथा माँ प्रपद्यन्ते' इस सिद्धांत के विपरीत वहिमुर्ख वा जो पलायन कर गया हो उसको भी हृदय में रखा ऐसे उद्धव से सुना । अतः उस भगवत्कृपा पात्र और ध्यान करते हुए का उद्धव भगवान् के अन्य भी गुण थे वे नहीं सुना सके अब तो वे भगवदीय पधार गए यों कह के रोने लगे । प्रेम से विह्वल हो मूर्छित हो गए यों भावार्थ है ।।३५।।

सुबोधिनी—ततो मूर्च्छायां भगवान् समागत्य सर्वमुपदिश्य गत इति सिद्ध एव भूत्वा, ज्ञानादिसम्पन्नो मूर्च्छात्उत्थाय, कालिन्द्यास्तीरात् निधिस्थानात् । प्राप्तपुरुषार्थः **कतिभिरेवाऽहोभिः स्वःसरितं प्रापद्यत्** । अयं मोहभावो मानुषाणामेव, न तु देबानाम् । देवत्वप्रापिका च गङ्गा, अतोऽत्र विद्यमानाऽपि स्वःसरिदव **भरतर्षभेति** सम्बोधनं फलपर्यवसायिविवेकस्य प्राप्तत्वान्न तस्य मायामोह इति सूचकम् । **अहोभिः कतिभिरिति** प्रतिबन्धककालापगमार्थमुक्तम् । **प्रकर्षेणाऽपद्यतेति** मध्ये क्लेशाभाव उक्तः । तत्र गमने हेतुमाह—**यत्र मित्रासुतो मुनिरिति** । जगन्मित्रायाः पुत्रोऽपि तादृशः, स्वस्वभावादेव सर्वान् कृतार्थान् करिष्यतीति । तस्याऽन्यत्रगमनशङ्कां वारयति–**मुनिरिति** । स हि मननशीलः, जानाति च विदुरः समायास्यतीति । एतादृश एव देशो वक्ता च भगवत्कथायां फलसाधक इति ज्ञापितम् ॥३६॥

व्याख्या– प्रेम से विह्वल हो से जब विदुर मूर्छित हुए तब भगवान् पधार कर सकल उपदेश सुना के तिरोहित हो गए । इस प्रकार सिद्ध होकर ज्ञानादि से युक्त हो मूर्छा से जगे, उठकर निधि प्राप्ति के स्थान कालिन्दी के तट से पुरुषार्थ प्राप्त कर कितने ही दिनों में देव नदी पर सुख पूर्वक आ पहुँचे

यह मोह भाव मनुष्यों को ही होता है देवताओं को नहीं होता है । गंगा मनुष्य को देव बना देती हैं अतः यह विद्यमान होते हुए भी 'देव नदी' ही कही जाती है । भरतर्षभ: ! इस सम्बोधन से यह सूचित किया है कि फल में प्राप्त होने वाले विवेक का परीक्षित ने प्राप्त कर लिया है अतः उसको माया मोह नहीं है कितने ही (थोड़े ही) दिनों में कहने का तात्पर्य है मध्य में किसी प्रकार प्रतिबन्ध (रुकावट करने वाला) काल नहीं आया अतः बिना क्लेश के सुख पूर्वक वहां (देव नदी पर) पहुँच गए । वहां जाने का कारण यह था कि जगत् की मित्रा के पुत्र मैत्रेय भी जगत् का हित करने वाले थे । वहां स्वस्वभाव से ही सबको कृतार्थ करेंगे (करते हैं) (मुझे भी करेंगे) दूसरे स्थान पर क्यों न गए ? इस शंका का निवारण करता है कि वह मुनि भी हैं और जानते हैं कि विदुर उपदेशार्थ मेरे पास आएगा, ऐसा ही देश और वक्ता भगवत्कथा में फल साधक होता है, यों जताया है ॥ ३६ ॥

इति श्रीमद्भागवत महापुराण के तृतीय स्कन्ध चतुर्थ अध्याय की
श्रीमद्वल्लभाचार्य चरण विरचित श्री सुबोधिनी (संस्कृत टीका)
हिन्दी अनुवाद सहित सम्पूर्ण ।

॥ श्री कृष्णाय नमः ॥

॥ श्री गोपीजनवल्लभाय नमः ॥

॥ श्री वाक्पतिचरणकमलेभ्यो नमः ॥

श्रीमद्भागवत महापुराण

तृतीय स्कन्ध

श्री मद्वल्लभाचार्य-विरचित सुबोधिनी (संस्कृत टीका) हिन्दी अनुवाद सहित

भगवत्कृत सर्ग (बन्ध सृष्टि) प्रकरण

"अध्याय"—५

विदुरजी का प्रश्न और मैत्रेयजी का सृष्टिक्रम वर्णन

कारिका—**चतुर्णां सर्ग आद्योऽत्र ह्यधिकारे निरूपितः ।**
पुरुषत्वाय कृष्णस्य चतुर्भिः सर्ग ईर्यते ॥१॥

कारिकार्थ—इम तृताय स्कन्ध में अधिकार विषयक चार की आद्य सृष्टि कही, श्रीकृष्ण के पुरुषरूप से प्रकट होने के लिए चार से सृष्टि कही जाती है ॥१॥

कारिका—**स एव भगवल्लीलां श्रोतुमर्हति तत्त्वतः ।**
अन्यथाऽन्यो हिमनुते ह्यधिकारस्ततो हितः ॥२॥

कारिकार्थ—वह (ऐसा अधिकारी) ही वास्तव में भगवल्लीला श्रवण करने के योग्य है क्योंकि दूसरा (अनधिकारी) तो इसको (भगवल्लीला को) कल्पित मानता है, इसलिए अधिकार ही हितकर होना आवश्यक है ॥२॥

कारिका—**कृष्णार्थसृष्टौ भूतानि जातान्येवेति निश्चयः ।**
वेदे पञ्चभिरेवाऽस्य पुरुषत्व कथोदिता ॥३॥

कारिकार्थ—कृष्णार्थ उत्पन्न सृष्टि में, उत्पन्न होने मात्र से ही महाभूत हैं यों निश्चय है। वेद में न इनके (श्री कृष्ण के) पुरुषत्व की कथा आकाशादि पाँच की उत्पत्ति से ही कही है ॥३॥

कारिका—**त एव बहुधा व्यस्तास्तस्मात्तत्त्वानि तानि वै ।**
भोगः शरीर एवेति मात्रास्तत्र निरूपिताः ॥४॥

कारिकार्थ—उन पाँचों (आकाशादि) का बहुत प्रकार से अर्थात् २३ तत्व रूप से पृथक्-पृथक् वर्णन किया है। भोग शरीर[1] में ही होता है इसलिए छठे अध्याय में ही 'मात्राओं' का निरूपण किया है ॥४॥

कारिका—**नानाविधानि शास्त्राणि तैः सन्देहविनिश्चयौ ।**
मनो भगवतो ह्युक्तं तेनैवेन्द्रियसंकथा ॥५॥

कारिकार्थ—शास्त्र अनेक प्रकार के हैं उनसे सन्देह और निश्चय होता है इनको भगवान् का मन कहा गया है। जिस अनुमान से सन्देह और निश्चय करने वाले शास्त्रों को मन कहा है उसी अनुमान से शेष अन्यों को इन्द्रियाँ कही हैं ॥५॥

कारिका—**बुद्धिर्भगवतो ब्रह्मा तत्कार्यं च निरूप्यते ।**
स्तुति प्रसादौ कार्याणां भूतानीत्येष निश्चयः ॥६॥

कारिकार्थ—ब्रह्मा भगवान् की बुद्धि है उसका कार्य निरूपण किया जाता है। ९ वें अध्याय में कार्यों की स्तुति तथा प्रसाद (प्रसन्नता) कही है अतः वे महाभूत[2] ही हैं यों निश्चय है ॥६॥

कारिका—**ततस्तेषां शरीराणि मात्रा एव हरेर्यथा ।**
काल एवेन्द्रियाण्येषां तत्राऽऽसक्तो म्रियेत वै ॥७॥

कारिकार्थ—इस कारण से जैसे हरि के वैसे उनके शरीर तन्मात्रा ही है, उनकी इन्द्रियाँ ही काल हैं। उनमें जो आसक्त होता है वह मरेगा ही ॥७॥

कारिका—**बुद्धिस्तेषां महात्मानो वेदा मन्वादयस्तथा ।**
तत्रोक्तैरेव यद्युक्तमुक्तं तेषां हिताय तत् ॥८॥

कारिकार्थ—वेदों (मन्त्रादि) एवं मनु आदि महात्मा गण उनकी बुद्धि है अतः वेदादि एवं मनु आदि महात्माओं ने जो कुछ कहा है वह उचित ही है क्योंकि उनके लिए हितकारी है। ८॥

कारिका—**कार्योपयोगितत्त्वानामुपक्रमे विनिरूप्यते ।**
उत्पत्तिर्यादृशैः कार्यं तद्भावश्च निरूप्यते ॥९॥

---

[1] —ब्रह्माण्ड रूप शरीर में ।

[2] --ब्रह्माण्डस्थ व्यक्ति पृथक् और साथ में रहने से तथा स्तुति, प्रसाद ऐसे ये ४ कार्य सृष्टि में महाभूत ही कहे जाते हैं ।

कारिकार्थ—कार्योंपयोगी तत्वों की उत्पत्ति और जिनसे कार्य सिद्ध हो वैसी स्थिति पांचवें अध्याय में निरूपण की जाती है ॥९॥

कारिका—**प्रश्नभिनन्दने चाङ्गं सर्व चैव हरेः कृतौ ।**
अतोऽत्र भगवत्प्रश्नः षड्विधो विनिरूप्यते ॥
वैराग्यादि; स्टष्टिमार्गे विपरीत प्रवेशतः ॥१०॥

कारिकार्थ—हरि के कार्य में सर्वत्र ही प्रश्न और उसका अभिनन्दन अंग है सृष्टि के मार्ग में विपरीत रीति से प्रवेश होने से भगवत्सम्बन्धो वैराग्यादि का प्रश्न ६ प्रकार से निरूपण किया जाता है ॥१०॥

आभास—तत्र प्रथमं तयोः कथार्थं संबन्धमाह—

आभासार्थ—इस विषय में प्रथम उन दोनों (विदुर और मैत्रेय) की कथा कहने के लिए उनके सम्बन्ध का वर्णन करते हैं ।

श्रीशुक उवाच—श्लोक—**द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम्**
क्षत्तापेसृत्याऽच्युतभक्तिशुद्धः पप्रच्छ सौशील्यगुणाभितृप्त ॥१॥

श्लोकार्थ—श्रीशुकदेवजी ने कहा कि अच्युत भगवान् की भक्ति से पवित्र, जितेन्द्रिय, कौरवों में श्रेष्ठ (विदुरजी) गंगा के द्वार अर्थात् ब्रह्मकुण्ड पर विराजमान अगाध ज्ञानवाले मैत्रेयजी के पास जाकर, उनके सुशीलता आदि गुणों से पूर्ण तृप्त (प्रसन्न) होके पूछने लगे ॥१॥

सुबोधिनी—द्वारीति । सर्वेषां देवत्वसिद्ध्यर्थं या देवनदी प्रवृत्ता, सा प्रथमत एव समीचीनं कार्यं करिष्यातीति भगवदाज्ञया मैत्रेयस्तत्रैव स्थितः । गङ्गाद्वारि ब्रह्मकुण्ड एवेति मे मतिः, अन्तर्वेद्यां भगवत्सान्निध्यात् । **कुरूणा मृषभ** इति महानुद्योगः फलपर्यवसायी तस्य लक्ष्यते । **मैत्रेयो** हितकर्ता । **आसीनोऽव्यग्रः** । अगाधा बोधौ यस्येति स्वबुद्धेस्तत्र **निमज्जनं** संभविष्यतीति सूचितम्, अन्यथा न **सर्वसन्देहनिवृत्तिः** । क्षत्ता प्रथमत एव जितोन्द्रियो विचक्षणश्च । अच्युता या अच्युते भक्तिः, तया शापाधिकारादिबीजपात–योनिदोषादिसर्वाशुद्धिनिवृत्त्या शुद्धः । **उपसृत्य** समीपे गत्वा, विध्यनुसारेण वा । मैत्रेयस्याऽऽर्जव–करुणादयः सौशील्यगुणास्तैरभितृप्तः । कथं वक्ष्यति नवेति सन्देहरूपा क्षुद् गुणैर्निवृत्तेति तादृशो भूत्वा पप्रच्छेत्यर्थः ॥१॥

व्याख्या—सर्वों के देवता सिद्धि के लिए प्रवृत्त हुए जो देव नदी, वह मुझसे भी पहले ही समीचीन (उचित) कार्य कराएगी इसलिए भगवदाज्ञा से मैत्रेय वहाँ ही जाकर 'गंगाद्वार' पर ठहर गए अर्थात् ब्रह्मकुण्ड पर ही बिराजे यों मेरा विचार है, वहाँ रहने का कारण यह है कि, उस

स्थान पर भगवान् का सदैव सान्निध्य रहता है, 'कौरव श्रेष्ठ' कहने का भावार्थ यह है कि इस (विदुर) ने जो साहस (उद्यम) किया है उसका फल अवश्यम्भावी है 'मैत्रेय' नाम से यह सूचित किया है कि वे सब के हितकारी हैं और शान्त बैठे हैं किसी प्रकार व्यग्र नहीं हैं और अगाध बोध (ज्ञान) वाले हैं इससे यों जताया है कि मेरी (विदुर की) बुद्धि (ज्ञान) इनके ज्ञानोदधि में डूब जाएगी अर्थात् मेरे सर्व संशय मिट जाऐंगे 'क्षत्रा' कहने का अभिप्राय है कि वह पहले से ही जितेन्द्रिय एवं निपुण हैं। अच्युत भगवान् की भक्ति से शाप अधिकारादि तथा बीजपात योनि दोषादि से अशुद्ध थी वह सर्व अशुद्धि मिट गई है, जिससे शुद्ध हो गया है, ऐसा विदुर पास जाकर और विधि के अनुसार समीप गया तो उसके सुशीलतादि गुणों से पूर्ण तृप्त (प्रसन्न) हो पूछने लगा क्योंकि यह बताएगा वा नहीं ? ऐसी सन्देह रूप जो क्षुधा थी वह गुणों के ज्ञान होने से निवृत्त हो गई (मिट गई) ॥१॥

आभास—षट्प्रश्नेषु वैराग्यार्थं क उपायः कर्तव्यः ? इति प्रश्नं कुर्वन् स्वभावतो वैराग्यहेतोरप्रयोजकत्वमाह—

आभासार्थ ६ प्रश्नों में से एक प्रश्न 'वैराग्य है, जिसके लिए कौनसा उपाय करना चाहिए यों प्रश्न करते हुए भी स्वभावतः वैराग्य के कारणों का इसके लिए कोई प्रयोजन नहीं है, क्योंकि यह स्वतः वैराग्यवान् है--

विदुर उवाच–श्लोक–**सुखाय कर्माणि करोति लोको न तैः सुखं चाऽन्यदुपारमं वा**
विन्देत भूयस्तत एव दुःखं यदत्र युक्तं भगवान् वदेन्नः ॥२॥

श्लोकार्थ—विदुर ने कहा कि लोक सुख की प्राप्ति करने के लिए कर्म करते हैं जिससे न सुख मिलता है और न दुःख का अभाव होता है किन्तु उससे विशेष दुःख का ही अनुभव होता है अब इस विषय में जो कुछ करना उचित हो, हे भगवान् वह बताइए ॥२॥

सुबोधिनी—सुखाय कर्माणीति । फलं लोके द्विविधम्, दुःखभावः सुखं वा । दुःखस्य सुखप्रतिबन्धकत्वेन वा दुःखाभावः सुख एव हेतुः । अतो लोकः सुखार्थमेव सर्वं व्यापारं करोति, तेन च पुनः कदापि सुखं न प्राप्नोति । **लोक इति** प्रमाणनिर्देशः । **चकारात्** पूर्वसुखमपि गच्छति । किञ्च । **अन्यदुपारमंवा** दुःखाभावो वा न भवति, प्रतिबन्धकाभाव एव क्वचित् साधनपर्यवसानस्य दृष्टत्वात् । तत्परमपि न जातम्, तथा सति सहजं वा सुखं भवेत् । किञ्च, प्रत्युत तैरेव दुःखं भवति । भूयः सहजादप्यधिकम् । **तत एवेति** साधनान्तरनिवृत्तिः, साधनान्तरस्याऽदृष्टत्वात् । '**तदुदितः स हि यो यदनन्तरः**' इति सुखसाधनस्यैव दुःखसाधकत्वम् । ग । अनताज्ञानं त्वन्धपरम्परया । अनिवृत्तिः स्वाग्रहात्, अस्मदीयैस्तथैव कृतमिति । भूयो व्यभिचारदर्शनमपि परम्पराश्रद्धा बाधते ।

एतादृशेऽर्थे फलविपर्ययं दृष्ट्वाऽपि यदि न निवर्तन्ते, तदा वाक्यमात्रेण कथं निवर्तेरन्? तस्माद्वैराग्यार्थं किं कर्तव्यमिति प्रश्नः । अथवा, येनैवाऽव्यभिचारि सुखं भवति, तद्वा वक्तव्यमिति लोकादतिरिक्तप्रमाणत्वं तस्याऽऽह–भगवानिति । अस्माकं तु भगवदुक्तमेव प्रमाणम्, अतोऽस्माभिः स्वार्थमेव पृच्छ्यत इति नाऽप्रकृतत्वम् । वदेदिति प्रार्थनायाम् ।।२।।

व्याख्या—लोक में फल दो प्रकार के हैं १–दुःख का न होना और २–सुख होना । दुःख सुख का प्रतिबन्धक है और दुःख का अभाव भी एक प्रकार से सुख का हेतु होता है, अतः लोक जो कुछ व्यापार (उद्यम) करते हैं वह सुख की प्राप्ति के लिए ही करते हैं किन्तु देखा जाता है प्रायः उससे कभी भी सुख को नहीं पाते हैं, 'लोक' शब्द ही इसके प्रमाण को दिखा रहा है, 'च' पद से यों सूचन किया है कि सुख प्राप्ति का उपाय, पहला सुख भी गवां देता है किन्तु दुःख का अभाव भी नहीं होता है, क्वचित् फल के जो प्रतिबन्धक हैं उन प्रतिबन्धकों को रोकने में ही साधनों का पर्यवसान (अन्त) हो जाता है, यों देखा गया है, उसके परायण में भी नहीं होता है, यदि यों होवे तो सहज सुख हो जावे किन्च प्रत्युत उनसे ही दुःख हो जाता है, फिर सहज से भी विशेष दुःख प्राप्त होता है उस दुःख प्राप्ति का कोई दूसरा साधन देखने में नहीं आता है जिस साधन से सुख प्राप्ति की इच्छा की उससे ही दुःख प्राप्त हुआ, इन साधनों से सुख मिलेगा ऐसा ज्ञान तो अन्ध परम्परा से मिला है । यदि ऐसा है तो लोक उन साधनों को छोड़ नहीं देते हैं । इस पर कहते हैं कि अपना आग्रह है जिससे छोड़ नहीं सकते हैं । कहते हैं कि हमारे आगे के लोकों ने यों ही किया है । विपरीत फल देखने पर भी परम्परा की श्रद्धा उसके त्याग में बाधा डालती है, ऐसे अर्थ में (विषय में) उलटा फल देखकर भी जब उसके करने से रुकते नहीं हैं तब केवल कहने से कैसे रुकेंगे ? इस कारण से वैराग्य के लिए प्रश्न किया है अथवा जिस उपाय से अव्यभिचारादि सुख प्राप्त होवे वह उपाय कहना चाहिए वह आपका बताया हुआ प्रमाण लोक से निराला होगा, क्योंकि आप बतानेवाले 'भगवान्' हैं, इन लोगों के लिए भगवान् जो कहे वह ही प्रमाण है. अतः हम अपने लिए पूछते हैं इसलिए यों पूछना प्रसङ्गान्तर नहीं है । 'वदेत' यह क्रिया प्रार्थनार्थं में कही है ।।२।।

आभास—नन्वस्माकं भगवदाज्ञा तत्त्वोपदेशार्थं, न त्वेतादृशार्थकथनार्थ इत्याशङ्क्याऽऽह—

आभासार्थ—यदि मैत्रेयजी कहें कि हमको भगवदाज्ञा तुमको तत्वोपदेशार्थ है । न कि ऐसे प्रश्नों के उत्तर देने के लिए ऐसी शंका पर यह श्लोक कहा है ।

श्लोक–**जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ।**
अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य ।।३।।

श्लोकार्थ-दैव (भाग्य) के कारण श्रीकृष्ण से विमुख अधर्म करने के स्वभाव-वाले अतिशय दुःखीजनों पर निश्चयपूर्वक अनुग्रह करने के लिए जनार्दन के भव्य—भूत इस पृथ्वी पर परिभ्रमण कर रहे हैं ।।३।।

सुबोधिनी—जनस्य कृष्णाद्विमुखस्येति । भवत्सु द्वयमस्ति. भगवतः सामान्याज्ञा विशेषाज्ञा चेति । इदं सामान्ययाऽऽज्ञया वक्तव्यम्; यतो भगवान् भवत एतदर्थमेव सृजति, अन्यथा भगवदीया नोत्पद्येरन्, स्वार्थं तेषां प्रयोजनाभावात् । अत एव तेषु भूतपदप्रयोगः, जातानीत्यर्थः । शब्दच्छलेन ते लग्नाः स्वसमानं कुर्वन्तीति ज्ञाप्यते । यदि लोकानां तथा भाग्यमपि न भवति, तथापि त एव भाग्यरूपा भूत्वा तान् स्वसमानान् कुर्वन्तीति **भव्यानीत्युक्तम्** । अतो लोकोपरार्थं समागतानां भवतामेतदावश्यकमिति । **जनस्य** प्राणिमात्रस्य । जन्मत एव ज्ञायते भगवद्विमुखोऽयमिति, अन्यथा जन्मैव न स्यात् । प्रवृत्त्याचाऽत्रसीयते । **कृष्णादिति** मूलसच्चिदानन्दवैमुख्यं महदाश्चर्यमिति । तथापि **विमुखस्य**, जननानन्तरमपि **दैवात्** प्राचीनासुरकर्मणो विमुखस्य, दैवादेवाऽधर्मशीलस्य, स्वभावत एवाऽधर्मो रोचत इति । न हि स्वाभाविकं केनचिन्निवर्त्तयितुं शक्यते । अत एव सुदुःखितस्य, अन्यथा तदनुग्रहमपि न मन्येत । **इहाऽस्मिन्** लोके न ततोऽन्यो दुःखनिवारणहेतुः, **नूनं** निश्चितम् । सन्देहाभाव उभयत्र । भगवदीयैरेव दुःखाभावो नाऽन्यैरिति । तत्र हेतु**र्जनार्दनस्येति** । जनां सर्वलोकजननीमर्दयतीति, जनाया वा अर्दनं यस्मादिति । स हि मूलजननं निवारयति, तदीयाश्च तत्साधकाः ।।३।।

व्याख्या—आपको भगवान् की दोनों प्रकार की (सामान्य और विशेष) आज्ञाए हैं यह जो मैं पूछ रहा हूँ उसका उत्तर सामान्याज्ञा से देना चाहिए, क्योंकि भगवान् ने आपको इसीलिए ही रचा है, यदि यों न हो तो भगवदीय पैदा ही न होवें उनको अपने लिए पैदा होने का कोई प्रयोजन नहीं है, इस कारण से ही ऐसे परोपकारार्थं उत्पन्नों के लिए 'भूत' पद का प्रयोग किया है जन्म देता है यह आशय है, केवल शब्द मूल से भी वे मिल जावे तो भी अपने समान कर देते हैं। यों तात्पर्य है, यदि लोगों का ऐसा भाग्य भी न होवे तो भी वे स्वयं उनके भाग्यरूप बनकर उनको स्वसमान कर ही देते हैं इसलिये 'भव्याति' विशेषण दिया है, अतः लोकों के उपकारार्थं पधारे हुए आपको प्राणीमात्र की शंका निवारणार्थं प्रश्नों का उत्तर देना आवश्यक है जन्म से ही जाना जाता है कि यह (जीव) भगवद्विमुख है यदि भगवद्विमुख न होवे तो जन्म ही न लेवे और इसकी प्रवृत्ति से भी जानने में आता है कि यह भगवद्विमुख है, वह विमुखता भी 'श्रीकृष्ण से है' जो श्री कृष्ण मूल सच्चिदानन्द हैं उनसे विमुखता होना महान् आश्चर्य का विषय है, जन्म के बाद भी जो विमुख रह कर अधर्म के कार्य करने के स्वभाव वाला होता है जिसका कारण, पूर्व जन्म में आसुर सम्पद् के कर्म करने से उसका दैव (प्रारब्ध) ऐसा बन गया है अतः उसको स्वभाव से अधर्म कार्य करना ही पसन्द आता है, स्वभाविक धर्म (गुण) कोई भी मिटा नहीं

सकता है, इसलिए ही वह विशेष दुःख होता है अन्यथा यदि दुःखी न होवे तो उस (भगवान्) का अनुग्रह[1] भी न माने, इस लोक में सिवाय भगवदियों के दूसरा कोई दुःख के निवारण में हेतु नहीं बन सकता है यह निश्चित सिद्धान्त है, दोनों[2] में किसी प्रकार का सन्देह नहीं है, इसमें कारण 'जनार्दस्य' पद से बताया है, सर्वलोक को उत्पन्न करने वाली माया को दूर करने वाले की माया का जिससे पीड़न होता है वैसे जनार्दन हैं जो जन्म के मूल कारण (माया) को ही रोक देते हैं। उनके सेवक (भगवदीय) भी वैसा ही कार्य कर लोकों पर अनुग्रह करते हैं ॥३॥

आभास—अस्योत्तरं 'भगवद्भजनं कर्तव्यम्' तदव्यभिचारिसुखहेतुर्भवतीति यदि तदा तत्रोपायं कथयेति पृच्छति—

आभासार्थ—यदि इसका उत्तर यह है कि भगवान् का भजन करना चाहिए जोही अव्यभिचारी सुख का कारण है, तो उसके लिए उपाय बताइए यों निम्न श्लोक से कहते हैं (पूछते हैं)—

श्लोक—तत्साधुवर्याऽऽदिश वर्त्म शं नः संराधितो भगवान् येन पुंसाम् ।
हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणम् ॥४॥

श्लोकार्थ—हे साधुत्तम ! वह कल्याणकारी मार्ग बताइए जिससे समाराधित[3] भगवान्, भक्ति से पवित्र हृदय में विराजमान होके तत्वज्ञान सहित पुराण ज्ञान देते हैं ॥४॥

सुबोधिनी—तत्साधुवर्येति। तत्तदा। यदि भगवद्भजनेनैव प्राणी कृतार्थो भवति, तदा तत्र वर्त्माऽऽदिश भगवत्प्रेरणया, भगवदाज्ञारूपवेदानुसारेण वा क्रियमाणेऽपि भगवान्न परितुष्यति, दुःखस्यानिवृत्तत्वात्। अतो येन मार्गेण सम्यगाराधितो भगवान् ज्ञानं प्रयच्छति, तमुपायं स्थिरं प्रहितं सर्वलोकप्रसिद्धं कथयेति प्रश्नः। कल्याणरूपमिति साधनदशायामपि सुखरूपत्वम्, यथा विमानयानम्। गूढस्याऽत्यभीष्टस्यापि ज्ञापने हेतुः-**साधुवर्येति** संबोधनम। हितमात्रं साधुरपि वदति, एतादृशं तु भगवद्भक्तो यो ब्रह्मवित् स एव वदति, स हि स्वात्मानमिव सर्वं मन्यते। येन मार्गेण प्रथमं भगवान् संराधितो भवति। भगवत्त्वाच्च संराधनं कठिनम्, **'किमासनं ते गरुडासनाय'** इति वाक्यात् स्वस्य चाऽमर्यादत्वादिगुणवैशिष्ट्यात् **पुंसामिति** बहूनां काकतालीयवदुपायो न मार्गो

---

[1] १–सत्कुल में जन्म, सुन्दर देह आदि की प्राप्ति।

[2] २–भगवदीय दुःख मिटा सकते हैं। दूसरा कोई नहीं मिटा सकता है। इसलिए भगवान् और भगवदीय।

[3] ३–सबसे आराधना न किए जाने वाले।

भवति । किञ्च, भगवानन्तर्यामी सर्वानेव नानाप्रकारेण प्रेरयति, स्वस्वभावात्, जीवस्वभावमनुसृत्य वा । उभयथाऽपि प्रेर्यधर्माविष्टो भवति । तत्र यदि पूर्ववदेव स प्रेरयेत्, तदा कृतमपि भजनं व्यर्थं स्यात् । अतस्तादृश उपायो वक्तव्यः, येन स एवाऽन्तर्यामी भक्त्या पूतो भवति । पुनः पवित्र एव प्रेरयति । भक्त्या पूतो भक्तावेव प्रेरयेत् । स हि स्वभावतः प्रवाहनिर्वाहार्थमेव नियुक्तस्तथा प्रेरयति यथा प्रवाहः सिध्यति । अयं तस्य सहजो धर्मः । तथा करणात् अपूत इव लोके प्रसिद्धः । तस्यैव च बहिरूपं कालः । यथैकेन हस्तेन ध्रियते, अपरेण च मार्यते; तत्रोभयोः पावनार्थं मार्गद्वयं सृष्टम । वेदः कालस्य, अन्तर्यामिणो भक्तिः । तन्मार्गेण प्रविष्टः सोमवत्पूतो भवति । वेदेन पूतः कालो न मारयति, भक्त्या पूतोऽन्तर्यामी नाऽन्यथा प्ररयति । इदं च पावनं नाऽशुद्धस्य शुद्धिजनकम् किन्तु सोमवत् तन्मार्गनिर्गमनम् । अन्योन्याश्रयाच्चाऽयमर्थो न सिध्यतीति प्रश्नः । गुरुपदेशाच्चाऽयमर्थो न सेत्स्यतीत्याह—**हृदि स्थित इति** । स हि हृदये स्थितः स्वेच्छया यदि प्रेरयेत, किं बहिरूपदेशेन । अतो भगवता यदुक्तम् 'इदम' विदुराय ज्ञानं वक्तव्यमिति, तदन्तर्यामिसमाधानव्यतिरेकेण न भविष्यतीति, तत्समाधानार्थं प्रथमतो भगवदाराधना, ततो भगवत्सन्तोषः, ततो भगवता दत्तस्य प्रेम्णः प्राप्तिः. ततः प्रेमभक्त्या तस्यैवान्तर्यामिणो ज्ञानार्थं प्रेरणम् । पूर्वसिद्धनानाविधज्ञानानां विद्यमानत्वात्तदस्मरणपूर्वकं यथा ज्ञानमुदेति वाक्यात्, तथा प्रेरणं पूर्वसिद्धमिति तज्जनितं ज्ञानं न कार्यं समर्पयति । अत एव महताऽपि साधनेन वाक्याज्ज्ञानं नोदेति । यदा पुनः स एवाऽन्तर्यामी स्वस्यैव गुणभूतं ज्ञानं तस्मै प्रयच्छति, तदा पवित्रमिव वाक्यं ज्ञानहेतुर्भवति । तत् ज्ञानं त्रिविधम् । शारीरात्मनो ब्रह्मत्वेनाऽनुभवः, साङ्ख्यं सर्वतत्त्वविवेचनात्मकम्, भगवतश्चाशेषविशेषप्रकारेण स्वरूपबोधकम् । तत्त्रिविधमपि ज्ञानं साधनसाध्यफलभूतभक्त्या पूतो भगवान् प्रयच्छतीति । ज्ञानं ब्रह्मभावः, तच्च सर्वतत्त्वानां ज्ञानसहितम् । तत्राऽपि तत्त्वानां मूलभूतस्य सर्वभावज्ञानं पुराणम् ॥४॥

व्याख्या—यदि भगवद् भजन से ही प्राणी कृतार्थ होता है तो वह मार्ग बनाइए भगवत्प्रेरणा से अथवा भगवदाज्ञा रूप वेद के अनुसार कर्म करने पर भी भगवान् प्रसन्न नहीं होते हैं क्योंकि यदि प्रभु प्रसन्न होवे तो दुःख निवृत्त हो जाता है वह निवृत्त नहीं हुआ है, जिस मार्ग से सम्यग् रीति से आराधित भगवान् प्रसन्न होके ज्ञान देते हैं वह स्थिर विशेष हितवाला, सर्वलोक प्रसिद्ध उपाय कहिए यों प्रश्न हैं ।

वह मार्ग जिसके लिए मेरी जिज्ञासा है वह कल्याण रूप हो । एवं साधन दशा में भी सुख रूप हो, जैसे विमान की सवारी सुखरूप है, ऐसा मार्ग गूढ़ है और अतिशय अभीष्ट प्रिय है जिस को आप ही बता सकते हैं, कारण कि, आप साधुओं में उत्तम साधु हैं, यों तो साधारण हित प्रत्येक साधु बता सकता है, किन्तु इस प्रकार का हित मार्ग जो साधन दिशा में भी सुख रूप हो और अन्त में भी कल्याण प्रद हो वह गूढ़ तथा अभीष्ट होने से वह साधुवर्य बता सकते हैं जो भगवद्भक्त तथा ब्रह्मवेत्ता होते हैं, कारण कि वैसे उत्तम साधु सबको अपनी आत्मा जैसा ही समझते हैं, ऐसे योग्य भक्तवर, साधुत्तम आप ही हैं । अतः जिस मार्ग पर चलने से प्रथम भगवान् प्रसन्न होते हैं भगवान् षड़ भग (गुण) वाले हैं । अतः उनको प्रसन्न करना कठिन है कोई भी ऐसी वस्तु हमारे (जीव के) पास नहीं हैं, जिस वस्तु को देकर भगवान् को प्रसन्न किया जाए जैसा कि कहा है 'किमासन ते गरुडासनाय' तथा भगवान् मर्यादारहित अनेक गुणों वाले होने से भी उनको प्रसन्न करना सरल नहीं है ।

'पुंसां' इस पद से सूचित किया है कि 'काकतालीयन्याय'[1] की तरह कोई अचानक उपाय, बहुतों का मार्ग नहीं बनता है किन्तु भगवान् अन्तर्यामी हैं वह ही अपने स्वभाव से अथवा जीव के स्वभाव का अनुसरण कर सब को ही अनेक प्रकार प्रेरणा करते हैं। दोनों तरह प्रेरणा करते हुए प्रेम धर्म[2] से आविष्ट हो जाते हैं, यदि पहले की तरह ही हृदय में प्रेरणा करे तो किया हुआ भजन भी व्यर्थ हो जाए अतः वैसा आप कहिए जिससे वह ही अन्तर्यामी भक्ति से पवित्र[3] हो जावे जब पवित्र होता है तब ही प्रेरणा कर सकता है। भक्ति से पवित्र भक्ति के लिए ही प्रेरणा करता है।

क्योंकि वह (अन्तर्यामी) स्वभाव से प्रवाह के निर्वाहार्थ ही नियुक्त किया गया है। अतः जैसे प्रवाह सिद्ध हो वैसे हो प्रेरणा करता है, यह उसका स्वाभाविक धर्म हैं यों करने से अपवित्र की तरह लोक में प्रसिद्ध है उसका ही बाहर का रूप काल है जैसे एक हाथ से पकड़ा जाता है, दूसरे हाथ से मारा जाता है वैसे अन्तर्यामो रूप से प्रवाह में यह कहता है काल रूप से मारता है अतः दोनों स्वरूपों को पवित्र करने के लिए दो मार्ग रचे हैं, काल को पवित्र करने के लिए वेद रचे हैं अन्तर्यामी को पवित्र करने के लिए भक्ति को रचा है, उस मार्ग से चलने वाला जैसे याज्ञिक सोमवल्ली पान से पवित्र होता है वैसे वे दोनों रूप भी यों पवित्र होते हैं, वेद से पवित्र काल मारता नहीं है भक्ति से पवित्र अन्तर्यामी भक्ति के सिवाय दूसरे के लिए प्रेरणा नहीं करता है। यह पवित्र होना अशुद्ध को शुद्ध करना नहीं है किन्तु सोम की तरह मारने और संसार में पटकने के मार्ग से निकालकर उस मार्ग पर ले जाने के लिए है। अन्य का अन्य पर अर्थात् परस्पर आश्रय होने से यह अर्थ सिद्ध नहीं होता है इसलिए यह प्रश्न किया है।

गुरु के उपदेश से यह अर्थ (कार्य) सिद्ध नहीं होगा, किन्तु जो हृदय में स्थित है वह जब स्वेच्छा से प्रेरणा करे तब बाहर के उपदेश की क्या आवश्यकता रहती है? अतः भगवान् ने जो आपको कहा है कि विदुर को यह ज्ञान देना वह कार्य बिना अन्तर्यामी के समाधान (प्रसन्नता) के सिद्ध नहीं होगा अतः प्रथम उसकी ही (भगवान् की ही) आराधना करनी चाहिए उस आराधना से भगवान् प्रसन्न होंगे प्रश्नानान्त्तर भगवान् के दिए हुए प्रेम की प्राप्ति होगी, पश्चात् प्रेमभक्ति से उस ही अन्तर्यामी के ज्ञान देने के लिए प्रेरणा होगी, मुझे जो जो पूर्व प्राप्त नाना प्रकार के ज्ञान हैं, वाक्योपदेश द्वारा जो ज्ञान प्राप्त करें उससे वे पूर्वज्ञान के विस्मृत हो जावे, तथा पूर्व सिद्ध जो

१–कौओं के बैठते हो तालफल का गिरना इस न्याय की तरह है।

२–जिसको प्रेरणा करनी है उसके धर्म वाले हो जाते हैं।

३–मूल श्लोक में 'भक्ति पूते सतत्व' पद है जो हृदय का विशेषण दीखता है। यहाँ 'भक्तिपूतः' पाठ लिखकर भक्ति से पवित्र अन्तर्यामी होता है यों अर्थ किया है।

प्रेरणा है केवल उससे उत्पन्न ज्ञान कार्य पूर्ण नहीं कर सकता है इसलिए महान् साधन से भो वाक्य द्वारा सत्ज्ञान का उदय नहीं होता है जब फिर वह ही (भक्तिपूत) अन्तर्यामी अपना ही गुणभूत ज्ञान उसको देता है तब वह पवित्र हुआ वाक्य ज्ञान का कारण बन ज ता है। वह ज्ञान तीन प्रकार का है १–शरीरात्मा (जीव) का ब्रह्मरूप से अनुभव २–साँख्यात्मक (साङ्ख्यसिद्धान्तानुसारी) सर्व प्रकार के तत्वों का विवेचन ३–भगवान् के स्वरूप को अशेष विशेष प्रकार से बताने वाला वह त्रिविध (तीन प्रकार का) ज्ञान भी साधन साध्य फलरूप भक्ति से पवित्र भगवान् देता है। 'ज्ञान' अर्थात् ब्रह्मभाव होना वह ब्रह्मभाव भी सर्व तत्वों के ज्ञान सहित होना चाहिए उसमें भी तत्वों के मूलरूप भगवान् सर्वभाव (पदार्थ) रूप हैं ऐसा ज्ञान प्रमाण है अर्थात् सिद्धान्त है ।।४।।

आभास–नन्वेतन्निरन्तरं भगवद्गुणश्रवणाद्भवतीति चेत्तत्राऽऽह–

आभासार्थ · यदि कहो कि यह निरन्तर भगवद्गुणों के श्रवण से होता है तो इस पर यह श्लोक कहता है—

श्लोक–**करोति कर्माणि कृतावतारो यान्यात्मतन्त्रो भगवांस्त्र्यधीशः ।**
यथा ससर्जाऽग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ।।५।।

श्लोकार्थ–तीन गुणों के स्वामी एवं स्वतन्त्र भगवान् अवतार धारण कर जो २ कर्म करते हैं और जिसको सृष्टि करने से प्रथम किसी प्रकार की इच्छा नहीं थी उस निरीह ने यह सृष्टि जिस प्रकार रची तथा उसकी (जगत् की) स्थापना करने के वाद उसकी (जगत् की) वृत्ति (आजीविका) जिस प्रकार कराते रहते हैं यह सर्व बताईए ।।५।।

सुबोधिनी—करोति कर्माणीति। अयं च तृतीयः प्रश्नः। भगवतो हीयं श्रीः। अत्र सप्तपदार्थाः पृच्छ्यन्ते, सप्तविधभक्तिसिद्ध्यर्थम्। भगवतोऽवतारकर्माणि, जगदुत्पत्तिस्थितिप्रलयास्त्रयः, प्रवेशनानात्वम्, जगतः प्रकारा इति। सप्तानां पूर्वपूर्वसाधकत्वम्। तत्र भगवदवतारकर्माणि किमर्थमित्याकाङ्क्षायाम्, मोक्षार्थमिति चेत्; उत्पत्तिर्व्यर्था न भवेत् किमिति सन्देहः। अथ यदि तदर्थमेवोत्पादनम्, तदाऽवतारकर्माणि व्यर्थानि, उभयोरेकत्वात्, अमोहकत्वेनैव च कार्यसिद्धेः। तस्मादुत्पादनलीलाऽपि ज्ञातव्या। उत्पादनमात्रेण च कार्यसिद्धेर्योग्यतासिद्ध्यर्थं तावत्कालं स्थितिरपि मृग्या। यदि भगवांस्तन्नाशयेत्, तदा विहितकरणादिनाऽपि कार्यं सेत्स्यतीति नाऽवतारप्रयोजनम्। किञ्च, यदि बहुधाऽयं भगवान्न भवेत्, तदाऽवतारेण सर्वमुक्तिरेव भवेत्, अतो भिन्नस्वभावेन प्रेरणान्नानाभावाच्च सर्वा व्यवस्था सम्पद्येत। लोकाश्चेद्भगवत्कृता एकविधाः स्युः, ब्रह्माण्डाद्वा निर्गमनं न भवेत्, तदाऽप्यवतारकर्माणि भिन्नानि। ऐकात्म्ये वा यद्येकस्य साधनमन्यस्य भवेत्, तथापि व्यर्थं स्यादिति भेदनिर्माणं च ज्ञातव्यं स्यात्। अतः सप्तानायेकः

प्रश्नः, सप्ताङ्गत्वाच्छ्रयः। **कृतावतारो भगवान् यानि कर्माणि करोति।** **यानीति** प्रसिद्धिरुक्ता। बहूनि च वक्तव्यानि, तेषां कर्मत्वं च वक्तव्यम्। तानि च भगवत्कर्माणि भवन्ति न भवन्तीति, भगवतः, कर्तव्यमकर्त्तव्यं वा। दोषत्रयाभावस्तु मयैव ज्ञायत इति विशेषणत्रयमाह। भगवान् कालाधीनतया न किञ्चित्करोति, कालार्थं वा। तदाह–**आत्मतन्त्र इति**। स्वतन्त्रो न कालाधीन इत्यर्थः। कर्मस्वभावयोः स्वमध्यपातात् भिन्नतया निवारयति–**भगवानिति**। कर्माधीनता व्यावर्त्तिता, न हि पूर्णज्ञानवतः कर्माणि बन्धकानि भवन्ति। **अधीश इति** त्रिगुणनियन्ता, अतो न स्वभावाधीनः। तस्मादेतादृशेन यानि कर्माणि कृतानि, न स्वभावात्, नाऽदृष्टतः, न कालप्रेरणात्, तानि कर्माण्यलौकिकान्येव भवन्तीति श्रोतव्यानि भवन्ति। किञ्च, **यथा इदं ससर्ज**। **अग्रे** सृष्टेः पूर्वम्। एको दोषाभावस्तु ज्ञायते, यदयं चेष्टया न करोतीति, मनश्चेष्टाऽपि निवारिता, इच्छायां सन्देहः, प्रयत्नो नास्तीति निश्चयः, ज्ञानं चाऽस्तीति। किञ्च, सर्वमेवोत्पादितं सम्यक् स्थापयित्वा जगतो वृत्तिं विधत्ते, सर्वेषामेव जीविकां प्रयच्छति। अत्र दूषणाद्यभावो न श्रुतो, न ज्ञायते; प्राणिनामन्योन्याहारात्॥५॥

व्याख्या—अब यह तीसरा प्रश्न है, यह प्रश्न भगवान् के 'श्री' गुण का है सात प्रकार की भक्ति की सिद्धि के लिए सात पदार्थ यहां पूछे जाते हैं। भगवान् ने अवतार धारण कर जो-जो कर्म (लीलाएँ) किए, जगत् की उत्पत्ति, स्थिति और प्रलय ये तीन इनमें प्रवेश कर नाना रूप धारण करना, जगत् के प्रकार[1], यहाँ जो सात प्रश्न किए हैं, वे सात क्रम से पूर्व-पूर्व के धक हैं।

भगवान् ने अवतार धारण कर, जो कर्म किए वे किस लिए किए? यदि कहो कि मोक्ष देने के लिए किए तो सृष्टि करनी ही व्यर्थ थी अर्थात् तब सृष्टि रचो क्यों? यह सन्देह है, यदि कहो कि मोक्ष के लिए ही बनाई है तो अवतार और कर्म व्यर्थ होते हैं, क्योंकि दोनों का एक ही प्रयोजन है। मोह न करने से ही 'मुक्ति' हो सकती है, फिर अवतार लेने तथा कर्म करने की क्यों आवश्यकता है? दोनों व्यर्थ दीखते हैं। इसलिए भगवान् ने जो 'सृष्टि' रचने की लीला की है उसका ज्ञान भी प्राप्त करना चाहिए।

केवल सृष्टि की रचना से कार्य की सिद्धि न होने से जब तक मोक्ष की योग्यता प्राप्त हो तब तक जगत् की स्थिति को भी समझना चाहिए, यदि कहो कि भगवान् अवतार लेकर मोह का नाश कर मोक्ष देते हैं तोभी भगवान् के अवतार की आवश्यकता सिद्ध नहीं होती है, क्योंकि शास्त्रों में कहे हुए कर्मों से ही मोह का नाश हो सकता है। मोह नाशान्तर स्वतः मोक्ष हो जाता हैं।

यदि भगवान् जगत् में विविध प्रकार से प्रकट न होवे तो उनके अवतार से सबकी मुक्ति हो जाए अतः भिन्न-भिन्न स्वभाव से प्रेरणा करने से और अनेक भाव होने से समग्र व्यवस्था होती है, यदि भगवत्कृत लोक एक प्रकार के होवे और ब्रह्माण्ड से बाहर वे न निकल सकते हों, तब भी अवतार तथा अवतारों के कार्य भिन्न[2] होते हैं, यदि सबकी एकात्मता होवे और जो एक का किया

---

[1] तत्वभेद तथा स्वरूप भेद से दो प्रकार [2] व्यर्थ

हुआ साधन दूसरे का हो जाय, तो भी अवतार और कर्म की व्यर्थता होवेगी, अतः भगवान् ने जो भेद से सृष्टि निर्माण की है उसका रहस्य भी जानना चाहिए इसलिए सातों का एक ही प्रश्न है, कारण कि 'श्री' गुण के सात अंग हैं ।

भगवान् अवतार लेकर जो-जो कर्म करते हैं, वे बहुत ही करने चाहिए यानि जो-जो, पद से सूचित किया है कि भगवान् के कर्म प्रसिद्ध हैं और उनका कर्मत्व भी सिद्धकर बताना चाहिए वे कर्म भगवान् के बन सकते वा नहीं ? वे कर्म भगवान् को करने चाहिए थे वा नहीं ? उन कर्मों में तीन दोष नहीं हैं इनको मैं ही जानता हूँ, इसलिए तीन विशेषण हैं ।

१–'आत्म तन्त्र' इस विशेषण से यह बताया है कि भगवान् जो कुछ कर्म करते हैं वे काल के अधीन होकर नहीं करते हैं, कारण कि आप स्वतन्त्र हैं, स्वतन्त्र किसी के अधीन नहीं होते हैं ।
२–भगवान्, ने इस विशेषण से यह सूचित किया है कि आप षडैश्वर्य सम्पन्न होने के कारण पूर्ण ज्ञानवान हैं, पूर्ण ज्ञानवान कर्मों के बन्धनों में नहीं आते हैं, यों आप की कर्माधीनता मिटादी है
३–'त्र्यधीशः' इस विशेषण से सिद्ध किया है कि आप तो तीन गुणों के नियामक हैं अतः स्वभाव के अधीन नहीं हैं, इसलिए आपने जो कर्म किए हैं, वे न स्वभावाधीन होकर किए है, न अद्रष्ट से किए हैं और न काल की प्रेरणा से किए हैं अतः ये कर्म अलौकिक होने से सुनने के योग्य हैं 'यथा इदं ससर्ज' 'जैसे यह रचा' जब यह सृष्टि की नहीं तब इसको किस प्रकार रचा ? यह जानना चाहिए, यह सृष्टि चेष्टा से भी नहीं बनाई है क्योंकि भगवान्—निरीह हैं, यों कह कर एक दोष का निवारण किया, 'इच्छायां सन्देह' इच्छा में सन्देह, यह तो निश्चय है कि प्रयत्न नहीं किया है एवं प्रभु में ज्ञान है और विशेषता यह है कि जो कुछ उत्पन्न किया उसको श्रेष्ठ रीति से स्थापन कर जगत् की 'वृति' (आजीविका) का भी स्वयं प्रबन्ध करते हैं, अर्थात् सबको विविध आजीविका देते हैं इस विविध प्रकार की आजीविका देते हुए भी किसी प्रकार दूषण नहीं आता है, दूषण का होना न कभी सुना और न जाना, प्राणी एक दूसरे का आहार भी कर जाते है तो भी दोष कुछ भी बाधक नहीं होता है ।।५।।

आभास–किञ्च

आभासार्थ—और फिर

श्लोक–**यथा किल स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः ।**
योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथाऽऽसीत् ।।६।।

श्लोकार्थ–जिस तरह वृत्ति से निवृत्त हुए उसने, अपने हृदय रूप आकाश में यह सब (समग्र जगत्) डालकर गुफा में, निश्चय शयन किया है और फिर

योगेश्वरों का अधीश्वर वह एक ही भगवान् इसमें प्रविष्ट होकर जैसे बहुत प्रकार के होते हैं वह कहिए ॥६॥

सुबोधिनी—यथेति। यथा वा इदं सर्वं संहृत्य, **स्वे** स्वकीये हृदयाकाशे इदं सर्वं निवेश्य, स्वयमपि **गुहायां** गुप्तस्थाने **किल शेते**। अत्रैकस्य दूषणस्य परिहारो ज्ञायते। निवृत्ता वृत्तयो यस्य, जाग्रत्स्वप्नसुषुप्तिवृत्तयो यत्र न सन्तीति। का वा गुहा, को वा संगोप्यः? इति न जानीमः। हृदये च पुनः सर्वं निवेशितवान्। किञ्च, योगेश्वराणामधीश्वरः। एक एव एतत्सर्वं सृष्टमनुप्रविष्टो यथा बहुधा आसीत्, तद्वक्तव्यम्। योगेन नानारूपाणि योगी करोति। ते ह्युपायेन स्वयोगं व्ययीकृत्य तथा भवन्ति, यथा कर्मणा। परं कर्मणा क्रमेण भवन्ति, योगेन त्वेकदैव भवन्ति। अयं तु तेषामपीश्वरः। **अधिशब्देन** च योगैश्वर्ये अप्यधिके निरूपिते भवतः। अनेन बहुधा भवनं सम्भवतीत्युक्तम्। परमखण्डः, समुदायेन वा, खण्डशो वा भवतीति सन्देहः ॥६॥

व्याख्या—जैसे इन सबका संहारकर अपने हृदयाकाश में इन सबको स्थापित कर स्वयं भी किसी गुहा में (गुप्तस्थान में) सोते हैं, यहां एक दूषण का परिहार किया है ऐसा जाना जाता है, उसमें जाग्रत स्वप्न और सुषप्ति तीनों वृत्तियाँ नहीं रहती हैं, वह गुफा कौनसी है? और किस स्वरूप[1] को छुपाना है? इसको हम नहीं जानते हैं और फिर यह सर्व हृदय में डाल रखा है कारण कि आप योगेश्वरों के भी अधीश्वर हैं, फिर आप एक ही इसको पुनः रचकर इसमें प्रविष्ट होकर जैसे अनेक हुए वह कहिए।

योगी, योग बल से अनेक रूप धारण करते हैं, वे (योगी) उपाय से अपने योग का व्यय कर अनेक रूप वाले होते हैं, जैसे कर्म से, परन्तु कर्म से धीरे-धीरे क्रम से होते हैं। योग से तो एक ही समय में होते है। यह (प्रभु) तो उनके भी ईश्वर हैं 'अधि' पद से यह सूचित किया है कि प्रभु में योग और ऐश्वर्य दोनों में उनसे अधिक हैं, इससे प्रभु में अनेक रूप होने की सम्पूर्ण सम्भावना है यों कहा, किन्तु वह अनेक किस प्रकार होते हैं, अखण्ड रहकर वा समुदाय से (अवयवों के समूह द्वारा) अथवा खण्ड-खण्ड से होते हैं, यह सन्देह है ॥६॥

आभास—नन्वेतादृशं चरित्रं भवता बहुधा श्रुतं भारतादौ, किमिति पुनः पृच्छ्यत इत्याशङ्क्याऽऽह—

आभासार्थ—तुमने ऐसे चरित्र तो भारतादि शास्त्रों द्वारा बहुत सुने हैं? फिर किसलिए वे ही पूछते हो? ऐसा यदि मैत्रेय जी कह डाले उस पर निम्न श्लोक कहते हैं—

श्लोक—**क्रीडन् विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः।**
मनो न तृप्यत्यपि श‍ृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ॥७॥

---

[1] १—अपना स्वरूप किसी को भी उस समय जताना नहीं है।

श्लोकार्थ–ब्राह्मण, गौ और देवों के कल्याणार्थं अनेक अवतार धारण कर लीला से अनेक प्रकार के दिव्यकर्म करते हैं उनको भी हमें सुनाइए, उत्तम कीर्ति वाले श्री हरि के दिव्य लीला रूप कर्मों को श्रवण करते (पान करते) हुए मन तृप्त नहीं होता है ।।७।।

सुबोधिनी—क्रीडन् विधत्त इति । **द्विजगोसुराणां क्षेम याऽवतारभेदैः क्रीडन् कर्माणि विधत्ते** । किमतो यद्येवमत आह–तानि कर्माणि **शृण्वतामपि मनो न तृप्यति** । अन्येषां तृप्तावपि नो मनो न तृप्यति । तत्र हेतुः–**सुश्लोकमौलेश्चरितामृतानीति** । एकं कर्तविशेषणमपरं कर्मणाम सुश्लोका उत्तमा कीर्तिर्मौलौ यस्य । यदा भगवान् दृश्यते, तदा दूरादेव तस्य कीर्तिर्दृश्यते, यथा दूरात् पुरुषस्य मुकुटं दृश्यते । अतो भगवदिच्छायां निवृत्तायां परं कीर्तीच्छा निवर्तते । भगवन्तं मान्यमानः कथं शिरोभूषणान्निवर्तेत ? किञ्च, एतानि कर्माण्यमृतरूपाणि **चरितामृतानि** । कर्माण्येव चरितानि । चरितानाममृतत्वमनुभवसिद्धम्, क्षुत्पिपासादिनिवारकत्वेन । मरणनिवर्त्तकत्वं च । **चरितमिति** प्रयत्नमात्रम् । भक्षणवाचकत्वेन वा विरोधेनामृतत्वद्भुतकर्मत्वेन । कर्माणि च पुनश्चरितेन कृत्वैव अमृतानि, उत्पन्नान्येव नित्यानीति । प्रयत्नमात्रविषयत्वेन तेषां नत्यत्वे, श्रवणादि प्रयत्नविषयाणामपि नित्यत्वात्, सर्वेन्द्रियव्यापारपूर्णत्वेन ऐहिकामुष्मिकदुःखनिवारकाणि भवन्ति, तदोभयामृतत्वं संपद्यते । **द्विजगोसुराणामिति** मन्त्रा हविर्देवताश्च यागे प्रधानभूतास्त्रयो निर्दिष्टाः, तेषां क्षेमाय कर्मकरणम् । अनेन भगवत्कर्माणि धर्मरूपाणीत्युक्तम् । ततश्च तानि मनसा भावितानि मनोयज्ञा भवन्ति, कीर्तितानि वाग्यज्ञाः, श्रुतानि ज्ञानयज्ञा इति **अवतारभेदैरिति** नानाविधैरवतारैः । भेदग्रहणेन लोके तदवतारत्वेन ज्ञातुमशक्यमिति गम्यते । मत्स्याद्यवताराविसदृशत्वात् भेदा इत्युच्यन्ते । अथवा, ज्ञानक्रियाविशिष्टभेदेन त्रयोऽवताराः । तेषां भेदाः । ज्ञानकलावतारा व्यासादयः, क्रियाकलावतारा वराहादयः उभयं कृष्णः । अवताराश्च भेदाश्वेति वा । तदा भेदा आवेशिनः । अवतारैरावेशैश्च यज्ञानां परिपालनं क्रियत इति करणे रक्षा हेतुः. अतृप्तौ चरितामृतत्वम् । अतश्चरित्राणि वक्तव्यान्येवेत्यर्थः ।।७।।

व्याख्या—ब्राह्मण, गौ और देवों के कल्याणार्थ अलग-अलग प्रकार के अवतार धारण कर भगवान् क्रीड़ा करते हुए कर्म करते हैं । जो यों कर्म करते हैं तो उससे क्या ? जिस शंका का निवारण करने के लिए कहते हैं कि उन कर्मों का श्रवण करते हुए मन तृप्त नहीं होता है । दूसरों का मन भले तृप्त हो जाता हो किन्तु मेरा मन तो तृप्त नहीं होता है । जिसका कारण यह है कि 'सुश्लोकमौले' 'चरितामृतानि', इन दोनों पदों में एक कर्ता का विशेषण है और दूसरा कर्मों का विशेषण हैं 'सुश्लोकमोलेः' पद का अर्थ है जिससे मुकुट में उत्तम कीर्ति है जिसका तात्पर्य है कि जब भगवान् दूर से पधारते हैं तब जैसे मनुष्य के मुकुट का प्रथम दर्शन होता हैं वैसे आपकी कीर्ति के प्रथम दर्शन हो जाते हैं भगवान् के दर्शन की इच्छा निवृत्त हो तो पश्चात् कीर्ति की (गुणानुवादरूप कर्मों के श्रवण की) इच्छा निवृत्त हो सके, भगवान् को चाहने वाले भगवान् के शिरोभूषण (कीर्ति) की इच्छा का त्याग कैसे कर सकते है ? नहीं करेंगे, फिर बिशेषता यह है

कि ये भगवान् के कर्म (चरित्र) अमृत रूप हैं, भगवच्चरित्र अमृतरूप हैं यह अनुभव से सिद्ध है। चरित्र अमृतरूप इसलिए कहे हैं कि उनसे क्षुधा, प्यास आदि मिट जाती है और अमृत होने से मरण भी मिटाते हैं 'चरित्र' से केवल प्रयत्न बताया है, अमृत का अर्थ भक्षण है चाहे इससे विरोध देखने में आवे तो अन्य प्रकार से उसका अर्थ करते है कि ये चरित्र (कर्म) अद्भुत होने से अमृत रूप हैं 'कर्म' भगवच्चरित्र होने से भी अमृत रूप हैं, एवं उत्पन्न होते हुए भी निश्चित नित्य हैं, केवल प्रयत्नरूप होने से भी नित्य हैं, प्रयत्न के विषय जो श्रवणादि वे भी नित्य हैं सर्वेन्द्रियों के व्यापार से पूर्णत्व होने के कारण ऐहिक और परलोक के दुःखों के निवारक होते हैं अतः दोनों लोकों के अमृत कहे जाते हैं।

ऽयं भगवानात्मेयेव व्यपदिश्यते। आत्मत्वेन वा तस्मिन्निछा। तेन वा तदात्मभूतं जातम्। तदा भगवान् सृष्ट्यन्तरवदेकरसो न जातः, किन्तु नानामतिभिरेव उपलक्षितः। अथवा सर्वैरेव मतिभिरेक एवोपलक्षितः। यथाऽन्योन्यविजाती धानिसहस्रं लवणान्येकस्मिन् जले परिच्छिन्ने प्रक्षिप्तानि, एकरसत्वमप्यापन्नानि नानामतिभिरुपलक्षितमेकं भवति। यथा केनचित्पृष्टः सैन्धवादि क्वेति सर्वार्थे जलमेव निर्दिशति। आत्मेच्छायाः सर्वत्रानुगमादात्मत्वं वा। तेनैकदेशे एव भगवति विश्वस्य लय उक्तो भवति। **'एकांशेन स्थितो जगत्'** इति भगवद्वाक्यं तत्परमेव। आविर्भावेऽपि तथा॥२३॥

व्याख्या--यह समग्र जगत् उत्पत्ति से पूर्व भगवान् ही था, शुद्ध भगवान् की लीला तो तब होती है जब भगवान् स्वयं ही इस प्रकार के (जगद्रूप) होते हैं, दूसरी लीला योगमाया के सम्बन्ध वाली है, जिसमें वह जगत् भगवान् का एक प्रकार का रूप है, वह प्रवाह रूप से आविर्भाव तिरोभाव युक्त होने के कारण से अनादि और अनन्त है, जब जगत भगवान् की तिरोभाव शक्ति से मगवान् में तिरोहित होता है तब यह (जगत्) भगवान् ही हो जाता है, जैसे नमक जल में पड़ने पर जल में लीन होके जल रूप हो जाता है। तब नमक का रूप देखने में नहीं आता है केवल जल ही दीखता है, इतना होते हुए भी उन दोनों के स्वरूपों का ऐक्य नहीं होता है क्योंकि उसका (जल का) रस मीठा है और नमक खारा रस है, किन्तु उनको अलग-अलग नहीं किया जा सकता है। इसलिए उसका भी भगवत्पना कहा जाता है। इसलिए कहा जाता है कि यह जगत् सृष्टि से पहले भगवान् ही था। अनन्तमूर्ति भगवान् में उसका (जगत् का) तिरोभाव नहीं होता है बल्कि एक ही रूप में होता है 'आस' पद देने का भाव यह है कि यह जगत् भगवान् के एक रूप में जो लय हुआ उसमें भगवान् ने कुछ भी क्रिया नहीं की है वह (जगत्) स्वयं स्वतः भगवान् में लय हो जाता है जैसे जल में नमक स्वयं स्वतः लय हो (गल) जाता है। जल को इसलिए कुछ भी क्रिया करनी नहीं पड़ती है, उस (भगवान्) से उस (जगत्) को पृथक करना महान् कठिन है, उसको तो भगवान् ही कर सकते हैं अतः इसको पुरुषार्थवाला भगवच्चरित्र कहा जाता है, जैसे किसी कार्य करने में योगी वा मणि को कुछ भी प्रयत्न नहीं करना पडता है वैसे ही जगत् का रूप आप (भगवान्) बन जावे अथवा अपने से पृथक् कर उसको उत्पत्ति करे। इसमें भगवान् को भी कुछ श्रम नहीं होता है।

उस समय के जीव चिद्रूप थे तो एक में ही कैसे लय हुए होंगे? इसका उत्तर देते हैं कि 'आत्माऽऽत्पना' वही भगवान् सब जीवों की आत्मा हैं, समष्टि की तरह मूलभूत चिद्रूप ही है, उसमें ही इस सत्प्रधान का पृथक करने में लय होता है, यदि उसमें लय न होता तो पृथक करण में प्रयास करना पड़ता, अब पृथक में कठिनाई नहीं है, सत् में लय होने से 'सत्' ही हुए, जिन जीवों की मुक्ति नहीं हुई है उनका जब प्रलय होता है तब जीवाश्रित जगत् भगवान् में लीन होता है 'विभुः'

नाम देने का आशय है कि भगवान् में जगत् उत्पन्न करने की सामर्थ्य वह ही सर्व सामर्थ्य पहले जीवों का अपने में सम्पादन कर वहाँ ही फिर जगत् का लय कराया, यों कहने से यह बताया है कि जगत् का सम्बन्ध भगवान् से नहीं हुआ यह सर्व लीला जगत् से अस्पर्श रहते हुए भगवान् ने की है । इस प्रकार ऐक्य होते हुए भी अस्पर्श रहने की सामर्थ्य भगवान् में है, कारण कि 'विभु' हैं, जबकि जीवों में इच्छा आदि धर्म मौजूद है तब फिर भगवान् में एक भाव से स्थिति कैसे बनेगी ? इस शंका का निवारण करते हैं कि 'आत्मेच्छानुगतौ सत्याम्' पश्चात् जीवों में आत्मा के धर्म भी प्रविष्ट होते हैं अथवा जब भगवान् की इच्छा होती है तब उनकी जगत् में गति (लय) होती है, तब वह लीन हुआ यों पूर्व प्रलय में कारण कहा है तब यह भगवान् आत्मा ही है यों कहे जाते हैं अथवा आत्मापन से ही उनमें ऐसी इच्छा उत्पन्न होती है । इस कारण से ही वह (जगत्) आत्मरूप हुआ । तब भगवान् अन्य सृष्टि की तरह एक रस न रहे किन्तु पृथक्-पृथक् बुद्धियों के कारण नाना-विधि दाखता हैं अथवा जैसे जुदी-जुदी जाति के लवण के टुकड़े जल में डाले जावे तो वे नाना भांति वाले भी उस जल में नमक के टुकड़े एक ही दीखते हैं, उस समय यदि कोई पूछे कि नानाविधि सैन्धव के टुकड़े कहाँ हैं । तब उनके बदले में जाना जाता है कि सर्व जल ही हैं । इसी तरह सर्व मतियों से एक ही भगवान् हैं यों जाना जाता है अथवा भगवान् की इच्छा (धर्म) सब में जाने से सब में आत्मापन ही है यों भान होता है, इससे यह निश्चय होता है कि भगवान् के एक देश में ही विश्व का लय होता है यों कहा गया है 'एकांशेन स्थितोजगत्' यह भगवद् वाक्य भी इसी सिद्धान्त की पुष्टि करता है, आविर्भाव में भी यों ही समझना चाहिए, अर्थात् सृष्टि भी भगवान् के प्रकाश में स्थित है ॥२३॥

आभास—एवं पूर्वस्थितिमुक्त्वा प्रथमतो जीवानामुद्गममाह—

आभासार्थ—इस प्रकार पूर्व स्थिति बताकर पहले जीवों की उत्पत्ति कहते हैं—

श्लोक—**स वा एष तदा द्रष्टा नाऽपश्यद्दृश्यमेकराट् ।**
मेनेऽसन्तमिवात्मानं सुप्तशक्तिरलुप्तदृक् ॥२४॥

श्लोकार्थ—वह ही **भगवान्** तब **द्रष्टा** हुए, एक ही प्रकाशक आपने कुछ भी दृश्य **न** देखा, कारण कि उस समय अन्य शक्तियाँ प्रकट न हुई थी, किन्तु ज्ञान शक्ति लोप न हुई थी अतः अपने असत् जैसा समझने लगा ॥२४॥

सुबोधिनी—स वा एष इति । स एव भगवान्, स्वस्मिन् विद्यमानसर्वः । **वै** निश्चयेन । **एष** देवदत्तादिरूपेण प्रतीयमानो जीवो जातः । तदा जीवो भूत्वा तिरोभावप्रकारेणाऽऽविर्भूतः, पूर्व-

संस्कारेण तदा द्रष्टा जातः। अह द्रष्टेति पूर्वावस्थां स्मृतवान्। तदा द्रष्टृत्वनिर्वाहार्थं दृश्यालोचने क्रियमाणे दृश्यं नाऽपश्यत्। यतः स एक एव सर्वजीवानामात्मभूतो निर्गत इत्येक एव राजते। यद्यप्यात्मानमपि द्रष्टुं शन्कोति, तथापि पूर्ववासनया बहिर्मुख एव निर्गत इति स्वातिरिक्तमेव दृश्यमालोचयन्, तदभावे आत्मानवेवाऽ**सन्तं मेने**। **इवे**त्यर्द्धासत्त्वम्। आत्मांशो वर्त्तते, वेद्यांशो नास्तीत्यौपाधिकधर्माणामुपाध्यभावे धर्माभावः। अतो द्रष्टा आत्मानमद्रष्टारमेव मेने। ननु पूर्वं दृश्यस्श विद्यमात्वात्, सदृश्यस्य तस्य लयात्, स्वाभिर्भावे दृश्यमपि कुतो नाऽविर्भूतमिति चेत्तत्राऽऽह–**सुप्तशक्तिरिति**। सुप्ताः शक्तयो यस्य। ये प्रपञ्चोद्बोधकास्ते नाऽद्याप्युपस्थिता इति। एवं तर्हि ज्ञानशक्तिरप्यनुद्भूता स्यात्, तत्ततः कुतो मेने आत्मानमसन्तमिति तत्राऽऽह–**अलुप्तदृगिति**। अलुप्ता दृक् यस्य। अस्य ज्ञानशक्तिः पूर्वमपि न लुप्ता, लोपं न प्राप्ता, आत्मवदेव स्थिता, आत्माऽऽविर्भाव एव आविर्भूतेत्यर्थः। स यदा आत्मानं असन्तमिव मेने।२४।

व्याख्या—जिस के भीतर सर्व विद्यमान है वह ही भगवान् निश्चय से देवदत्त आदि रूप से प्रतीति में आने वाला 'जीव' बना, तब जीव बनकर तिरोभाव प्रकार[1] से प्रकट हुआ, प्रथम संस्कारों के कारण द्रष्टा बना, मैं द्रष्टा हूं यों पूर्वावस्था का वर्णन करने लगा जिससे यह इच्छा उत्पन्न हुई कि देखूँ, दृश्य पदार्थ ढूँढ़ने लगा किन्तु दृश्य देख न सका। कारण कि वह एक ही सर्व जीवों का आत्मारूप अकेले ही प्रकट हुए थे, हालांकि आदमी को भी देख सकते थे तो भी पूर्ववासना के कारण वहिर्मुख बनकर प्रकटा था। इसलिए अपने अतिरिक्त ही दृश्य को ढूँढ़ने लगा, दूसरा कोई नहीं था अपने को ही असत् जैसा मानने लगा था 'इव' पद से यह सूचित किया है कि पूर्ण असत् नहीं माना किन्तु अर्द्ध असत् समझने लगा। अर्द्ध असत् मानने का भाव यह है कि 'आत्मा का अंश है' जानने योग्य अंश नहीं है। जब उपाधि नहीं होती है तब औपाधिक धर्मों में धर्माभाव रहता है, अतः द्रष्टा ने अपने को अद्रष्टा ही माना।

यदि कहो कि प्रथम जब दृश्य विद्यमान था और सद्रश्य (दृश्य सहित) ही उसका लय हुआ था तब अपने आविर्भाव के समय द्रश्य भी क्यों आविर्भूत न हुआ? इस शंका के निवाराणार्थ कहते हैं कि 'सुप्तशक्ति' जो शक्तियाँ प्रयत्न की उद्बोधक थीं, वे अब तक प्रकट नहीं हुई हैं तब तो ज्ञान शक्ति भी प्रकट न होनी चाहिए, यदि ज्ञान शक्ति प्रकट न हो तो अपने को असत् जैसा कैसे माना इस शंका के निवारणार्थ कहते हैं कि 'अलुत्पदृक्' आपकी ज्ञान शक्ति का कभी भी लोप नहीं होता है, आत्मा (स्वरूप) की तरह स्थित रहती है क्योंकि आत्मा ज्ञान स्वरूप ही है, अतः आत्मा

---

[1] १—'पराभिध्यानात् तत् तिरोदितम्' ३-२-५ ब्रह्म सूत्र में कहे हुए प्रकार से ऐश्वर्यादि के तिरोभाव होने से।

प्रकट होती है तब वह भी साथ में प्रकट हो जाती है इसलिए उस आत्मा ने अपने को असत् जैसा माना ।।२४।।

आभास—एतान्येवात्मासत्त्वज्ञानानि एकीभूतानि मायारूपेण जातानीत्याह—

आभासार्थ—आत्मा को असत् मनाने वाले ज्ञान इकट्ठे हो मायारूप बन गए जिसका वर्णन निम्न श्लोक में करते हैं—

श्लोक—**सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ।**
माया नाम महाभाग ! ययेदं निर्ममे विभुः ।।२५।।

श्लोकार्थ—हे महाभाग ! वह सत् असत् रूपा माया शक्ति उस पूर्ण रीति से देखनेवाले की ही है, जिससे सर्व प्रथम ईश्वर ने यह जगत् रचा है ।।२५।।

सुबोधिनी—सा वा एतस्येति । यदात्मानमन्यथा ज्ञातवान् एषैव माया । सा पूवोक्ता प्रसिद्धा मोहिका सदसदात्मिका । सदसद्रूप आत्मा यस्याः । स्वभावतः सन्, अन्यथाङ्गीकारादसन्, एतादृश एवाऽऽत्मा तस्याः । अयमेवात्मा, सा धर्मरूपा । तस्या वा स्नरूपमात्मैव समर्पयति । त्रितयात्मकं वा स्वरूपम् । तस्या धर्मत्वमाह—**एतस्य संद्रष्टुः शक्तिरिति । एतस्य** जीवस्य सम्यग्द्रष्टुः । अर्थादालोचनेनात्मानमेव पश्यतीति । शक्तिरुत्तरकार्ये सामर्थ्यम् । तस्या नाम मायेति ! मया सह वर्तत इति प्रत्ययस्याऽलुक्, सुबन्तप्रतिरूपको वाऽयं निपातः; ततोऽण् प्रत्ययः, सवर्णदीर्घ न ङीप् । **महाभागेति** संबोधनम् । अयमर्थो दुर्ज्ञेय इति, तज्ज्ञाने महद्भाग्यमिति सूचितम् । **ययेदं निर्ममे विभुरिति । यया** मायया चिच्छक्तिरूपया अनुद्धृतसारया इदं जगदेव निर्ममे यस्य भावरूपा शक्तिस्तस्य कर्तृत्वं व्यावर्त्तयति **विभुरिति** । भगवत्कर्तृक एव जगति जोवार्थत्वात, तन्माययैव भगवान् जगत्कृतवान् । येन केनाऽपि जगत्करणात्, **विभुरिति** ।।२५।।

व्याख्या—अपने को जिस कारण से असत माना वह ही माया है. प्रथम कही हुई सत् असत् रूपा मोह में डालने वाली जो शक्ति है वही माया है, जिसकी आत्मा सत् एवं असत् रूप है, स्वभाव से वह सत्‌रूप है अन्यथा उसका अङ्गीकार करने के कारण वह असत् है, उस (माया) की आत्मा (स्वरूप) वैसी ही है यह (द्रष्टा) ही आत्मा है, वह (माया) धर्म (गुण) रूप है, उसका स्वरूप आत्मा ही देती हैं अथवा उसका (माया का) स्वरूप त्रितयात्मक तीन तरह का है (आत्मा, सत्व और ज्ञान रूप है) वह माया गुण रूप है क्योंकि इस द्रष्टा जीव की शक्ति है, दृश्य पदार्थ का ढूँढ़ते हुए अपने को ही देखती है 'शक्ति' शब्द का तात्पर्य है, उत्तर (होने वाले) कार्य को करने की सामर्थ्य धारण करती है, अतः उसका नाम (माया) है 'माया सह वर्तत इतिमाया'

मेरे साथ रहती है वह माया, इस माया पद मे ‘म्’ में जो ‘अ’ है वह व्याकरणानुसार दीर्घ हुआ है जिससे माया से माया पद बना है।

हे महाभाग्यशाली ! सम्बोधन से यह सूचित किया है कि यह अर्थ समझना अतिशय दुरूह (कठिन) है किन्तु उसका ज्ञान आपको हुआ है अतः आप महाभाग्यवान् हैं ‘ययेदं निर्ममेविभुः’ सर्व समर्थ प्रभु ने सार को न खेंचकर जीव की उस चित्त शक्तिरूप माया से यह जगत् बनाया है, ‘विभु’ पद से उस भावरूप शक्ति के कर्तव्य का निषेध करते हैं सारांश यह है कि जगत् का कर्तापन भगवान् में ही है। (उस भगवान् ने) जीव स्वरूप के लिए ही जगत् की रचना की है, अतः उसकी चित्त शक्तिरूप माया को करण कर भगवान् ने जगत् रचा है, भगवान् किसी भी साधन से जगत् रचने में समर्थ है क्योंकि ‘विभु’ सर्व समर्थ है ॥२५॥

आभास—या (त्वया) सामान्यतः सृष्टिरुक्ता, तां विस्तरेण निरूपयति—

आभसार्थ—जिस सृष्टि को आपने सामान्य रूप से कहा उसको विस्तार से निरूपण करते हैं—

श्लोक—**कालावृत्त्य तु मायायां गुणमय्यामधोक्षजः।**
पुरुषेणाऽऽत्मभूतेन वीर्यमाधत्त वीर्यवान् ॥२६॥

श्लोकार्थ—जिनको, ज्ञान, इन्द्रियों से नहीं हो सकता है ऐसे वीर्य वाले भगवान् ने काल की क्रिया से गुण वाली हुई माया में अपने अंशरूप पुरुष द्वारा वीर्य का आघात किया ॥२६॥

सुबोधिनी—**कालवृत्त्येति** । तु शब्दः पक्षं व्यावर्त्तयति । न वा जीवः कर्ता, न वा अन्येन करोतीति । कालस्य वृत्तिः, कालस्तत्र समागत्य परिवृतः, प्रदक्षिणं कृतवान् । कालपरावृत्त्या कृत्वा मायायां गुणक्षोभोजातः । कालेन व्यापृता क्षुब्धगुणा जातेत्यर्थः । तदा सा व्यामुग्धा सती पुरुष इव कामान्धा जाता, तदा भगवानिन्द्रियातीत एव तस्या अदृश्य एव भूत्वा तस्या भर्तृयोग्यमात्मनः सकाशात् एकं पुरुषं निर्ममे । स हि भर्तृयोग्यो भगवदंशः पुरुषोत्तमात्मक एव । तस्य स्वतः प्रवृत्त्यभावात्, तं निमित्तीकृत्य भगवान् स्वयमेव तदन्तर्यामी भूत्वा, तस्यांवीर्यमाधत्त,यतः स्वयमेव वीर्यवान् । पुरूषजीवयो र्वीर्यभावात्, कोशाभावात्, शरीर एव तयोः कोशसम्भवात् । अतः पुरुषं निमित्तीकृत्य भगवत्स्थापितं वीर्यं मयायां स्थितं जीवप्रवेशात् महत्तत्वमभवत् ।२६।

१—सृष्टि की उत्पत्ति से पहले जब भगवान् के सिवाय कोई नहीं था उस समय चित्त शक्ति से कही हुई माया सदसदात्मिका भगवान् में थी—‘प्रकाश’

व्याख्या—'तु' शब्द से उस पक्ष को जिसमें जीव को जगत्कर्ता कहा गया है असत् कहते हैं, क्योंकि जीव जगत् का कर्ता नहीं है और न दूसरे किसी से जगत् की रचना हुई है, अब जगत् रचना किस प्रकार हुई वह प्रकार बताते हैं कि, काल ने आकर माया की प्रदक्षिणा की जिससे माया गुणक्षोभ हुआ अर्थात् काल से व्यपृत होने से उसके गुणों में क्षुब्धता उत्पन्न हुई जिससे वह मोह को प्राप्त हो जाने से पुरुष की तरह कामान्ध बन गई, भगवान् इन्द्रियातीत ही रहते हुए उससे अदृश्य होकर अपने में से उनने एक पुरुष उत्पन्न किया जो उस (माया) के पति होने योग्य था। वह भर्ता के योग्य भगवदंश पुरुषोत्तम रूप ही था, वह पुरुष स्वतः प्रवृत्ति करने में समर्थ नहीं होने से, उसको निमित्त बनाकर भगवान् स्वयं (खुद) ही उसके अन्तर्यामी हो गए फिर उस (माया) में वीर्य डाला, क्योंकि स्वयं ही वीर्यवान् हैं, पुरुष और जीव दोनों में वीर्य का अभाव है कारण कि 'कोश' शरीर में ही होते हैं, अतः पुरुष को निमित्त मात्र बनाकर भगवत्स्थापित वीर्य माया में स्थित हुआ, फिर जब उसमें जीव का प्रवेश हुआ तब वह महत्तत्व बना ॥२६॥

श्लोक--**ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् ।**
विज्ञानात्माऽऽत्मदेहस्थं विश्वं व्यञ्जंस्तमोनुदः ॥२७॥

श्लोकार्थ--अनन्तर काल की प्रेरणा वालो उस माया से महत्तत्व उत्पन्न हुआ जो महत्तत्व अपनी देह स्थित जगत् के अन्धकार को नाश कर उसको प्रकाश देने वाला विज्ञानात्मा है ॥२७॥

सुबोधिनी—तस्यामेव स्थितस्य बीजस्य महत्तत्वता नाऽस्तीति, प्रसवार्थं कालक्षोभात् प्रसवकर्त्र्यास्तस्या महत्तत्त्वमभवदित्याह-**अव्यक्तात्कालचोदितादिति**। जीवधर्मादेव भगवदंशाच्च सर्वं चेतनं कार्यं जायते। सङ्घातोत्पत्तिरेवाऽत्राऽभीष्टा, सङ्घात एव च लीयते। स हि विज्ञानात्मा जातः **महत्तत्वमिति। महदिति** तस्य नाम। **तत्त्वमिति** भगवतः कारणभावः। तस्य जनने गुणभावेऽपि पश्चात्प्रधानभावात्, तत्त्वतां परित्यज्य महान् पुंस्त्वेन निर्दिष्टः। स हि विविधज्ञानात्मा जातः तद्द्वारैव च सर्वं जगज्जातम्, क्रमसृष्टिपक्षत्वात्। तदा तस्य विज्ञानेन स्वस्मिन् विद्यमानं जगत प्रकाशयुक्तं जातम्। तद्गतमावरणं च तमो दूरीभूतम्, तदाह-**स विज्ञानात्मा आत्मदेहस्थमेव विश्वं प्रकाशयस्तमोनुदो जातइति**। स जगज्जननार्थं भगवता सृष्ट इति पुनस्तूष्णीं तस्मिन् स्थिते कार्यार्थं भगवता स दृष्टः ॥२७॥

व्याख्या - उस माया में स्थित बीज, महत्तत्व नहीं है, किन्तु जब काल के क्षोभ से उस माया का प्रसव हुआ तब वह महत्तत्व बना, चेतन कार्य की उत्पत्ति जीव के धर्म (गुण) से

और भगवदंश से ही होती है। यहाँ संघात की उत्पत्ति ही इच्छित है और लय भी संघात में होती है। वह ही विज्ञानात्मा हुआ। 'महत्तत्वमिति' 'महत्' उसका नाम है 'तत्वं' कहने से बताया है कि इसमें भगवान् का कारण भाव है। इसलिये यह 'तत्व', 'महत्तत्व' कहा जाता है। वह उत्पन्न होने से गुणभाव वाला होने पर भी अनन्तर प्रधान भाव से तत्वपन का त्याग करता है जिससे वह महान् पुरुषत्व से निर्दिष्ट हुआ है। वह हो विविधज्ञानों की आत्मा (स्वरूप) बना है। क्रम से जो सृष्टि होने का पक्ष (मत) है। उसमें यों माना जाता है उसके द्वाराही सकल जगत् उत्पन्न हुआ है। तब उसके विज्ञान से अपने में विद्यमान जगत् प्रकाश से युक्त (प्रकाशित) हुआ। उस जगत् का आवरण (पर्दा) जो तम् (अन्धकार) था वह नाश हो गया। इसलिए कहा है कि 'स विज्ञानात्मा आत्मदेहस्थमेव विश्वं प्रकाशयंस्तमोनुदो जात इति' उसको (विज्ञानात्मा को) जगत् को उत्पत्ति के लिए भगवान् ने रचा है इसलिए फिर उसके मौन स्थित होते ही कार्य के लिए भगवान् से वह देखा गया ॥२७॥

श्लोक——**सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः ।**
आत्मानं व्यकरोदात्मा विश्वस्याऽस्य सिसृक्षया ॥२८॥

श्लोकार्थ——भगवान् से देखे हुए उस अंश, गुण, काल और आत्मा रूप ने विश्वात्मा होने से इस विश्व की रचना करने में अपने को संलग्न किया ॥२८॥

सुबोधिनी—कालोऽपि समागतः, कारण**गुणा** अपि समागताः सत्त्वादयः, **अंशोऽपि** पुरुषः समागतः, **आत्मा** जीवोऽपि। एते यस्मिम्, तादृशो भूत्वा चतुर्मूर्तिर्भगवदृष्ट **आत्मानं विविधमकरोत्**, व्यापाराविष्टं कृतवान्। यतोऽयं **विश्वास्याऽ**प्यात्मा, अन्यथा स्वात्मा न व्यापृतः स्यात्। तथा किमर्थमकरोदित्याशङ्क्याऽऽह–**विश्वस्याऽस्य सिसृक्षयेति**। स हि पूर्वं ब्रह्मविदिव स्थितः, पश्चात्कार्यव्यापृतो जात इत्यर्थः ॥२८॥

व्याख्या—इस विज्ञानात्मा में काल, सत्वादि कारण के गुण, अंश पुरुष और आत्मा (जीव) भी प्रकट हुए, जिससे वह भगवान् से देखा हुआ वह चतुर्मूर्ति अपने को विविध करने लगा अर्थात् कार्य करने में अपने को संलग्न किया क्योंकि यह विश्व की आत्मा है, यदि आत्मा न होती तो अपनी आत्मा कार्य में निमग्न नहीं होती। यों किस कारण से किया ? इसका उत्तर देते हैं कि इस विश्व के रचने की इच्छा से किया वह ब्रह्मवेत्ता की तरह साक्षी रूप से स्थित था, बाद में कार्य में संलग्न हुआ ॥२८॥

श्लोक——**महत्तत्त्वाद्विकुर्वाणादहन्तत्त्वं व्यजायत ।**
कार्यकारणकर्त्रात्मा भूतेन्द्रियमनोमयः ॥२९॥

श्लोकार्थ––वह महत्तत्व जब कार्य में विशेष निमग्न होने लगा तब उससे (महत्तत्व से) कार्य, कारण और कर्त्तारूप, भूत इन्द्रियाँ तथामनोमय अहंकार उत्पन्न हुआ ॥२९॥

सुबोधिनी–महत्तत्त्वादिति। स्वातन्त्र्याभावात् पुनः कारणभावमेवाऽऽपन्न इति महत्तत्वादित्युक्तम् स यदा **विशेषेण कुर्वाणो** जातः, कार्यमात्मार्थं कर्तुं मैच्छत्, तदा तस्माद**हन्तत्त्वमजायत**। तस्य त्रैविध्यं पूर्ववन्निरूपयति–**कार्य्यकारणेति**, कार्यमधिभूतम्, कारणमध्यात्मम्, कर्ता अधिदैवम्। स त्रितयात्मा भूत्वा भूतेन्द्रियमनोमयो जातः। भूतानामिन्द्रियाणां मनसश्च जनक स्त्रिविधोऽहङ्कारो जात इत्यर्थः ॥२९॥

व्याख्या – इस श्लोक में विज्ञानात्मा न कहकर 'महत्तत्वात्' कहा जिसका कारण कहते हैं कि 'स्वातन्त्र्याभावात्' स्वतन्त्र न होने के कारण से फिर वह पहली महत्तत्व की (कारणकी) स्थिति से प्राप्त हुआ। वह (महत्तत्व) जब कार्य करने में विशेषरीति से लगा अर्थात् अपने लिए कार्य करने की इच्छा की तब उस (महत्तत्व से) अहन्तत्व उत्पन्न हुआ। उस (अहन्तत्व) का तीन प्रकार पूर्व की तरह निरूपण करते हैं १-कार्य (अधिभूत) २-कारण (अध्यात्म) कर्त्ता (अधिदैव) वह तीन रूप आत्मा होकर भूत, इन्द्रियाँ और मनोमय बनकर अहन्तत्व हुआ अर्थात् भूत, इन्द्रियाँ और मन को उत्पन्न करने वाला अहंकार हुआ ॥२९॥

आभास––तान् भेदान् गणयति––

आभासार्थ––निम्न श्लोक से उन भेदों को गिनाते हैं––

श्लोक––**वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा।**
अहन्तत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ॥
वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः ॥३०॥

श्लोकार्थ––अहंकार तीन तरह का है १-वैकारिक २-तैजस ३-तामस। जब अहंकार कार्य में विशेष मग्न होता है तब वैकारिक अहंकार से मन तथा वैकारिक देव उत्पन्न हुए, जो देवता पदार्थों का भान (ज्ञान) कराते हैं ॥३०॥

सुबोधिनी—वैकारिक इति। **वैकारिकः** सात्त्विकः, **तैजसो** राजसः, **तामसो** भू हेतुः। सात्त्विकात्सृष्टिमाह–**अहन्तत्त्वादिति**। '**वैकारिकाश्च ये देवाः**' इति गन्धर्वादिदेवव्युदासः। सात्त्विकाऽहङ्कारकार्यभूता ये देवाः तेऽपि सात्त्विका जाता इत्यर्थः। तेषां भिन्नत्वे प्रमाण-

माह-**अर्थाभिव्यञ्जनं यत इति** । देवाधिष्ठानव्यतिरेकेण, केवलादिन्द्रियात् शब्दज्ञानादिकं न भवतीति, सामर्थ्यं देवानामेव । इन्द्रियाणामेव तथात्वं कल्प्येतं शास्त्रं स्यात् । यथा सिद्धमत्रोच्यत इति देवाधीनैव विषयप्रकाशनशक्तिः ॥३०॥

व्याख्या—वैकारिक अहंकार सात्विक है, तैजस अहंकार राजस है, भूतों का जो कारण रूप अहंकार है वह तामस अहंकार है, सात्विक अहंकार से जो सृष्टि हुई उस को अब कहते हैं, सात्विक अहंकार से मन और वैकारिक (सात्विक) देव हुए । 'वैकारिकाश्च ये देवाः' यों कहने से यह सूचित किया है कि ये देव गन्धर्वादि देवों से पृथक हैं, सात्विक अहंकार के कार्य रूप जो देव हैं वे भी सात्विक उत्पन्न हुए गन्धर्वादिसे देव भिन्न हैं जिसमें प्रमाण देते हैं कि 'अर्थाभिव्यञ्जनं यतः' जो देव लोक में पदार्थों का ज्ञान कराते हैं वे ये हैं जो सात्विक अहंकार से उत्पन्न हुए हैं । गन्धर्वादि देव पदार्थों का ज्ञान नहीं कराते हैं, यदि इन्द्रियों में वे देव न रहते तो केवल इन्द्रियाँ शब्दादि (सुनने देखने आदि) का ज्ञान नहीं कर सकती थी ज्ञान कराने का सामर्थ्य इन देवों में ही है । यदि शास्त्र कल्पित हो तो इन्द्रियाँ भी कल्पित हो, जैसे शास्त्रों द्वारा निर्णय हुआ है वह ही यहाँ कहा गया है, विषयों को प्रकाश करने की शक्ति देवों के अधीन ही है ॥३०॥

आभास—राजसात् सृष्टिमाह—

आभासार्थ—निम्न श्लोक में राजस अहंकार से उत्पन्न सृष्टि का वर्णन करते हैं ।

श्लोक—**तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च ।**
तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः ॥३१॥

श्लोकार्थ—ज्ञान और कर्म वाली इन्द्रियां तैजस (राजसाहङ्कार) से उत्पन्न होने से तैजस (राजस) हैं, तामस भूत और सूक्ष्मों का कारण है, जिससे आत्मा (भगवान्) का ज्ञान कराने वाला आकाश उत्पन्न हुआ है ॥३१॥

सुबोधिनी—तैजसानीन्द्रियाण्येवेते । एवकारः सात्विकत्वतामसत्वव्युदासार्थः । ज्ञानं सत्त्वप्रधानम्, क्रिया तमः प्रधानेति । उभयविधानामिन्द्रियाणां राजसत्वे युक्तिः पूर्वमुक्तैव । **चकाराद्बुद्धिप्राणौ** । तामसात्सृष्टिमाह **तामस इति** । भूतसूक्ष्माणामादिः शब्दतन्मात्रम् । तस्य आदित्वेनैव ग्रहणात्तामस इति पुल्लिङ्गनिर्देशः, अहङ्कारविशेषणं वा । तदा भूतानां सूक्ष्माणां च स आदिरिति, सामान्यतस्तस्यकार्यंनिर्दिष्टम् । यतोऽहङ्कारात् शब्दतन्मात्राद्वा **खमाकाशमात्मनो** भगवतो **लिङ्गम्**, बोधकं, शरीरं वा । आकाशवद्व्यापको **निर्लेपश्चे**ति । यथा वा आकाशे अभ्रतमः**प्रकाशा भवन्ति**, न भवन्ति च, तथापि न तैराकाशो **लिप्यते**, एवमात्मा, **'आकाशशरीरं ब्रह्म' इति श्रुतेश्च** । [illegible] तथा कथनम् । अन्यथा तामससृष्टिरधमेति न वक्तव्या स्यात् ॥३१॥

व्याख्या—कर्मेन्द्रियां तथा ज्ञानेन्द्रियां ये दोनों राजस हैं ये दोनों प्रकार की इन्द्रियां राजस हैं जिसकी युक्ति पूर्व में द्वितीय स्कन्ध में कही हुई है 'एव' शब्द देने का भाव (आशय) यह है कि दोनों इन्द्रियों में न सात्विकता है और न तामसत्व है, यों तो ज्ञान सत्व प्रधान है और कर्म (क्रिया) तामसप्रधान हैं, किन्तु द्वितीय स्कन्ध में युक्ति पूर्वक इन्द्रियों का राजसत्व सिद्ध किया है। 'च' शब्द से बुद्धि और प्राण कहे हैं।

अब श्लोक के उत्तरार्ध में तामस से उत्पन्न सृष्टि कहते हैं भूत सूक्ष्मों की आदि (कारण) अर्थात् शब्द तन्मात्राऐं कारण हैं तामस होने से 'आदि' शब्द पुल्लिङ्ग दिया है अथवा अहंकार का विशेषण है। विशेषण मानने पर तब भूतों के सूक्ष्म का सामान्यत: कारण शब्द तन्मात्राओं को माना गया है क्योंकि अहंकार से वा शब्द तन्मात्रा से उत्पन्न आकाश, आत्मा (भगवान्) का बोधक (ज्ञान कराने वाला) है अथवा शरीर है, कारण यह है कि भगवान् आकाश की तरह ही व्यापक तथा निर्लेप है एवं जैसे आकाश में मेघों से अन्धकार और फिर प्रकाश होता है किन्तु आकाश उनसे लिप्त नहीं होता है इस प्रकार आत्मा (भगवान्) भी किसी से लिप्त नहीं होता है 'आकाश शरीरं ब्रह्म' इस श्रुत्यनुसार ब्रह्म का शरीर आकाश है। अत: जब शरीर ही लिप्त नहीं होता है तब आत्मा कैसे लिप्त होगा ? इस सृष्टि के ऐसे प्रकार महात्म्य के लिए कहा है, अन्यथा तामस सृष्टि अधमा है यों कहना चाहिए।।३१।।

आभास–आकाशाद्वायो: सृष्टिमाह

आभासार्थ—आकाश से वायु की उत्पत्ति हुई जिसका इस श्लोक में वर्णन करते हैं–

श्लोक—**कालमायांशयोगेन भगवद्वीक्षितं नभः।**
नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ।।३२।।

श्लोकार्थ—जब भगवान् की दृष्टि आकाश पर पड़ी, तब काल, माया तथा जीव के सम्बन्ध से वह (आकाश) कार्य करने लगा, जिससे आकाश में से स्पर्श उत्पन्न हुआ, स्पर्श जब कार्य करने लगा तब उससे वायु उत्पन्न हुई ।।३२।।

सुबोधिनी— कालेति। पूर्ववत् कालो गुणक्षोभकः, माया गुणरूपा, अंशः पुरुषो जीवोऽपि वा। अत्राऽपि पूर्ववद्भगवद्दृष्टिः। **भगवद्वीक्षितं नभो जातमिति** भिन्नम्। कार्योन्मुखात्सृष्टिमाह **नभस इति। नभसः** सकाशादन **सृतमुत्पन्नं स्पर्शं** स्पर्शतन्मात्रम्। तत्पुनः **विकुर्वदनिलं निर्ममे** ।।३२।।

व्याख्या—पूर्व की तरह गुणों में क्षोभ कराने वाले काल, माया तथा अंश (पुरुष या जीव) हैं इनके सम्बन्ध से आकाश कार्य में लगा तब आकाश से उत्पन्न स्पर्श तन्मात्रा ने वायु उत्पन्न की आकाश को भगवान् ने देखा, यह वाक्य-पृथक है ।।३२।।

श्लोक—**अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः।**
ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ।।३३।।

श्लोकार्थ—आकाश से भी बहुत बलवान् वायु ने कार्य, निरत हो, रूप तन्मात्रा पैदा की उस तन्मात्रा ने लोक का लोचन तेज पैदा किया ॥३३॥

सुबोधिनी—एवमनिलोऽपि नभसा स्वकारणेन कृत्वा उरुबलान्वितो जातः। तदा रूपतन्मात्र ससर्ज। ततो ज्योतिर्जातम्। **लोकस्य लोचनमिति** माहात्म्यं तस्य। आलोकाभावे लोकोऽस्मदादिर्विद्यमानेऽपि चक्षुषि न पश्येत। अतो लोकस्य लोचनमित्युक्तम ॥३३॥

व्याख्या—इस प्रकार वायु भी अपने कारण आकाश से विशेष बलवान हुआ तब उसने रूप तन्मात्रा को उत्पन्न किया, उस (रूप तन्मात्रा) से लोक का लोचन रूप 'तेज' पैदा हुआ, यदि तेज न होता तो आंख होते हुए भी विद्यमान पदार्थों को लोक देख नही सकते इसलिए तेज को लोचन कहा है ॥३३॥

श्लोक—**अनिलेनाऽन्वितं ज्योतिर्विकुर्वत्परवीक्षितम्।**
आधत्ताऽम्भो रसमयं कालमायांशयोगतः ॥३४॥

श्लोकार्थ—जब वायु से मिले हुए तेज पर भगवान् की दृष्टि पड़ी तब वह भी कार्य करने लगा, उस (तेज) ने काल, माया और जीव के संयोग से 'जल' पैदा किया ॥३४॥

सुबोधिनी—**अनिलेनाऽन्वितं ज्योतिरिति।** पूर्ववत्कारणाद्बलसिद्धिः। **परेण** भगवता **वीक्षितं** सत्। **अम्भो रसमयमिति**। रसतन्मात्रं जलात् पृथक् न प्रतीयत इति श्लिष्टमेवोत्पन्नमित्युक्तम्। अत्राऽपि वा क्रमः कल्पनीयः; प्रथमतो **रस**तन्मात्रम्, पश्चादम्भ इति। **कालमायांशयोगत इति**। ज्योतिरित्यस्य साधनम्। एवमग्रेऽपि॥३४॥

व्याख्या—वायु सहित तेज कहने का भावार्थ यह है कि इसने भी ऊपर कहे हुए के समान अपने कारण से बल प्राप्त किया, भगवान् के देखते ही उसने रस तन्मात्रा उत्पन्न किया जिसने जल को पैदा किया किन्तु इस तन्मात्रा जल से पृथक देखने में नहीं आती है जिससे दोनों की उत्पत्ति साथ में कही है, किन्तु यहां भी जैसे अन्यों की उत्पत्ति हुई है वैसा क्रम समझना चाहिए पहले रस तन्मात्रा अनन्तर उससे जल उत्पन्न हुआ। काल, माया और अंश (पुरुष या जीव) के संयोग से ही उत्पत्ति पूर्ववत् हुई, ज्योति (तेज) इसका साधन है यों आगे भी समझ लेना ॥३४॥

श्लोक—**ज्योतिषाम्भोऽनुसंस्पृष्टं विकुर्वद् ब्रह्मवीक्षितम्।**
महीं गन्धगुणामाधात्कालमायांशयोगतः ॥३५॥

श्लोकार्थ—जब जल पर ब्रह्म की दृष्टि पड़ी तथा तेज से सामर्थ्य मिली तब जल कार्य करने लगा, कार्य करते हुए काल माया और जीव से सम्बन्ध होने पर गन्ध के गुण वाली पृथ्वी पैदा की ॥३५॥

सुबोधिनी—ज्योतिषाऽनुसंस्पृष्टमम्भो दत्तसामर्थ्यं जलम्। **गन्धगुणां महीमिति** पूर्ववत्। प्रथमतो गन्धतन्मात्रम्, तस्मान्मही ।।३५।।

व्याख्या—तेज से प्राप्त सामर्थ्य वाले जल ने गन्ध गुण वाली पृथ्वी उत्पन्न की पहले गन्ध तन्मात्रा पश्चात् उससे पृथ्वी पैदा हुई ।।३५।।

आभास—तेषां धर्मानाह—

आभासार्थ—निम्न श्लोकों से उनके गुण कहते हैं—

श्लोक—**भूतानां नभआदीनां यद्भाव्यावरावरम् ।**
तेषां परानुसंसर्गाद्यथासङ्ख्यं गुणान् विदुः ॥ ३६ ॥

श्लोकार्थ—आकाश आदि भूतो में क्रमशः एक के पीछे दूसरे गुण उत्पन्न होते हैं क्योंकि उनको कारण का सम्बन्ध है, जिससे उनमें संख्यानुसार गुण हैं यों विद्वान जानते हैं ।।३६।।

सुबोधिनी—भूतानामिति। नभ आदिर्येषाम्, वायुप्रभृतीनां मध्ये यदेवोत्तरोत्तरमग्रे भाव्यं तदेवाऽधिकगुणम्। तत्र हेतुः—**तेषां परानुसंसर्गादिति** । कारणानुसंसर्गात् । **यथासङ्ख्यं** सङ्ख्यामनतिक्रम्य। आकाशस्यैको गुणः शब्दः, वायोर्द्वयं शब्दस्पर्शौ, तेजसस्त्रयः शब्दस्पर्शरूपाणि, अम्भसश्चत्वारः शब्दस्पर्शरूपरसाः, पृथिव्याअाऽधिको गन्धः। **विदुरिति** प्रमाणम् ।।३६।।

व्याख्या—जिन वायु आदि भूतों की आदि आकाश है उनमें जो कुछ उत्तरोत्तर आगे होने वाला वह ही प्रत्येक में अधिक गुण है। जिसका कारण यह है कि उनको अपने-अपने कारण से सम्बन्ध है, अतः संख्यानुसार सब अपने-अपने गुण को प्रकट करते हैं जैसे प्रथम आकाश हैं तो वह एक गुण शब्द' को पैदा करता है दूसरा वायु है तो वह दो गुण 'शब्द' और 'स्पर्श' को उत्पन्न करती है। तीसरा तेज है तो वह तीन गुण 'शब्द' 'स्पर्श' और 'रूप' पैदा करता है, चौथा जल है तो वह चार गुण, 'शब्द', 'स्पर्श', 'रूप', और 'रस' पैदा करता है तथा पांचवां पृथ्वी है तो वह पांच गुण प्रकट 'शब्द', 'स्पर्श', 'रूप', 'रस' और 'गन्ध' को पैदा करती है, सारांश यह है कि प्रत्येक भूत के इस प्रकार के गुणों को तत्वज्ञ जानते हैं ।।३६।।

आभास—एतेषां तत्त्वानां चेतनानां कार्योपयिकरूपसिद्धयर्थं भगवद्भजनमाह—

आभासार्थ—चेतन प्राणिओं को कार्य करने में जो हमारा रूप उपयोगी हो वह रूप हमें प्राप्त हो तदर्थ वे तत्व भगवान् का भजन करने लगे यों निम्न श्लोक में कहते हैं।

श्लोक—**एते देवाः कला विष्णोः कालमायांशलिङ्गिनः ।**
नानात्वात् स्वक्रियाऽनीशाः प्रोचुः प्राञ्जलयो विभुम् ।। ३७ ।।

श्लोकार्थ—काल, माया और जीव के लिङ्ग (चिन्ह) वाले ये देव, विष्णु की कलाएं है, पृथक–पृथक होने के कारण अपने ब्रह्माण्ड निर्माण के कार्य में आसक्त थे। अतः हाथों की अंजलि बाँध प्रणाम करते हुए प्रभु को प्रार्थना करने लगे ॥ ३७ ॥

सुबोधिनी – एते देवा इति। देवेन्द्रियाणामैक्यविवक्षायां दशत्वम्, भूततन्मात्राणि च दश, महदहङ्कारमनांसि त्रीणि, एवं प्राकृतिकस्त्रयोविंशतिको गणः। सामान्यनिर्देशात् कालमायादयोऽपि स्तोत्रं कुर्वन्तीति ज्ञायते। सर्वे देवा **विष्णोर्भगवतः कलाः**, धर्मा इत्यर्थः। **कालमायांशाः** लिङ्गानि वर्तन्ते येषामिति, हेतुसहिताअपि गुणत्रयकार्यरूपत्वात् भिन्नभावं प्राप्ताः। अतो नानात्वाद्भिन्नभावात् **स्वक्रियायां** ब्रह्माण्डनिर्माणे **अनीशाः** सन्तः। त्रिविधत्वादमेलनम्। प्रत्येकं त्वसमर्थाः। अतो **विभुं** समर्थम्, **प्राञ्जलयो भूत्वा प्रोचुः**, स्तुतिं कृतवन्त इत्यर्थः। एतेषां देहवचनादिकं विचार्यते। तत्त्वान्येतानि भगवद्भावभूतानि। भावो नाम सर्वान् प्रति सामान्यकारणता। भगवतः कारणता पञ्चविंशतिप्रकारेण जातेत्युक्तं भवति। भावप्राधान्येन धर्मिणोऽप्राधान्यात्, सच्चिदानन्दरूपाण्यपि तिरोहितरूपाणि भवन्ति। यावद्धर्ममात्रप्राकट्यं भगवता क्रियते तादृशा एव भवन्ति। भगवतः सर्वतः पाणिपादत्वात् यदंशा एते प्रतिरूपतया निर्गताः, तत्र सर्वत्रैव कारणप्रतिरूपहस्तपादादीनां विद्यमानत्वात्, तैरेव तेषां व्यवहारः। शरीरं तूत्पन्नमेव। अभिमानिनोऽपि चिदंशा देवविशेषाः। अत एव नाऽधिकबलत्वम्। वेदे तु तत्त्वस्थानीयः प्रजापतिरेवेति, समष्ट्यनन्तरमेव तत्रत्यानां पदार्थानां निरूप्यमाणत्वात्। **'द्वया ह प्रजापत्याः'** इत्यत्राऽपि सृष्टिभेदेन उभयविधेन्द्रियाण्यपि तत्र सन्तीति, तेषामपीदमेव। रूपमिति, **'चक्षुरुदगायत्'** इत्यादि संगच्छते। यथाऽत्र महत्तत्त्वम्, तथा वेदे प्रजापतिः; यथाऽत्र पुरुषः; तथा विराट्; यथा भगवान् तथा यज्ञः; यथा कालः, तथा परमेष्ठी, यथा माया, तथा तेषां प्रयत्न इति। उत्तरकाण्डे तु यज्ञस्थानीयं ब्रह्म। यथाऽत्र भगवत्स्तुतिः, तथा तत्रोद्गीथः, आधिदैविकत्वात्तेषामस्मदादीन्द्रियनियामकत्वेनोच्यन्ते, अन्यथा दोषगुणादिनियमा भगवदाज्ञा च प्रत्येकं कर्तव्या स्यात्। अतो भगवदिन्द्रियप्रतिरूपेन्द्रियाणाँ तत्त्वेषु विद्यमानत्वात्, विसर्गे जीवेष्वपि तथात्वात्, न काऽप्यनुपपत्तिः ॥३७॥

व्याख्या इन्द्रियां और उनके देवों को साथ में गिनने से वे दश माने जाते हैं कारण कि उनको एकता बताने की इच्छा है अतः दश कहे हैं, भूत और तन्मात्राऐं दश हैं (५ भूत और ५ तन्मात्राऐं मिलाकर दश है)। महत्तत्व, अहंकार और मन ये तीन हैं, इस तरह प्राकृतिक गुण २३ का होता है, स्तुति करने का निर्देश सामान्य रूप से कहने के कारण जाना जाता है कि काल और मायादि भी स्तुति करते हैं, सर्वदेव भगवान् विष्णु की कलाऐं[2] हैं, जिनके काल, माया और अंश (जीव) चिन्ह हैं इस प्रकार अपने कारणों सहित होते हुए भी तीन गुणों के कार्य रूप होने से पृथक-पृथक भावों को प्राप्त हुए हैं, अतः नाना होने से भिन्न–भिन्न भाव वाले हुए, जिस

१—प्रकृति से उत्पन्न २—धर्म

कारण से ब्रह्मांड की रचना करने में असमर्थ हुए, तीन प्रकार के होने से उनका मेल भी न हो सका, अकेले कार्य करने में प्रत्येक असमर्थ रहा। अतः (इस कारण से) समर्थ प्रभु को हाथ जोड़कर कहने लगे अर्थात् स्तुति करने लगे।

इनके देह वचनादि का विचार किया जाता है, ये तत्व भगवान् के भाव (स्वभाव) रूप बने हुए हैं, 'भाव' का तात्पर्य है कि सर्व तत्वों के प्रति भगवान् की कारणता समान[1] है, भगवान् की कारणता २५[2] प्रकार से हुई है, क्योंकि भाव की प्रधानता जहां होतो है वहां धर्मों की प्रधानता नही होती है अर्थात् भगवद्रूपी तत्वों में भगवान् की सच्चिदानन्द रूपता नहीं है। अतः उनमें सच्चिदानन्द रूप भी तिरोहित होते हैं। भगवान् जितने ही केवल धर्म उनमें प्रकट करते हैं वे वैसे ही धर्मयुक्त होते हैं। जिस भगवान् के ये अंश रूप प्रकट हुए हैं उस भगवान् के हस्तपादादि सर्वत्र प्राप्त हैं अतः सर्वत्र ही कारण के प्रतिरूप हस्तपादादि उनमें (तत्वों में) विद्यमान होने से वे उनसे ही अपना सर्व व्यवहार करते हैं, अर्थात् तत्वों को अपने कार्य करने में किसी प्रकार प्रतिबन्ध नहीं होता है, शरीर तो मिला ही है, उस शरीर के अभिमानी 'चिद्' के अंश रूप देव वे भी हैं ही, इसलिए ही श्रुति 'कनीयसा एव देवाः' (ये देव निर्बल हैं) कहती है वेद में तो तत्वों के स्थान पर प्रजापति कहा गया है, वहाँ समष्टि के अनन्तर ही वहां के पदार्थों का निरूपण किया है, 'द्वया, ह प्रजापत्याः' प्रजापत्य दो प्रकार के हैं यहाँ भी सृष्टिभेद से दोनों प्रकार की इन्द्रियां वहां हैं, इसलिए उनका भी यह ही रूप है, तब ही 'चक्षुरुदगायत्' (चक्षु बाहर प्रकट हुए) इत्यादि की संगति हो सकती है जैसे यहां **महत्तत्व** है, वैसे वेद में **प्रजापति** है, जैसे यहां **पुरुष** है वैसे वेद में **विराट्** है जैसे यहां **भगवान्** वैसे वहां (वेद में) **यज्ञ** है, जैसे यहां **काल** वैसे वेद में **परमेष्ठी** है, जैसे यहां **माया** वैसे वेद में उनका प्रयत्न है, उत्तरकाण्ड में यज्ञ के स्थान पर 'ब्रह्म' कहा है, जैसे यहां भगवत्स्तुति वैसे वेद में उद्गीयः है वे आधिदेविक हैं इसलिए वे हमारे[3] **इन्द्रियादि के नियामक कहे हैं**, यों न होता तो दोष और गुणादि के नियम और भगवान् की आज्ञा प्रत्येक को पालन करनी पड़ती, इस कारण से भगवान् की इन्द्रियों की प्रतिरूप इन्द्रियां तत्वों में विद्यमान होने से मोक्ष में भी जीवों की इन्द्रियां इस प्रकार की रहती हैं जिससे किसी प्रकार अयोग्यता नहीं है ॥३७॥

कारिका—**सृष्टौ तु साधकं रूपं भक्त्यादेर्विनिरूप्यते ।**
तत्त्वादिस्तोत्ररूपेण सर्वलीलासु तत्स्थितौ ॥१॥
तत्त्वैस्तु भक्तिनिर्द्धारो ज्ञानस्य ब्रह्मणा तथा ।
ऋषिभिर्यज्ञनिर्धारस्त्रितयं सृष्टिहेतुकम् ॥२॥

कारिकार्थ—सृष्टि में से मोक्ष की प्राप्ति का साधक भक्ति आदि हैं, यह तत्वादि ने प्रार्थना (स्तुति) कर सिद्ध किया है, तत्वों ने यह निर्णय किया है कि मोक्ष का साधक भक्ति है, ब्रह्मा ने यह निर्णय किया कि मोक्ष का साधक ज्ञान है और ऋषियों ने कहा है कि यज्ञ द्वारा मोक्ष प्राप्त होता है, सकल लीलाओं में सृष्टि की स्थिति के लिए वे तीनों कारण रूप हैं ॥१॥२॥

१—समानता भगवान् का स्वाभाविक गुण है।

२—२३ प्रकार का समूह ऊपर का है उनमें काल और माया के संयोग से २५ होते हैं।

३—जीव के देह में जो इन्द्रियां हैं उनके नियामक कहे हैं।

कारिका **भगवत्कार्यसिद्धयर्थम्, कामादिरहितं तथा ।**
साधकं नाऽन्यथारूपमित्यग्रे नाश उच्यते ।।३।।

कारिकार्थ - भगवत्सम्बन्धी कार्य की सिद्धि के लिए निष्काम भक्ति का स्वरूप मोक्ष प्राप्त कराने वाला है सकामभक्ति मोक्ष की सिद्धि नहीं करती है इसलिए आगे उसका नाश हो जाने को कहा है । ३।।

कारिका—**कालप्रयुक्ता भक्तिर्हि त्रयोदशविधा यतः**
अन्यथा सृष्टिकरणं शुद्धया नैव तद्भवेत् ।।४।।

कारिकार्थ—काल द्वारा होने वाली भक्ति १३ प्रकार[1] की कही है कारण कि तत्वों ने १३ श्लोकों से स्तुति की है। यदि यों न होवे तो शुद्ध भक्ति से इस सृष्टि करने का कार्य नहीं हो सकता ।।४।।

कारिका—**भक्तिप्रपत्ती प्रत्यक्षं भक्तिज्ञाने परोक्षतः ।**
सात्त्विकीयं समाख्याता वासन्तग्रैष्मभवातः ।।५।।

कारिकार्थ—भक्ति और प्रपत्ति (शरण) दोनों प्रत्यक्ष मोक्ष कराने वाले हैं भक्ति एवं ज्ञान परोक्ष से मुक्तिप्रद होते हैं, वासना (वसन्त ऋतु के) तथा ग्रीष्म (ग्रीष्म ऋतु के) भावों से यह सात्विकी क्रिया बताई हैं ।।५।।

कारिका—**राजसे भक्तिराहित्यात् तदर्थं प्रार्थना पुरा ।**
शरणाऽऽगमनं पश्चान्निन्दया साधनं फले ।।६।।

कारिकार्थ—राजस अहङ्कार में (राजस अहङ्कार होने पर) भक्ति नहीं हो सकती है, अतः इसके लिए पहले प्रार्थना करनी पड़ती है, पश्चात् शरण ली जाती है अनन्तर निन्दा के प्रकार से साधन एवं फल दोनों कहे हैं ।।६।।

कारिका—**तामसे ज्ञाननिन्दातः परोक्षे भजनं स्तुतम् ।**
भगवत्कार्यराहित्यहेतूक्त्या स्वस्य साधनम् ।।७।।

---

[1] ब्रह्मकल्प की सृष्टि अन्य प्रकार से होने से इसको शुद्धभक्ति नहीं रच सकती है । अतः काल द्वारा होने वाली १३ प्रकार की भक्ति कही हैं ।

कारिकार्थ—तामस अहङ्कार की दशा में ज्ञान की निन्दा हो जाती है और वियोग में (परोक्ष में) भजन की प्रशंसा की है, भगवत्कार्य (सेवा स्मरणादि) आदि में निकम्मा बन जाने से उसके हेतु को बता कर स्वयं साधनरूप बन जावें ऐसी प्रार्थना करते हैं ॥७॥

कारिका—**मलवत् प्रार्थना प्रोक्ता द्विविधा सा निगद्यते ॥७½॥**

कारिकार्थ—प्रार्थना मल सम हैं वह दो प्रकार की कही[1] है ॥

आभास—तत्र प्रथमं सात्विकीमुत्तमां भक्तिं प्रत्यक्षे निरूपयति—

आभासार्थ—उसमें से प्रथम बताते हैं कि जब भगवान् प्रत्यक्ष हो तब सात्विकी उत्तमाभक्ति होती है जिसका इस श्लोक में वर्णन करते हैं—

श्लोक—**देवा ऊचुः । नमाम ते देव ! पदारविन्दं प्रपन्नतापोपशमातपत्रम् ।**
यन्मूलकेता यतयोऽञ्जसोरु संसारदुःखं बहिरुत्क्षिपन्ति ॥३८॥

श्लोकार्थ—देव कहते हैं—हे देव ! शरणागतों के ताप का नाशक जो आपको चरणारविन्दरूप छतरी है, जिसके नीचे जिन्होंने आश्रय लिया है ऐसे योगीजन,[2] संसार के महादुःखों को शीघ्र ही सरलता से दूर फेंक देते हैं । इस प्रकार के आपके चरणारविन्द को हम प्रणाम करते हैं ॥३८॥

सुबोधिनी—**नमामेति** । नमनातिरिक्तस्य प्रत्यक्षे भजनस्याऽभावात्, **नमोनम एतावत्सदुपशिक्षितम्**'इति वाक्याच्च, स्वामिन्, ते चरणारविन्दं नमामेत्याहुः । नमने हेतुरूपमाह—**देवेति** । यत्रैव देवरूपता प्रतिमाति स एव नमस्यः । गुर्वादिष्वपि देवत्वमेव नमनप्रयोजकम्, गुरुत्वं तु परिचर्यायाम् । तच्च नमनं त्रिवधम्; लौकिकम्, वैदिकम्, भक्तिमार्गस्थितं च । तत्रेदं भक्तिमार्गस्थितमिति ज्ञापयितुमाह—**पदारविन्दमिति** । चरणस्य सुसेव्यता बुध्द्वा स्नेहेन यन्नमनं चरणारविन्दे, सा भक्तिः । यद्रुपस्य नमनं तद्वैधम्, यत्तद्गतधर्माणामैश्वर्यादीनां नमनं तल्लौकिकम् । अनाविभूतरूपस्य नमना**दरविन्द** मेत्येकवचनम् । सगुणत्वात्, सृष्ट्यौपयिकत्वात्; सामर्थ्ये क्लेशाभावस्य सहकारित्वात्, क्लेशनिवारकत्वं चरणारविन्दस्य प्रकार**द्वयेन** निरूपयति प्रपत्तिभक्तिभेदेन । तत्राऽपि प्रपत्त्यधिकारिणस्त्यागाऽसमर्थाः; भक्त्यधिकारिणस्तु त्यागसमर्था इति । अतः प्रथमं तापनिवारणरूपमाह—**प्रपन्नतापोपशमातपत्रमिति** । प्रपन्नानां शरणा-

---

[1] इन कारिकाओं में कहे हुए विषय की ३८ श्लोक से ५० श्लोक तक के श्लोकों में स्पष्टता की गई है । [2]—सन्यासी ।

गतानां येऽन्तर्बहिस्तापाः, **तदुपशमार्थं** निकट एव दूरीकरणार्थम्, भगवच्चरणारविन्दमातपत्रं भवति। आतपात्रायत इति भगवच्चरणारविन्दं ध्रुवस्येव प्रपन्नस्योपरि तिष्ठति। अनेन यत्र क्वचिदपि स गच्छति, तत्रैव तच्चरणारविन्दं तापं दूरीकुर्वदेव गच्छतीति भक्तवश्यता चरणधर्मो निरूपितः। कालकृतोऽयं ताप इत्यातपत्रतैव निरूपिता। स्वभावकृते तु अमृतत्वादि निरूपयति, कर्मकृते तु अगदादिभावेन निरूपयति। प्रपन्नार्थं भगवान् स्वयमागच्छति सह गच्छतीत्यप्युक्तम्। सर्वतो विरक्तान् भक्तान् प्रति चरणमाहात्म्यमाह—**यन्मूलकेता इति**। यस्य चरणस्य मूलमधोभागः। भगवच्चरणारविन्दाध एव सर्वदा तिष्टन्ति, न गृहवृक्षाद्यधः; ते मूलकेताः। निकेतनं केतः, स्थानमिति यावत्। यथेच्छव्यवहाराभावादनुपसर्गः। तर्हि तदर्थमन्यद्ग्रहं कर्तव्यमितिचेत्, पञ्चाग्नितपोवत्। तत्राऽऽह-**यतय इति**। भगवन्मार्गे प्रयत्नवन्तः। तत्र पूर्वावस्थात्यागः पूर्वाङ्गम्, तावन्मात्रपर्यवसिताः सालावृकभक्ष्या एव भवन्ति। त्यागासामीचीन्ये तु पाषण्डित्वमेव। ये तु भगवदर्थं यतयः, ते अञ्जसा अनायासेनैव उरुः अधिकं संसारदुःखं क्षुत्पिपासादिकृतं बहिरुत्क्षिपन्ति। पारलौकिकं च बहिरेव वर्तत इति मूलकेतानां तन्निवृत्तमेव। अतः सर्वपुरुषार्थरूपत्वाच्चरणारविन्दस्य, तन्नमामेति मुख्यो हेतुर्निरूपिताः। येषामर्थे भगवान् समागतस्ते त्रिविधा निरूपिताः, भगवदीयाः, प्रपन्नाः, भक्ताश्च ॥३८॥

व्याख्या—भगवान् जब प्रत्यक्ष होते हैं तब सिवाय प्रणाम करने के अन्य प्रकार का भजन नहीं हो सकता है, क्योंकि 'नमोनम'[1] एतावत्सदुपशिक्षितम्' इस वाक्य में ऐसी ही शिक्षा है, अतः हे स्वामी ! हम आपके चरणारविन्द को नमस्कार करते हैं, आपको नमस्कार इसलिए करते हैं कि आप देव हैं। जिस स्वरूप में देवत्व का भान हो वह स्वरूप ही नमन योग्य है, गुरुओं को भी जो प्रणाम किया जाता है उसका भी कारण यह है कि गुरुओं में देवत्व दिखता है गुरुत्व ही सेवा कराता है—वह प्रणाम तीन प्रकार के हैं १–लौकिक २–वेदिक ३–भक्तिमार्गीय, उनमें से यह नमन् भक्तिमार्गीय है, यों जताने के लिए 'पदारविन्द' पद दिया है, चरण का सुसेव्यपन[2] देख (समझ) कर जो प्रणाम स्नेह से किया जाता है वही भक्ति है, भगवान् के स्वरूप को जो प्रणाम किया जाता है वह प्रणाम वेदिक है (वेदविधि है) और जो प्रणाम भगवान् के ऐश्वर्यादि धर्मों को किया जाता है वह लौकिक प्रणाम है क्योंकि लोक में लोग ऐश्वर्यादि को ही नमते हैं।

अप्रकटित स्वरूप को नमन करने के कारण से ही 'चरणारविन्द' एकवचन दिया है, सगुण होने से चरणारविन्द सृष्टि रचना करने का साधन है अर्थात् चरणारविन्द से ही हमको (देवों को तत्व रूपों को) सृष्टि रचने की सामर्थ्य प्राप्त होगी, जिससे रचना करने में क्लेश न होगा।

---

[1] १ – बारम्बार नमन करना इतना ही सदुपदेश (शिक्षा) दिया है।

[2] २ - सरलता से सेवा होना समझकर, अर्थात् प्रणाम करने में किसी प्रकार श्रमादि नहीं है।

चरणारविन्द क्लेश मिटाने वाला है जिसको दो प्रकार से निरूपण करते हैं १–भक्ति से इन दोनों में जो शरणागति के अधिकारी हैं वे त्याग करने में समर्थ नहीं हैं अर्थात् वे त्याग नहीं कर सकते हैं, अतः शरण ही लेते हैं और जो भक्ति के अधिकारी हैं वे त्याग कर सकते हैं, अतः प्रथम चरणारविन्द ताप का निवारण करने वाला है यह प्रतिपादनार्थ कहते हैं कि 'प्रपन्नतापोपशमातपत्रम्' शरणागतों के जो भीतर के तथा बाहर के ताप हैं उनको शीघ्र ही शाँत करने के लिए भगवच्चरणारविन्द आत पत्र (छत्री) है अर्थात् ताप से रक्षा करने (बचाने) वाला है भगवान् का चरण भक्त के ऊपर ध्रुव की तरह अर्थात् सर्वत्र एवं सर्वदा विराजमान रहता है। इससे यह कहा है कि भक्त जहां कहीं भी जाता है तो चरणारविन्द भी वहां ही ताप दूर करता हुआ जाता है इससे भगवान् के चरणारविन्द की भक्तवश्यता निरूपण की है, यह ताप काल कृत है, इसलिए सर्व प्रकार के ताप से बचाने वाला चरण है यों कहा है, स्वभाव से ताप हो तो जिसके लिए चरण का अमृतत्व निरूपण किया है। यदि ताप कर्म के कारण व्याधिरूप में है तो उसके लिए चरण ओषधि आदि रूप कहा है जो शरणागत हैं तदर्थ भगवान् स्वयं ही आते हैं एवं साथ में चलते हैं यों भी कहा है।

सर्वतः जो विरक्त भक्त हैं उनके लिए चरण माहात्म्य कहते हैं कि 'यन्मूलकेता' ऐसे विरक्त भक्त सर्वदा भगवच्चरणारविन्द के नीचे ही रहते हैं, गृह तथा वृक्ष का आश्रय नहीं करते हैं सर्वथा केवल भगवच्चरणारविन्दाश्रय होकर रहते हैं, अर्थात् भगवच्चरणारविन्दही उनका मूल स्थान है। वे स्वच्छन्द व्यवहार नहीं करते हैं यह बताने के लिए 'केतु' शब्द के आगे उपसर्ग नहीं दिया है, तब तो उनके लिए पंचाग्नि तप करने वालों की तरह दूसरा कोई गृह निर्माण करना चाहिए? इस पर कहते हैं कि वे योगी (सन्यासी) हैं जिससे वे केवल भगवन्मार्ग में प्रयत्न वाले हैं प्रथमावस्था का (गृहस्थ विषयादि का) त्याग पूर्व अङ्ग है यदि केवल पूर्वाङ्ग हो कर स्थित हो जाते हैं तो वे वृकादि (विषयादि के) भक्ष्य हो जाते हैं वह त्याग दोष रहित नहीं होता है अतः वह समीचीन (सम्पूर्ण) न होने से उस त्याग का पाखण्डत्व पर्यवसान (अन्त) हो जाता है और जो सन्यासी पूर्वाङ्ग करने के अनन्तर अपनी सर्वक्रिया भगवत्प्राप्ति के लिए करते हैं वे शीघ्र बिना परिश्रम से महत् संसार दुःख को भूख प्यासादि तृष्णा रूप को) बाहर फेंक देते हैं। परलोक का दुःख तो उनको होता ही नहीं है वह तो उनका निवृत्त हो गया है। अतः सर्व पुरुषार्थ रूप जो भगवच्चरणारविन्द है उसको ही हम प्रणाम करते हैं–यों मुख्य हेतु का निरूपण किया है जिनके लिए भगवान् पधारे हैं वे (१) भगवदीय (२) शरणागत और (३) भक्त ये तीन प्रकार के कहे हैं ॥३८॥

आभास—अन्यार्थमागतं ये भजन्ते, तेषां स्वरूपं कथयन्तो मध्यभावेनाऽऽश्रममाहुः—

आभासार्थ—दूसरे कार्य के लिए अर्थात् सृष्टि के लिए आये हुए भगवान् को जो भजते हैं उनका स्वरूप निम्न श्लोक में कहते हुए मध्य भाव से उनका आश्रय सिद्ध करते हैं—

श्लोक—**धातर्यदस्मिन्भव ईश ! जीवास्तापत्रयेणाऽभिहता न शर्म ।**
आत्मँल्लभन्ते भगवंस्तवाङ्घ्रिच्छायां सविद्यामत आश्रयेम ।।३९।।

श्लोकार्थ—हे विधाता ! (पिता) हे ईश ! तीन तापों से **तप्त** जीवों को इस जगत् में शांति होती ही नहीं है, इसलिए हे भगवन् ! आपके चरणारविन्द की विद्यायुक्त छाया का आश्रय करते हैं ।।३९।।

सुबोधिनी – धातरिति । अन्यार्थं सृष्टयेर्थं समागत इति ज्ञापितम् । **धाता** विधाता, कर्ता; पितेत्यर्थः । **अस्मिन् भवे** संसारे यद्यस्माद्धेतोः **जीवास्तापत्रयेणाऽभिहता** एव भवन्ति, **शर्म** क्वाऽपि **न लभन्ते । ईशेति** संबोधनं तद्दूरीकरणसामर्थ्यार्थं प्रथमत एव निरूपितम् । एकेनाऽपि तापेनाऽभिहतः स्वाभाविकं शर्म न प्राप्नोति, शर्मान्तरस्य च का वार्त्ता ? त्रयेण त्वभिहतः सुतरामेव न शर्म प्राप्नोति । अतो वयं प्रथमत एव, संसारे प्रवेशमकृत्वैव, तवाऽङ्घ्रेश्छायामवेऽऽश्रयेम । प्रार्थनायां लिङ् । **भगवन्निति** संबोधनं सर्वतापनिवृत्तिपूर्वकसर्वेष्टसिद्धिनिरूपणार्थम् । छायया बहिस्तापो गच्छति । अन्तस्तापनिवारणार्थमाह-**सविद्यामिति** । यथा सजलं छत्रं भवति । छाया प्राधान्यं भगवदभिप्रायप्राधान्यार्थम् । सूर्यादिवशात् कदाचिच्छाया चरणारविन्ददेशादन्यत्र पतति, तदाऽन्यत्र स्थितैरेवाऽऽश्रयः कर्त्तव्य इति । अङ्घ्र्यधस्तात्तु घर्म एव भवति । निकटे न स्थातव्यमिति भगवदिच्छायां निकटे न स्थातव्यमिति भावः । सम्प्रतं तथात्वात् वयमतो हेतोश्छायामेवाश्रयेम । विद्या उपासना, ज्ञानं वा । भगवद्गुणानुसन्धानेन बा, भगवत्परिचर्यया वा क्वचित्स्थातव्यमित्यर्थः । एवं साक्षाद्भगवत्संबन्धे भक्तिप्रपत्ती निरूपिते ।।३९।।

व्याख्या—सृष्टिकार्य के लिए पधारे हुए हैं 'धाता' पद देने का आशय कहते हैं कि वे जगत् रचने वाले, कर्त्ता एवं पिता हैं, इस संसार में जिस कारण से जीव तीन तापों से तप्त होने से कहीं भी शांति पा नहीं सकते हैं, हे ईश ! यों संबोधन देकर यह सूचित किया है कि उन तापों से उत्पन्न दुःखों को दूर करने में आप समर्थ हैं, एक ताप से भी जो तप्त होता हैं उसको भी स्वाभाविक (आत्म सुख) सुख प्राप्त नहीं मिलता है तो अन्य सुखों की वार्ता ही क्या की जावे ? जो तीन तापों से तप्त हैं उनको तो स्वल्पमात्र भी शांति नहीं मिलेगी, इसलिए हम पहले से ही संसार में प्रवेश कर आपकी चरणच्छाया का आश्रय करते हैं, हे भगवान् ! यह सम्बोधन इसलिए दिया है कि आप निवृत्तिकर, सर्व प्रकार के इष्टफल को देने वाले हैं, छाया से बाहर का ताप निवृत्त होता है, भीतर के ताप की निवृत्ति के लिये कहा कि 'सविद्यां' जैसे छत्री जलवाली होती है वैसे यह छाया विद्या (उपासना व ज्ञान) युक्त हो तब भीतर का ताप निवृत्त करती है । छाया की प्रधानता भगवान् की प्रधानता कहने के अभिप्राय से कही है, तात्पर्य यह है कि जैसे सूर्य आदि के वश होने से

छाया कभी चरणारविन्द के स्थान से **अन्यत्र** होती है तब जहां छाया होती है वहां ही रहना पड़ता है क्योंकि छाया के आश्रय से ताप निवृत्ति होती है, चरण के नीचे तो घाम पड़ती है अतः यदि भगवान् की इच्छा ऐसी हो कि मुझ से दूर रहकर ही उपासनादि करो इसलिए भगवदिच्छानुसार हम आप (भगवान्) चरणारविन्द की छाया का ही आश्रय करते हैं, वह छाया उपासना व ज्ञान युक्त होने से उसका आश्रय कर कहीं भी रहना उचित समझते हैं, वहां ही भागवद्गुणों का अनुसन्धान वा भगवत्परिचर्या (सेवा) का आनन्द ले सर्व प्रकार के तापों को मिटाते हैं। इसी प्रकार साक्षात् भगवत्सम्बन्ध होने पर भक्ति और शरण लेने का सिद्धान्त निरूपण किया है ॥३९॥

आभास––तथाऽनधिकारे परोक्षे गङ्गातीरे स्थित्वा, श्रुतितात्पर्यं विचार्य, भगवच्चरणानुसंधानं कुर्वाणेन स्थातव्यमित्याह––

आभासार्थ—यदि वैसा अधिकार न होवे तो परोक्ष में गङ्गाजी के तट पर स्थित हो श्रुति का तात्पर्य विचारकर भगवद् गुणानुसंधान करना चाहिए यों निम्न श्लोक में कहते हैं—

श्लोक––**मार्गन्ति यत्ते मुखपद्मनीडैश्छन्दः सुपर्णैर्ऋषयो विविक्ते ।**
यस्याघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः ॥४०॥

श्लोकार्थ––तीर्थपद[1] आपके पाप नाशक जल से पूर्ण नदी के स्थानरूप चरणों के आश्रित जो ऋषि लोग हैं वे एकांत में बैठकर आपके मुख कमलरूप नीड़ों (घोसलों) से उत्पन्न[2] वेदरूप गरुडों द्वारा आपके चरणों का विचार करते रहते हैं ॥४०॥

सुबोधिनी—मार्गन्तीति यद्यस्माद्दृषयो। मन्त्रद्रष्टारः। ते **मुखपद्मनीडैश्छन्दः सुपर्णैः ते पदं मार्गन्ति** विचारयन्ति। वेदा हि गरुडप्रायाः पक्षिणः, तेषां मूलस्थानं भगवतो मुखपद्ममेव। यथा पद्मे मकरन्दादिपानार्थमागन्तुका अपि पक्षिणस्तिष्ठन्ति। एतेषां तु तन्नीडमेव। ते हि तत्रैव लब्धजन्मानस्तत एवोद्गच्छन्ति। अन्यत्र चरन्तोऽपि नीडतात्पर्या एव ते। छन्दसां सुपर्णत्वं श्रुतिसिद्धमेव। **'छन्दांसि रथो मे भवत'** इत्यत्र तेषामेव रथत्वम्, **'छन्दांसि सौपर्णेयाः'** इति श्रुतेः। सुपर्णपदेन च गरुडरूपतया भगवन्मन्त्रं जानन्ति। एवंप्रकारेण गङ्गातीरे स्थितो भगवान् स्वपदं प्रापयिष्यतीति। अत एव एकान्ते एकाकिभिरेव स्थीयत इत्यर्थः, बहूनां प्रापणाभावात्

१—तीर्थ जिसके चरणों में रहते हैं वैसे आपके (भगवान् के)   २—निकले (प्रकट हुए)

यस्येति प्रसिद्धस्य ते। **तीर्थपदः** तीर्थानि पादे यस्य। प्रसिद्धत्वान्न सन्देहः। तीर्थपदत्वात् सर्व-पापक्षयहेतुत्वमधिकारसिद्धये। तीर्थपदत्वमेवोपपादयति–**अघमर्षोदसरिद्वरायाः पदमिति। अघस्य** पापस्य मर्षो येन तादृशमुदमुदकं यस्याः, तादृशी या सरिद्वरा गङ्गा, तस्याः पदं स्थानमिति पद-विशेषणम्। गङ्गातीरे तीरे गमने पदपर्यन्तं गच्छति। वेदानां च पुनस्तात्पर्ये विचार्यमाणे भगवत्पदं जानन्ति। जलेन पापनाशनमानुषङ्गिक-फलत्वेनोक्तम्। चरणादन्यत्र गच्छन्त्यपि गङ्गा वेदवत्पुनस्तत्रैव प्रवेक्ष्यतीति वेदानां दृष्टान्तार्थे निरूपितम्। माहात्म्यं च यथा गङ्गायाः पद-संबन्धात्, एवं वेदप्रामाण्यमपि भगवत्प्रामाण्यादेव **'मन्त्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्'** इति स्मृतेः ॥४०॥

व्याख्या—जो मन्त्रद्रष्टा होते हैं उनको ऋषि कहा जाता है, वे आपके मुख कमल रूप नीड़ों (घोसलों) से प्रकट हुए वेद रूप गुरुड़ों द्वारा आपका चरण ढूँढ़ते (विचारते) हैं, वेद निश्चय से गरुड़रूप पक्षी हैं, उनका मूल स्थान भगवान् का मुख कमल ही है, जैसे कमल पर मकरन्दादि के पानार्थ पक्षी आकर बैठते हैं। वैसे इनका[1] भी तो यह नीड़ ही है, वेदों का पक्षीरूपत्व श्रुतियों से सिद्ध ही है। 'छन्दासि रथो मेमवतः' इस श्रुति में वेदों को रथ कहा है 'छन्दांसि सौपर्णेयाः' इस श्रुति में वेदों को सुपर्णपद से गरुड़रूप कहा है, गरुड़ पर भगवान् विराजते हैं इसलिए उसकी लोक में प्रसिद्धि हुई है। इसी प्रकार वेदों में भी भगवान् विराज रहे हैं। अतः वे वेद लोक में यज्ञरूप भगवान् का बोध (ज्ञान) कराते हैं, ऋषि ही मन्त्रद्रष्टा हैं जिससे वे मन्त्रों को जानते हैं, इस प्रकार गंगा के तट पर स्थिति करने से भगवान् अपने चरण की प्राप्ति कराएंगे। इस कारण से एकान्त में एकाकी होकर ही रहा जाता है, यदि बहुत होवें तो चरण प्राप्ति नहीं होती है कारण कि बहुत होने पर भगवद् गुणानुसन्धानादि चिन्तन नहीं हो सकता है। यस्य' पद कहने का भाव यह है कि आप जो प्रसिद्ध हैं, क्यों प्रसिद्ध हैं? इसके उत्तर में कहते हैं कि 'तीर्थपद' आप के चरण में तीर्थ रहते हैं, तीर्थ पद का तात्पर्य है कि सर्व पापों को वे क्षय करने वाले हैं, पापों के नाश हो जाने से अधिकार की सिद्धि प्राप्ति होती है, 'तीर्थपदत्व का प्रतिपादन करते हैं कि पापों को नाश करने वाला जल जिसमें ऐसी जो उत्तम नदी 'गङ्गा' उसका निवास स्थान भगवच्चरण ही है, 'पद' का अर्थ स्थान है। दूसरा 'पद' शब्द विशेषण है, अतः इसका भावार्थ होता है कि गंगाजी के तीर पर से जाते-जाते 'पद' चरण (गंगा) तक पहुँच जाते हैं और फिर वहाँ वेदों का भावार्थ विचारते हुए भगवच्चरणारविन्द को जान जाते हैं। जल से पापों का नाश होना तो गौण फल है।

चरण से अन्यत्र जाती हुई भी गंगा फिर वेद की तरह वहां ही (चरण में ही) प्रविष्ट होगी। यों वेदों के द्रष्टान्त के लिए निरूपण किया है जैसे पद के सम्बन्ध से गंगा जी का महात्म्य

---

[1] —वेद रूप गरुड़ पक्षियों का

है, यों वेद कि प्रामाणिकता भी भगवान् की प्रामाणिकता से हो है, मन्त्र और आयुर्वेद की तरह उसका प्रमाण आप्तों की (सत्य वक्ताओं की) प्रामाणिकता के कारण ही है, यों स्मृति कहती है ॥४०॥

आभास––अत्र मार्गणकर्तारः प्रपन्ना एव भवन्ति, नाऽन्यैर्मार्गणं कर्तुं शक्यते । अन्ये पुनस्तत्राऽप्यशक्ताः केवलं ज्ञानमार्गेण चरणारविन्दमाश्रित्य त्तिष्ठन्तीत्याहुः

आभासार्थ – जो शरणागत हैं वेही चरण को ढूंढ़ने में समर्थ होते हैं दूसरे नहीं । जो शरणागत नहीं हैं वे केवल ज्ञान मार्ग द्वारा चरण का आश्रय लेकर रहते हैं जो निम्न श्लोक में कहते हैं—

श्लोक––**यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधार्य ।**
ज्ञानेन वौराग्यबलेन धीरा व्रजेम तत्तेऽङ्घ्रिसरोजपीठम् ॥४१॥

श्लोकार्थ––जिस (प्रभु) की श्रद्धा तथा श्रवण भक्ति से शुद्ध हुए हृदय को आपके चरणकमलों का निश्चित सिहासन बनाकर एवं वैराग्य बल वाले ज्ञान से धीर हो आप (भगवान्) के चरणों को ही अपना स्थान बनाते हैं ॥४१॥

उस भगवान् के दो उरुओं (जंघाओं) से लोकों की आजीविका करने वाली वार्ताऐं[1] उत्पन्न हुई वार्ताऐं तो निराकार हैं पदार्थ तो आकारवाले हैं उनसे साकारवाले पदार्थ कैसे प्रकटे? उनको हानि आदि होना भी प्रकट दीखता है। इस पर कहते हैं कि जिससे ये 'वार्ताऐं' उत्पन्न हुई, वह (विभु) सर्व समर्थ है वृत्ति (धंधा) आदि के केवल आश्रय करने से ही सर्वदोषों को दूर कर उसको जिलाता ही है, उन अमूर्तों के आधार के लिए उनसे ही तीसरा, वैश्य वर्ण उत्पन्न हुआ। मनुष्यों की आजीविका को वह प्रसिद्ध वैश्य[2] अच्छी तरह चलाता है अथवा उससे उत्पन्न वैश्य वर्ण, 'य' पद अनुवाद मात्र है, 'नृणां' पद का आशय है कि देवों की आजीविका नहीं चलाता है, इससे साधारण पुरुष ही आजीविका पाते हैं न कि जिन्होंने परम अर्थ को प्राप्त कर लिया है 'सम्यग्वर्तन' अच्छी तरह चलाने का आशय है कि उसकी नित्य प्राप्ति के लिए विशेष प्रयास नहीं करना है ॥३२॥

आभास—चतुर्थोत्पत्तिमाह—

आभासार्थ—चतुर्थ वर्ण की उत्पत्ति इस श्लोक में करते हैं—

श्लोक—**पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसिद्धये ।**
तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ॥३३॥

---

[1] वार्ताऐं अर्थात् धन्धे [2] 'वैश्यदेवता' जो जीविका का रूप है

प्रकाश-

श्लोकार्थ—भगवान् के दो चरणों से धर्म (कर्म) की सिद्धि के लिए शुश्रूषा देवता प्रकटा, उसमें से पहले शब्दवर्ण उत्पन्न हुआ जिसकी वृत्ति से भगवान् प्रसन्न होते हैं ॥३३॥

सुबोधिनी—पद्भ्यामिति। भगवतः सर्वात्मकस्य पदार्थचतुष्टयमभिप्रेतम्। ज्ञानम्, क्रिया रक्षारूपा, जोविका, सेवेति। ततो **भगवतः पद्भ्यां शुश्रूषा** नाम सेवारूपा काचित्। भगवद्भक्तिरूपा अन्तरङ्गा काचिच्छक्तिरुत्पन्ना। तस्याः प्रयोजनमाह–**धर्मसिद्धय इति**। धर्मः सेवयैव भवति, गुरुसेवा, देवतासेवा, अरण्यसेवा, आत्मसेवेति। किं बहुना, सर्व एव धर्माः पातिव्रत्यादयोऽपि सेवायामेव पर्यवसिनाः। अतो धर्मसिद्धयर्थं सेवा गतिदात्री भगवद्गतिहेतोरुत्पन्ना। अनेन पूर्ववर्णानां पुरुषार्थान्तरहेतुत्वमर्थादुक्तम्। विशोऽर्थसाधकत्वम्, क्षत्रस्य कामसाधकत्वम्, ब्रह्मणो मोक्षसाधकत्वमिति। अन एव ब्राह्मण एव मुक्तिः, क्षत्रियेभोगः, वैश्येऽर्थः, धमः शूद्र इति। उत्तरस्य पूर्वहेतुत्वादुत्तरार्थमेव पूर्वग्रहणम्। अतो मोक्षार्थमेव धर्मादीनामन्यधर्माणां करणं ब्राह्मणस्य। तथा भोगार्थमेव क्षत्रियस्य धर्मादिकरणम्। तथा वैश्यस्य धनार्थमेव धर्मकरणम्। शूद्रस्य तु धर्मार्थमेव सेवाधर्मकरणम्। अतोऽयं महान्, अन्यार्थं धर्माकरणात्। अत एव **'यद्वृत्त्या तुष्यते हरिः' इति**। किञ्च, हरिः सर्वेषां दुःखहर्ता, सेवया च दुःखं गच्छति। अतः स्वकर्तव्यकरणादपि तुष्यति। तादृशसेवायां जातः शूद्रः, तन्निर्वाहार्थं वा। पुरा कल्पादौ। इदानीन्तनानां तु तदुद्भवत्वम्। शुश्रूषायां भव इति शकारोकारौ मिलितौ द्विरुक्तावेकशेषण शू भवतः, सन्प्रत्ययश्च जश्त्वेन दत्वमापद्यते, रेफस्य च परोक्षार्थं व्यत्ययः, **'अप्रत्ययात्'** इति सन्नन्तादकारो भवति, स्त्रीत्वाभावान्न टाप्। अण् प्रत्ययो वा तद्धितः, वृद्धयभावः परोक्षार्थः। **'शुगस्य तदनादरश्रवणात् तदाद्रवणात्'** इति तु योगेनाऽन्यथा शूद्रशब्दो निरुक्तः, स न जात्युपयोगी। तं वा निर्वचनं कालभेदेन स्थापयति-**पुरा शूद्र इति**। स हि यावत्पर्यन्तं सेवां न करोति तावत्पर्यन्तं शुचैव द्रवति। तस्याऽर्थाद्यभावाद्धर्मोऽपि यदि न भवेच्छोको भवेदिति, तेन चाऽऽद्रवतीति, पुराऽयं शूद्रो भवति, पश्चात्तु वर्णमात्रम्। शोकाभावे हेतुः–**यद्वृत्त्या तुष्यते हरिरिति**। हरितोषात् सर्वमेव सिद्धं भवतीत्यर्थः ॥३३॥

व्याख्या—सबके आत्मारूप भगवान् को चार पदार्थ (१-ज्ञान २-क्रिया (रक्षा) ३-जीविका और ४-सेवा) अभिप्रेत हैं इस कारण से भगवान् के चरणों से 'शुश्रूषा नाम वाली सेवारूप' कोई देवता प्रकटी, वह देवता भगवान् की कोई भक्ति (सेवा) रूपा अन्तरंग शक्ति है उससे प्रकट होने का कारण कहते हैं कि 'धर्मसिद्धय' धर्म की सिद्धि के लिए धर्म सेवा से ही सिद्ध होता है, गुरु सेवा, देव सेवा, अरण्य की सेवा आत्मा की सेवा बहुत क्या कहे सर्व धर्म पातिव्रत्य आदि भी सेवा में ही गिने जाते हैं, अतः धर्म की सिद्धि के लिए सेवा आगे बढ़ाने वाली है, जिससे भगवान् तक पहुँचा जाता है। इसलिए ही यह शुश्रूषा देवाता प्रकट हुई है इससे यह सूचित किया है कि पूर्व कहे हुए ब्राह्मणादि वर्णों के कर्म अन्य पुरुषार्थों के लिए हैं वैश्य अर्थ साधक हैं, क्षत्र काम

साधक है, ब्रह्म मोक्ष साधक है, अतएव ब्राह्मण वर्ण में ही मुक्ति की प्राप्ति होती है, क्षत्रिय में भोग, वैश्य में अर्थ और शूद्र में धर्म सिद्ध होता है।

उत्तर में कहा हुआ धर्म पहले कहे हुए का हेतु (कारण) है, पीछे कहे हुए के लिए ही पहले का ग्रहण किया गया है। अतः मोक्ष के लिए ही धर्म आदि अन्य धर्म ब्राह्मण वर्ण करता है, वैसे ही क्षत्रिय भी धर्मादि भोग की प्राप्ति के लिए करते हैं। वैश्य भी धन प्राप्ति के लिए धर्मादि करते हैं. शूद्र तो धर्म के लिए ही सेवा धर्म करते हैं। इसलिए यह शूद्र वर्ण महान् है क्योंकि दूसरे की प्राप्ति के लिए नहीं करता है, किन्तु धर्म प्राप्ति के लिए सेवा धर्म पालता हैं, 'यद्वृत्या तुष्यते हरिः' शूद्र अपनी वृत्ति सेवाधर्म पालता है, इसलिए भगवान् शूद्र पर प्रसन्न होते हैं, भगवान् का नाम यहाँ हरि देकर यह भाव प्रकट किया है की भगवान् सर्व के दुःखों को हरण करने वाले हैं और सेवा से भी दुःख नष्ट होता है इसलिए अपने कर्तव्य करने के कारण उन (शुद्रों) पर प्रभु प्रसन्न होते हैं।

अतः कल्प के आदि में शूद्र ऐसी सेवा में ही उत्पन्न हुआ है अथवा सेवा का निर्वाह हो सके (सेवा हो सके) इसलिए पैदा हुआ है। अभी के शूद्र तो उस शूद्र से उत्पन्न हुए हैं 'शूद्र' शब्द शुश्रूषा पद से कैसे बना? जिसका वर्णन आचार्य श्री ने पाणिनीय व्याकरणानुसार यों किया है 'शुश्रूषा' के दो 'श' और दो 'उ' (उकार) मिलकर 'शू' बना है अन्तिम मूर्धन्य 'ष' सन् प्रत्यय का है और वह 'ष' जश् प्रत्याहार का होने से **'झलाँजशोऽन्ते'** पाणिनीय सूत्रानुसार उसको 'द्' हुआ है और 'श्रू' में जो 'र' है। परोक्ष का अर्थ दिखाने के लिए उसका व्यत्यय (फेर फार इधर का उधर) हुआ है। अन्त में 'अप्रत्ययात्' पाणिनीय सूत्र से सन्नन्त होने से 'अ' प्रत्यय हुआ है अथवा अण् प्रत्यय तद्धित है. स्त्री लिंग न होने से 'टाप्' प्रत्यय न लगा है वृद्धि न होने का कारण परोक्ष अर्थ है।

'शुगस्य तदनादर श्रवणात् तदाद्रवणात्' व्यासजी के रचित ब्रह्मसूत्र ने 'शूद्र' शब्द की व्युत्पत्ति अन्य प्रकार से की है जिसका भावार्थ है, हंस द्वारा अपना अनादर सुनकर उसको शोक हुआ जिससे 'शूद्र' कहलाया, वह व्युत्पत्ति वर्ण के उपयोगी नहीं है अथवा कालभेद से उसकी व्युत्पत्ति कहते हैं 'पुरा शूद्र' वह जब तक सेवा नहीं करता है तब तक शोक के कारण गलता है, उसको अर्थ आदि भी नहीं होने से धर्म भी यदि न बने तो शोक होवे और उससे गलता है, इस लिए पहले यह शूद्र होता है, पीछे नाममात्र शूद्र बनता है, फिर जब अपने सेवा धर्म का पालन करता है तब हरि की प्रसन्नता से उसका सकल शोक नष्ट हो जाता है हरि की प्रसन्नता से सर्व सिद्ध होता है ॥३३॥

आभास—एवं वर्णानामुत्पत्तिमुक्त्वा भगवति तेषां विनियोगमाह—

आभासार्थ—इस प्रकार वर्णों की उत्पत्ति कहकर उनका विनियोग भगवान् में किस प्रकार होता है ? जिसका वर्णन करते हैं—

श्लोक—**एते वर्णाः स्वधर्मेण यजन्ति स्वगुरुं हरिम् ।**
श्रद्धयाऽऽत्मविशुद्धयर्थं यज्जाताः सह वृत्तिभिः ॥३४॥

श्लोकार्थ—ये चार वर्ण अपने-अपने धर्म के पालन से अपने गुरु (पूज्य) हरि का श्रद्धा से यजन करते हैं किस लिये करते हैं ? इसके उत्तर में कहा है कि अपने अन्तःकरण की शुद्धि के लिए करते हैं क्योंकि इनकी उत्पत्ति वृत्तियों के साथ ही हुई है ॥३४॥

सुबोधिनी—एते वर्णा इति । स्वधर्मेण वागादिव्यापारेण । स हि तेषां स्वधर्मं औत्पत्तिकः । वाग्व्यापारेण भगवद्भजनं ब्राह्मणस्य, रक्षादिना भगवद्भजनं क्षत्रियस्य, सेवोपयोगिपदार्थसमर्पणेन वैश्यस्य, सेवया शूद्रस्येति । तत्र सेवा प्रथमकक्षा सर्वसुलभा । यदि सर्वेऽपि भगवत्तोषमेव केवलं कामयन्ते, तदा सेवैव कर्त्तव्या । यदि स्वधर्मेण सेवितुमिच्छन्ति, तदा स्वधर्मसिद्धयर्थं सेवा कर्तव्या । तदा स्वधर्मस्य फलं वक्तुं तदुपयोगिभगवद्गुणानाह - **स्वगुरुं हरिमिति** । स्वधर्मेण स एवोपास्यः, यस्त्वावश्यको भवति । तत्र धर्मोपदेष्टृत्वात् भगवानेवोपास्यः । स हि स्वगुरुः, धर्मेण सहोत्पादनात् । यथार्थं ज्ञापयन् शब्दो ह्युच्चारयिता गुरुर्भवति, एवमेव भगवान् वृत्ति स्वधर्मं प्रथमत यत्पाद्य पश्चात्तदर्थमात्मानमुत्पादयतीति । किञ्च, तथैव कृते अस्य दुःखाभावो भवतीति नियमात् तथा कर्ता हरिर्भवति । **यजन्तीति** सिद्धवन्निर्देशः । उत्पत्त्यैव धर्मप्रकारयोर्ज्ञातत्वात्, विलम्बाभावाच्च, अपर्यवसितत्वाच्च सर्वदैव भागवद्भजने वर्तमानता । **यजन्तीत्यनेन** तत्प्रीतिजननप्रकारेण स्वधर्मः कर्तव्य इति सूचितम् । **श्रद्धयेति** हेतुः सर्वत्र । आत्मविशुद्धिरन्तः करणशुद्धिः । सर्वत्राऽपाखण्डिनां नियतं फलम् । शुद्धे त्वन्तःकरणे सर्वत्राऽधिकारो भवति, पश्चात्सर्वं सुलभम् । ननु निरन्तरसेवायां कोऽयं निर्बन्धस्तत्राऽऽह—यद्यस्मात् स्ववृत्तिभिः **सहजाताः** । अभजने कालान्तरे अवृत्तीनुत्पादयिष्यतीति ॥३४॥

व्याख्या—"स्वधर्मेण" अपने २ वाणी आदि कर्तव्य से भगवान् का भजन करते है क्योंकि यह उनका अपना सहज धर्म है, जैसाकि, वाणी की क्रिया (उपदेश-अनुष्ठान आदि) से भगवान् का भजन ब्राह्मण का सहजधर्म है, दुष्टों से रक्षा करने से भगवद् भजन क्षत्रिय का सहज धर्म है । सेवा के उपयोग में आने वाले अन्न, रस आदि पदार्थ जनता को पहुँचाने रूप धर्म से वैश्य भगवान् की पूजा करता है, सर्व की पूर्वोक्त प्रकार से सेवाकर शूद्र अपना धर्म पालता है । यह ही उसका भगवद्भजन है जिससे तुम्ह (शूद्र वर्ण) पर भगवान् प्रसन्न होते हैं उनकी प्रसन्नता से शूद्र के

सर्वकार्य सिद्ध हो जाते हैं, सर्व कर्त्तव्यों में 'सेवा' उत्तम कक्षा का धर्म है और सर्व सुलभ है । जो सकल वर्ण भगवान् की प्रसन्नता ही चाहते हैं तो सबको सेवा ही करनी चाहिए। यदि स्वधर्म से भगवान् का भजन करना चाहते हैं तो सब अपने धर्म का सिद्धि के लिए सेवा करनी चाहिए अब स्वधर्म का फल बताने के लिए उसके उपयोगी भगवद्गुणों का वर्णन करते हैं 'स्वगुरु हरिम्' स्वधर्म से भी वह हरि सेव्य है, हरि सेवा ही आवश्यक है, वहाँ भगवान् धर्मोपदेष्टा हैं अतः वह ही उपास्य हैं, वह ही अपने गुरु हैं, क्योंकि धर्म के साथ ही सबको उत्पन्न किया है, यथार्थ (ठीक अर्थ) जताते हुए शब्द का जो शुद्ध उच्चारण कराते हैं वे ही गुरु हैं, इसी तरह ही भगवान् वृत्तिरूप स्वधर्म को पहले उत्पन्न कर, फिर उसका पालन करने या कराने के लिए अपना आविर्भाव करते हैं, किन्तु यों ही करने पर इस (इस वर्ण) का दुःख दूर होगा। यह नियम होने से वैसे कर्ता हरि होते हैं 'यजन्ति' पूजन करते हैं, इस पद से यह सूचन किया है कि भजन सिद्ध ही है, 'उत्पत्ति' से ही धर्म और उसके करने का प्रकार जाना गया होने से उनमें बिलम्ब का कोई कारण नहीं है, अभी पूरा नहीं हुआ है अर्थात् भजन की कोई अवधि नहीं है अतः सर्वदा ही करते ही रहना चाहिए। 'यजन्ति' पद का यह भी भाव है कि भजन, स्वधर्म समझ इसी तरह करना चाहिए जैसे भगवान् में प्रेम उत्पन्न होवे, प्रेम से ही आसक्ति आदि की उत्पत्ति होती है वह भजन 'श्रद्धा से ही कर्तव्य है, वह हेतु सर्वत्र समझना चाहिए, अर्थात् श्रद्धा ही कार्य करने में साधन है और सेवा शुद्ध अन्तःकरण से करनो चाहिए देखा देखी वा पाषण्ड से नहीं करनी चाहिए, जो पाषण्ड बिना श्रद्धा से सेवा करते हैं उनको निश्चित् फल भगवत्प्रेम व प्रसन्नता आदि) मिलता है तथा जब अन्तःकरण शुद्ध है तब ही अधिकार प्राप्त हुआ है यों समझना चाहिए, अधिकारान्तर सब सुलभ है, हमेशा सेवा करने का आग्रह क्यों? इस शङ्का का निवारण करते हैं कि इसी कारण से यह धर्म अपनी वृत्तियों के साथ उत्पन्न हुए हैं—अतः यदि ऐसे स्वधर्म का पालन न किया जाएगा, तो कालान्तर में वृत्तिहीन होना पड़ेगा—जिससे लौकिक और पारलौकिक दोनों बिगड़ेंगे ॥३४॥

आभास—एवं भगवतः समष्टिव्यष्टिरूपोत्पादनम्, सर्वदेवानां तत्रोपभोगः, स्वार्थवर्णचतुष्टयोत्पादनम् तेषां च भगवद्भजनप्रकार इति चतुष्टयमुक्त्वा उपसंहरति——

आभासार्थ—इसी तरह भगवान् ने समष्टि व्यष्टि सृष्टि का उत्पादन किया और उसमें समस्त देवों का वहाँ उपभोग किया, अपने भू लोक का सृष्टि कार्य चलाने के लिए चार वर्ण बनाये तथा उनके लिए भगवद्भजन करने का प्रकार कहा यों ये चार कह कर अब इस विषय का निम्न श्लोक से उपसंहार करते हैं—

श्लोक—एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः ।
कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयम् ॥३५॥

श्लोकार्थ—हे क्षत्तः ! दैव कर्म और स्वभावरूप भगवान् के योगमाया के बल के उदयवाले इस चरित्र के आरम्भ करने की श्रद्धा कौन करे ? ॥३५॥

सुबोधिनी—एतत्क्षत्तर्भगवत इति । एतच्चतुष्टयमेवाऽस्माभिर्निरूपितं सूचनार्थम् । अधिकं तु स्वयमेव ज्ञातव्यमिति नैपुण्यार्थं संबोधनं **क्षत्तरिति ।** एकस्य वीर्यस्यांशभूतायाः क्रियाशक्तेः कोटयंशलेशो निरूपितः, अतिरिक्तो भगवान् पूर्ण एव । तदाह**—भगवत इति ।** तत्राऽपि त्रितयसंयोगमाह**—दैवकर्मात्मरूपिण इति ।** दैवं कालः, कर्म प्राणिनाम्, आत्मा स्वभावः, एतान्यपि स्वस्यैव रूपाणि । तानिरूपाणि वर्तन्ते यस्य । एकस्य ऽपि रूपस्य यत्राऽऽनन्त्यम्, तत्र को वा तं चतूरूपमानन्त्यचतुष्टयात्मकं निरूपयेत् ? किञ्च, योगमायाया बलस्योदयो यत्र, एतादृशं चरित्रम् । योगमाया हि क्षणमात्रेण कोटिब्रह्माण्डानि कर्तुं शक्नोति, तस्या अपि बलं भगवद्गुणैरेवेति । अथवा, योगमाया करणम्, योगमायया यो बलोदय इति । **उपाकर्तुम्,** यथा वेदा आरभ्यन्ते उपाकरणेन, समाप्यन्ते च उत्सर्गेण । तत्र भगवद्गुणानामपि मुख्यविद्यात्वात् तदुपाकरणं युक्तम् । समाप्तिर्दूरे, उपाकर्तुमपि कोऽपि न शक्नोति । उपाकरणमपि दूरे, करिष्यामीति प्रारम्भमपि कः कुर्यात् ? अन्ततो गत्वा श्रद्धामपि कः कुर्यात् ? अतो मया भगवतश्चतुर्मूर्तेरापाततो गुणाः कथितः ॥३५॥

व्याख्या—ये चार ही हमने केवल सूचना देने के लिए निरूपण किए हैं, अधिक आप खुद ही समझ लेओ । क्योंकि आप निपुण हैं, निपुणता के लिए ही 'क्षत्रः' संबोधन दिया है, एक वीर्य की अंशभूत क्रियाशक्ति का यहाँ करोड़वाँ अंश लेश मात्र निरूपण किया है, भगवान् तो पूर्ण ही हैं, इसलिए 'भगवतः' पद दिया है, उसमें भी देव, कर्म और स्वभाव इन तीनों का संयोग है, दैव का तात्पर्य है **काल**, कर्म से प्राणियों के कर्म समझने और 'आत्मा' का आशय है 'स्वभाव' ये तीनों भी भगवान् के ही रूप हैं, ये रूप जिसके हैं वैसे भगवान् के एक रूप भी अनन्त हैं, वह कौन है ? जो उनके चतुरूप वा चतुष्टय की अनन्तता का वर्णन कर सके किन्तु भगवान् चरित्र में योगमाया के बल का सर्वथा उदय ही है । योगमाया ऐसी बलवती है जो क्षणमात्र में कोटि ब्रह्माण्ड बना सकती है । उस (योगमाया) का बल भगवद्गुणों के कारण ही अथवा योगमाया करण (साधन) है अर्थात् योगमाया के बल का जो उदय है वह करण मात्र है ।

'उपाक्तुं' पद के भाव की स्पष्टता करते हैं कि जैसे वेदों का प्रारम्भ उपाकरण से किया जाता है और उत्सर्ग से पूर्णता की जाती है भगवान् के गुण भी मुख्य विद्या (ज्ञान) रूप हैं उसका भी उपाकरण करना उचित है समाप्ति तो दूर रही, विशेष स्पष्टता करते हुए कहते हैं कि उपा-

करण भी जब कोई नहीं कर सकता है वह ही करना दूर है तौ फिर उत्सर्ग का तो नाम ही नहीं लिया जा सकता है, प्रारम्भ के समीप जाकर करने की श्रद्धा, विश्वास,साहस भी कौन करे ? अतः मैंने चतुर्मूर्ति भगवान् के गुणों का ऊपर-ऊपर से ही वर्णन किया है ॥३५॥

आभास—न चैतावताऽहं निवृत्तः, किन्तु गुणानामानन्त्यमेव । तदाह—

आभासार्थ—इतना कहकर ही मैं रुकता नहीं हूँ क्योंकि भगवान् के गुण अनन्त हैं वे निम्न श्लोक में कहे जाते हैं—

श्लोक—**अद्याऽपि कीर्तयाम्यङ्ग ! यथामति यथाश्रुतम् ।**
कीर्ति हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीम् ॥३६॥

श्लोकार्थ—हे अङ्ग ! अन्य वर्णन से दूषित अपनी वाणी को पवित्र करने के लिए अब भी मैंने अपनी मति के अनुसार जैसा सुना है, वैसा भगवान् का यश गाता हूं ॥३६॥

सुबोधिनी—अद्याऽपि कीर्तयामीति। अङ्गेति कोमलसंबोधनमप्रतारणाय । **अद्याऽपोति**। यत आरभ्याऽहमुत्पन्नस्ततप्रभृत्यद्याऽपि मरणपर्यन्तं कीर्तयाम्येव स्वधर्मत्वात् । परं सूक्ष्मजीवत्वान्मयि विशेषः । **यथामतीति** मतिमनतिक्रम्य यावज्जानामि तावदेव कथयामि. न तु कल्पयित्वा । तत्राऽपि **यथाश्रुतम्**, गुरोः सकाशात् श्रवणनतिक्रम्य । अनेनाऽऽवृत्तिर्भगवद्गुणानामुक्ता । तत्र प्रयोजनमाह—**कीर्तिहरेरिति** । नूतनश्रवणे सामर्थ्यमुपायश्च नाऽस्ति, प्रयोजनाभावश्च; आनन्त्यात् स्वधर्माभावाच्च । अतो यावत्कीर्तयितुं शक्यते तावदेव श्रोतव्यम्, इत्यल्पं श्रुत्वा तदेव कीर्तयामि; तदाहैकबचनेन । **हरेरिति** तावतैव भगवान् दुःखं दूरीकरिष्यतीति । पुनः पुनः कीर्तनस्य तु प्रयोजनमस्ति । **स्वां गिरं सत्कर्तुम्** । **अन्यपदार्थानामभिधया** कथनेनेयं मद्वाणी **असती** जाता । भगवता स्वार्थमेव वागुपदि । वाणीं च स्वां समर्पितवान् स्वसेवार्थम् । तस्याः पति भंगवान् । भगवदर्थे स्वयं प्रेरकः । तथा च स्वतो वा, मत्प्रेरणया वा, अन्यमभिधाय वाणी व्यभिचारिणी जाता । तामिदानीं संस्करोमि, संस्कृता सा भगवति योजयीयेति। अतः संस्कारार्थे बहुधा कीर्तयामीत्यर्थः । अनेन यस्य यस्य साधनं भगवता स्वार्थे यद्दत्तम्, तदन्यत्रोपयोज्य तच्छुद्धयर्थं भगवति तत्पुनः पुनरुपयोज्यमिति ॥३६॥

व्याख्या—हे अङ्ग ऐसे प्रेम भरित कोमल सम्बोधन देने का आशय है कि मैं जो कुछ गुण वर्णन कर रहा हूँ वह तुमको धोखा देने के लिए नहीं है, किन्तु भगवान् के ऐसे ही अप्रतिम अनन्त-गुण है । जबसे मैं उत्पन्न हुआ हूँ वहां से लेकर आज तक एवं मरण तक भगवान् का गुणानुवाद

गाता हूं और गाता रहूँगा क्योंकि मेरा यह धर्म है किन्तु विशेषता यह है कि मैं सूक्ष्म जीव होने से अल्पज्ञ हूँ, जिससे अपनी स्वबुद्धि (अल्पबुद्धि) अनुसार जितना जानता हूं, उतना ही कहता हूँ न कि कल्पना करके कहता हूँ, जैसा बुध्यनुसार गुरु से सुन पाया है वैसा ही सुनाता रहता हूँ. इससे यह सूचित किया है, मैं यों पुनः पुनः सुनाने से भगवद् गुणों की आवृत्ति (अभ्यास) कर रहा हूँ, अभ्यास करने का प्रयोजन बताते हैं कि **'कीर्ति हरेः'** भगवान् की कीर्ति ऐसी ही है जो पुनः पुनः कहने व सुनने के लिए आकर्षित करती ही है, नवीन सुनने की शक्ति तथा कोई उपाय भी नहीं है और प्रयोजन भी नहीं है क्योंकि भगवान् के गुण अनन्त हैं, अनन्तता के कारण उनके सुनने की जो शक्ति (बुद्धि) च हिए वह अपने में न होने से उन (गुणों) को सुनना अपना धर्म (कर्म) नहीं है। अतः जितना कीर्तन हो सके उतना ही सुनना अपना धर्म है। इसलिए अल्प बुद्धि के अनुसार अल्प सुनकर उतना ही कीर्तन करता हूँ। इसलिए एक वचन से कहा है 'हरेः कीर्ति' भगवान् की कीर्ति, भगवान् इतने से ही दुःख मिटायेंगे इसलिए विशेष सुनने की आवश्यकता नहीं है, पुनः पुनः गुणानुवाद करने का प्रयोजन है, वह प्रयोजन यह है कि अन्य पदार्थों के वर्णन करने से वाणी अपवित्र हो गई है, अतः इस अपवित्र वाणी को पवित्र करने के लिए बार बार गुणगान करने की आवश्यकता है, भगवा् ने अपने लिए ही अर्थात् अपने गुण वर्णन करने के लिए अपने को उत्पन्न किया है और वाणी भी इसलिए दी है जिससे कीर्तन कर सकें, उस (वाणी) के पति भगवान् हैं, उस वाणी का भगवदर्थ प्रेरक भी स्वयं है किन्तु वैसे होते हुए भी यदि स्वतः अथवा मेरी प्रेरणा से वह वाणी अन्य विषय के वर्णन में प्रवृत्त हुई तो व्यभिचारिणी हुई, उस अपवित्र व्यभिचारिणी वाणी को गुणगान से शुद्ध करता हूँ, शुद्ध हो जाने पर भगवान् में उसका उपयोग किया जाएगा, अतः शुद्ध करने के लिए भगवत्कीर्ति का गान बहुत प्रकार से करता हूँ।

इससे जिस जिसको भगवान् ने अपने लिए जो-जो साधन दिये हैं यदि उनका विनियोग दूसरे में करने से वह अपवित्र हो गया हो तो उसकी शुद्धि के लिए उसको बार-बार भगवान् में वे साधन लगाने चाहिए ॥३६॥

आभास—एवमुपसंहृत्य सर्वेषां निर्द्धारितं जन्मफलमाह—

आभासार्थ—इसी तरह उक्त विषय का उपसंहार कर इस श्लोक में सर्व का निश्चित निर्णय किया हुआ जन्म फल कहते हैं—

श्लोक—एकान्तलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः ।
श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगम् ॥३७॥

श्लोकार्थ—उत्तम कीर्ति रूप मुकट वाले भगवान् के गुणों का गान ही, पुरुषों

का एवं वाणी का सम्पूर्ण लाभ है एवं विद्वानों ने प्रारम्भ की हुई कथारूप सुधा का ध्यानपूर्वक श्रवण करने में कान तथा पुरुषों का सम्पूर्ण लाभ है ॥३७॥

सुबोधिनी—एकान्तलाभमिति । अन्यानीन्द्रियाणि केवलं भगवदर्थं योजयितुमशक्यानि, देहार्थं तदुपयोगावश्यकत्वात् । दुष्टानि च न भगवति योजनीयानि । हस्तौ नित्यममङ्गलस्पर्शौ, तथा चक्षुषी; तथाऽन्यान्यपि देहनिर्वाहार्थमवश्यमन्यत्र योजनीयानि चेत् भगवदर्थे किञ्चिद्रक्षणीयम्; स्वतः शुद्धम्, शुद्धं कृत्वा वा । तदा द्वयं रक्षयणीयम्, वागिन्द्रियं श्रोत्रं च । अनयोर्न देहोपयोग आवश्यकः । तस्मादेते चेद्भगवत्कृपया स्वार्थं प्राप्ते भवतः, तदा भगवद्गुणा वक्तव्याः श्रोतव्याश्च । नाऽन्यद्वक्तव्यं श्रोतव्यमित्याह । **वचसो** वागिन्द्रियस्य । **एकान्तलाभः** एक एव भगवान् स्वार्थोऽन्तो यस्य । लाभो भगवत्प्राप्त्यैव समाप्यते । स को लाभ इत्याकाङ्क्षायामाह— **सुश्लोकमौलेर्गुणवादमिति** । सुष्ठु श्लोकाः कीर्तिप्रतिपादका भागवतादिरूपाः, तत्प्रतिपादिता कीर्तिर्वा मौलौ यस्य । अनेन तस्य कीर्तिर्मुकुटरूपा भवतीत्युक्तम् । तां चेदयं सं कुर्यात् '**सर्वस्य गात्रस्य शिरः प्रधानम्**' इति प्रधानमेव भूषितं भवेत् । तादृशस्य भगवतो गुणवादमुत्कर्षप्रतिपादकानां धर्माणां भावपूर्वकं निरूपणं लाभमाहुरिति संबन्धः । **आहुरिति** प्रमाणम् । न केवलं वचस एवायं लाभः, किन्तु **अनु** पश्चात् नु निश्चयेन वा, **पुंसामपि** लाभः । तदुपयोगार्थमन्येन्द्रियव्यापारात् स्वोपयोगेऽपि.स्वस्य तत्रोपयोगात्, कीर्त्तनद्वारा सर्वाण्येवेन्द्रियाणि स्वयं च सफलो भवति । श्रोत्रस्य चाऽयमेव लाभः । **चका**रात्तदनुवर्त्तिनां पुंसामपि । **विद्वद्भिरुपाकृतायां** भगवत्कथायामारब्धायाम् । **उपसंप्रयोगम्**, समीपे सम्यक् प्रकर्षेण योगो यस्य, तादृशं श्रवणम्, अमृतकथाश्रवणमिति यावत्, तच्छ्रुतेर्लाभः । श्रोत्रस्य विशेष उच्यते—भगवत्कथैव श्रोतव्या; तत्राऽप्यमृतरूपा प्रेम्णा निरूपिता; तत्राऽपि विद्वद्भिरेव निरूपिता. अन्यथा अज्ञैरन्यथा निरूपणसम्भवात् । तेषां पदार्थानां वस्तुतो भगवदीयत्वाभावाद्भगवत्कथायां तच्छ्रवणे श्रोत्रस्य व्यभिचार एव भवेत् । अतो भगवदीयपदार्थश्रवणार्थं विद्वद्भिरेव निरूपितं श्रोतव्यम् । तैरप्यन्यार्थनिरूपणे प्रकृते तात्पर्याभावात्, तन्न श्रोतव्यम् । तदाह — **उपाकृतायामिति** । कथा संबद्धा वार्ता, सैव सुधारसजनिका मृत्युनिवर्तिका च तदपि श्रवणं न दूरतः । अन्तः करणशुद्धि द्वारा ज्ञानं भविष्यतीति द्रविडमण्डकन्यायो भगवद्गुणेषु न कर्तव्यः । **सम्यक्त्वं** च स्वपर्यवसानात् । **प्रकर्षो** विस्मरणराहित्यम् । यद्येवं शृणुयात्, तदा श्रोत्रं स्वयं च **भगवदर्थं** भवेत्, अन्यथा व्यर्थो भवेत्, कालार्थः काकार्थो वा ॥ ३७ ॥

व्याख्या—वाणी एवं कानों के सिवाय अन्य इन्द्रियां केवल भगवदर्थ ही लगानी कठिन ही नहीं किन्तु अशक्य है क्योंकि उन अन्य इन्द्रियों का उपयोग देह के लिए आवश्यक है और जो दूषित हैं उन इन्द्रियों का उपयोग भगवान में नहीं करना चाहिए जैसे कि हस्त दूषित है क्योंकि नित्य अमङ्गल वस्तुओं का स्पर्श करता रहता है, वैसे ही नेत्र भी अमङ्गल पदार्थों को देखते रहते

हैं, यों अन्य इन्द्रियाँ भी देह निर्वाह के लिए अवश्य दूसरी वस्तु आदि में लगानी पड़ती है ऐसा होने पर कुछ इन्द्रियाँ तो भगवदर्थ रखनी ही चाहिए. वे इन्द्रियां स्वतः शुद्ध हों अथवा उनको स्वयं शुद्ध अवस्था में रखना चाहिए, वे कौनसी इन्द्रियाँ हैं जिनको शुद्ध रखा जा सकता है । इस पर कहते हैं 'वागिन्द्रियं श्रोत्रं च' वाणी और कान, इन दोनों का देह के लिए उपयोग आवश्यक नहीं है, इसलिए ये दोनों यदि भगवत्कृपा से भगवदर्थ लगाई जावे तो वाणी से भगवान् के गुण गाने चाहिए और कानों से भगवद्गुण सुनने चाहिए । वाणी से भगवत्सम्बन्धी विषय के सिवाय अन्य कुछ कहना ही नहीं चाहिए और न अन्य कुछ सुनना चाहिए, वाणीन्द्रिय का एक भगवान् ही अन्तिम सत्य स्वार्थ (अपना धन) है । अतः उस सत्यधन भगवान् की प्राप्ति से ही पूर्ण लाभ होता है अन्यथा नहीं होता है, वह कौनसा लाभ है ? इस पर कहते हैं कि सुश्लोकमौलेर्गुणवादमिति' उत्तम कीर्तिरूप मुकुट वाले भगवान् के गुणों का गान होना ।

कीर्ति का प्रतिपादन करने वाले भागवतादि शास्त्रों में जो कीर्ति प्रतिपादित है वह कीर्ति जिसके मुकुट में हैं । इससे यह बताया है कि उसकी कीर्ति मुकुट रूप है, अर्थात् ऐसी उत्तम कीर्त्ति अन्य किसी को नहीं है ऐसी उत्तम उस कीर्ति को बार बार रटे तो जैसे सर्वगात्रों में सिर मुख्य है वैसे यह कीर्ति का गान भी सर्वफलों वा साधनों में प्रधान भूषण हो जाय, अतः ऐसे भगवान् के उत्कर्ष प्रतिपादन करने वाले धर्मों का भाव सहित निरूपण ही लाभ है यों कहते हैं। 'आहुः' इस पद का तात्पर्य है यह प्रमाण है यह केवल वाणी का ही लाभ है, किन्तु इससे पीछे पुरुषों को भी लाभ प्राप्त होता है ।

उस (वाणी) के उपयोग के लिए अन्य इन्द्रियों का भी व्यापार (क्रिया) करने से अपना वहां उपयोग होने से कीर्तन द्वारा सर्व इन्द्रियों की तथा अपनी भी सफलता, सार्थकता सिद्ध होती है ।

अब श्रवण (सुनने) से श्रोत्रों (कानों) को भी यही लाभ मिलता है च' पद से यह बताया है कि श्रोतों को लाभ मिलता है वैसे जो पुरुष कानों के अनुवर्ती हैं अर्थात् कर्ण द्वारा सुनते है उन पुरुषों को भी यही लाभ मिलता है ।

विद्वानों ने जो अमृत रूप भगवत्कथा प्रारम्भ की हो उसको ध्यानपूर्वक सुनना, यह कानों का लाभ है । कानों के लिए विशेष कहते हैं कि वह कथा किस प्रकार की हो जिसको श्रोत्र सुने ? इस पर कहते हैं कि कथाकर्ता विद्वान् शास्त्र तत्व जानने वाला हो एवं प्रेम से उस अमृत रूप भगवत्-कथा को कहता हो ऐसी भगवत्कथा सुननी चाहिए, यदि कथाकर्ता शास्त्रतत्वज्ञ विद्वान नहीं है. केवल पल्लवग्राही (अज्ञानी) पण्डित है तो वह सत्य तत्व न बताकर अन्यथा बतायेगा अतः ऐसी यदि कथा कोई करे तो वह नहीं सुननी चाहिये । वह अज्ञ (अज्ञानी) कथाकार जो कहेगा उसमें वस्तुतः भगवदीयत्व का अभाव होगा अतः ऐसी भगवत्कथा के श्रवण से श्रोत्र व्यभिचारी होंगे ।

होंगे । श्रोत्र व्यभिचारी न होवे इसलिए भगवत्सम्बन्धी पदार्थों के श्रवण के वास्ते शास्त्र तत्वज्ञ विद्वानों, जो कुछ भगवदीय पदार्थों (लीलादि रहस्य) का वर्णन करते हैं वह श्रवण करना चाहिए वे भी यदि अन्य विषय कहे तो उसको नहीं सुनना चाहिये क्योंकि उस (अन्य विषय) से प्रयोजन नहीं है । इसको स्पष्ट करते हैं कि 'उपाकृतायां' जिस विषय के लिए कथा प्रारम्भ की है वह ही अमृत रस पैदा करने वाली और मृत्यु मिटाने वाली है । वह श्रवण भी दूर से (बिना मन लगाए) नहीं करना चाहिए, श्रद्धापूर्वक गुरु या कथा कर्ता के सन्निधि में प्रणिपात पूर्वक बैठ कर सुननी चाहिए । यों श्रवण करने से अन्तःकरण की शुद्धि द्वारा ज्ञान प्राप्त होगा । भगवद्गुणों के सुनने में द्रविड़ मण्डक न्याय[1] नहीं करना चाहिए । इसी तरह गुण श्रवण करना चाहिए जैसे उनकी स्थिति अपने (श्रोता के चित्त) में स्थिर रहे कभी भी उसका विस्मरण नहीं होवे । इस तरह जो श्रवण किया जावे तब कान और पुरुष भगवत्सम्बन्धी हो जावे नहीं तो श्रवण व्यर्थ हो जाय अर्थात् वह काल[2] तथा काक का उपयोगी बने ।।३७।।

आभास---नन्वल्पमेवोक्त्वा कथमुपसंहारः कृतः, कथं वा स्वार्थं निरूप्यते ? इत्युच्यते । भगवन्माहात्म्यं ज्ञातव्यम्, ततो भक्तिः, ततो भगवत्सायुज्यमिति । इमं क्रमं परिहृत्य वाक्शुद्ध्यर्थं गुणानुकीर्तनम्, इन्द्रियलाभार्थं, च श्रवण कीर्तने, इति कथमेवमुच्यते ? इत्याशङ्क्याऽऽह---

आभासार्थ—थोड़ा ही कहकर उपसंहार कैसे किया अथवा स्वार्थ के लिए कहते हैं यों कैसे कहा ? भगवान् का माहात्म्य जानना चाहिए, पश्चात् उससे भक्ति होती है । भक्ति से भगवत्सायुज्य प्राप्ति होती है इस क्रम का त्याग कर वाणी की शुद्धि के लिए गुणगान इन्द्रियों के लाभार्थ श्रवण और कीर्तन करना, यों कैसे कहा ? इस शङ्का के निवारणार्थ यह श्लोक कहते हैं ।

श्लोक--**आत्मनोऽवसितो वत्स ! महिमा कविनाऽऽदिना ।**
संवत्सरसहस्त्रान्ते धिया योगविपक्वया ।।३८।।

श्लोकार्थ---हे वत्स ! आत्मा की महिमा आदिकवि ने एक सहस्त्र संवत्सर के बाद योग से परिपक्व हुई बुद्धि से जानी है ।।३८।।

---

[1] —द्रविड़ देश में 'मालपुवे' नहीं बनते हैं वहाँ का एक पुरुष मध्य प्रदेश में गया वहां उन्हें देख कर पूछने लगा कि ये कैसे खाये जाते हैं, तब उपहास (हंसी मजाक) से उसको किसीने कहा कि पीछे से हाथ को फिराके दो पैरों के बीच में से 'मालपुआ' मुख में डाल कर खाया जाता है । यह उल्टा क्रम बताया है । 'प्रकाश'

[2] —जिस प्रकार काग (कौवे) की बोली—'काँ, काँ सुनने से कुछ समझ में न आने से सुनना और समय व्यर्थ है ।

सुबोधिनी—आत्मनोऽवसितो वत्सेति । आत्मनो भगवतो वासुदेवस्य महिमा, **आदिकविना** ब्रह्मणाऽपि सवत्सराणां सहस्रपर्यन्तं तपो योगं च कृत्वा, तत्परिपाके सति, संवत्सरसहस्रान्ते योगविपक्वयाऽपि बुद्ध्या अवसितः किम् ? अपि तु न ज्ञात एव । ब्रह्मणाऽपि, तपः कृत्वाऽपि, महताऽपि कालेन, महिमा चेन्न ज्ञातः; यस्य कथा अग्रे वक्तव्या; अन्यः को वा ज्ञास्यति । एतदर्थमेव तां कथां कथयिष्यामीति भावः । अत इन्द्रियलाभ एव । भगवद्गुणे कथिते, क्रमात्सर्वस्मिन्नपि संघाते स्वाधीने जाते, सुखेन साक्षाद्वैकुण्ठे भगवत्सेवा कर्तुं शक्यत इति मैत्रेयसिद्धान्तः । इमं पक्षं निराकृत्य योऽन्यथा वक्ष्यति, तमग्रे भ्रान्तत्वेन निराकरिष्यति **आत्मन इति** वस्तुप्राप्त्यभावेन दुर्लभता निराकृता । आत्मत्वेनाऽपि । प्रकाश मानस्य । किमित्यध्याहारेण वा, काकुस्वरकल्पनया वा, तथा वक्तव्यः । अथवा, ब्रह्मणैवाऽवसितः । तस्य साधनत्रयम्–प्रथमं भगवानात्मत्वेन प्रकटः, स्वयं चाऽऽदिकविर्वेदगर्भः । अनेन प्रमाणं प्रमेयं च तस्य सिद्धमित्युक्तम् । **संवत्सरसहस्रान्ते** इत्यादि साधनम् । तदा फलं युक्तमिति । तदापि वा न फलमिति चिन्त्यम् ।।३८।।

व्याख्या—आत्मा (भगवान् वासुदेव) की महिमा आदि कवि (ब्रह्मा) ने भी एक सहस्त्र वर्ष पर्यन्त योग तपस्या की जब वह योग और तप परिपक्व हुए तब उस शुद्ध परिपक्व बुद्धि से क्या जाना ? तब भी नहीं जाना जब ब्रह्मा ने सहस्त्र बहुत वर्ष (बहुत समय) तक तप करते हुए भी नहीं जाना तो (जिसकी कथा आगे कही जाएगी) उसे दूसरा कौन जान सकेगा इसलिए ही उस कथा को कहूँगा यह भाव है, अतः इन्द्रिय लाभ ही कहा, भगवद्गुणगान से क्रमशः समग्र संघात (देहादि) स्वाधीन होता है अर्थात् भगवत्परायण हो जाता है और भगवदीय हो जाता है, जिससे वह सुखपूर्वक साक्षात् वैकुण्ठ में मगवत्सेवा करने में समर्थ होता है, यों मैत्रेयजी का सिद्धान्त है । इस पक्ष का निराकरण (खण्डन) कर जो अन्यथा कहेगा उसको आगे भ्रान्त कहकर निराकरण किया जाएगा ।

'आत्मना' इस शब्द से यह भाव प्रकट किया है कि वह दुर्लभ नहीं है, क्योंकि 'आत्मा' स्वयं प्रकाश है, आत्मत्व के कारण भी प्रकाशित हो रहा है अथवा 'किम्' शब्द का अध्याहार कर अथवा काकुस्वर की कल्पना कर वैसे कहना चाहिए ।

अथवा 'ब्रह्मणैवाऽवसितः' ब्रह्मा ने ही जाना, उसने जाना जिसका कारण उसको जानने के लिए तीन साधन थे १-पहले भगवान् आत्मापन से प्रकटे २-ब्रह्मा स्वयं आदि कवि है क्योंकि वेद उसके भीतर है । इससे प्रमाण प्रमेय दोनों इस (ब्रह्मा) के सिद्ध हैं । सहस्र वर्ष तप तथा योग साधना करी, यह साधन है तब फल प्राप्ति उचित है तो भी फल न मिला यह विचारणीय है ।।३८।।

आभास---ब्रह्मणः कथा यथा तथास्तु, अन्ये तु महिम्नो ज्ञानार्थं ये यतन्ते,

तद्द्वारा च भक्ति प्रार्थयन्ते, ते केवलं भगवन्मायामोहिताः। ते यद्यपि अन्यान्मोहयितुं तथा वदन्ति, तथापि महती भगवन्माया तानपि व्यामोहयतीत्याह---

आभासार्थ—ब्रह्मा की कथा कैसी भी हो दूसरे जो भगवान् की महिमा के ज्ञान की प्राप्ति के लिए प्रयत्न करते हैं और उस (महिमा) के द्वारा भक्ति के लिए प्राथंना करते हैं। उनको तो केवल भगवान् की माया ने मोह में डाला है।

यद्यपि (हालांकि) वे दूसरों को मोह में डालने के लिए यों कहते हैं किन्तु भगवान् की महती माया ऐसी प्रबल है जो उनको भी मोह में डाल देती है—यों निम्न श्लोक में कहते हैं—

श्लोक---**अतो भगवतो माया मायिनामपि मोहिनी ।**
यत्स्वयं चात्मवर्त्मात्मा न वेद किमुताऽपरे ? ॥३९॥

श्लोकार्थ---इस कारण से भगवान् की माया, मायावालों को भी मोह में डाल देती है, कारण कि स्वयं (जीव) आत्मा होते हुए भी अपना मार्ग नहीं जानता है तो दूसरे कैसे जानेंगे ॥३९॥

सुबोधिनी—अतो भगवत इति। अतः कारणात्, यस्मात्ते माहात्म्यं ज्ञातुं प्रवृत्ताः इयमेव भगवन्माया, ते संसारं व्यामोहयित्वा मोक्षार्थं प्रवृत्ताः, तानपि व्यामोहयति। ननु भगवन्माहात्म्यज्ञानार्थं प्रवृत्ताः कथं व्यामुग्धा भवन्ति ? तत्राऽऽह—**यत्स्वयमिति**। अयमात्मा भगवान् स्वस्याऽपि मार्गं स्वयं न जानाति, किमुताऽपरे ? सहि यावत्करोति तावत्तस्य परोक्षे भवति। न हि कश्चिद्गन्ता दूरे गतः स्वातिक्रान्तं सर्वमेव मार्गं पश्यति, तथा सति न गत एव स्यात्। अतिनिपुणोऽपि पूर्वदिवसे यादृशं कुर्यात्तादृश पुनः कर्तुं ज्ञातुं वा न जानाति। अतः प्रतिक्षणं नूतनानन्तब्रह्माण्डनिर्माणात् पूर्वं येन मार्गेण साम्प्रतं सृष्टिसमर्थो वर्तते, तं मार्गं स्वयमपि **न** जानातीति युक्तम्। **अपरे** पुनस्तत्प्रेर्याः, क्वचिद्ब्रह्माण्डोदुम्बरे मशकवत्स्थिताः, स्वगतिमेव न जानन्ति, कुतो भगवद्गतिम् ? उत्प्रेक्षा त्वप्रमाणम्। अथवा, भगवन्माहात्म्यज्ञानार्थं प्रवृत्तः कथं भगवन्मायया मोह्यते, अन्यथा सन्मार्गो व्यर्थः स्यात्। अन्यत्र तस्या मोहकत्वं सिद्धमेव। भगवन्माहात्म्यज्ञानार्थं प्रवृत्तावपि यदि मोहयेत्, तदा प्रमाणानि दत्ततिलाञ्जलीनि स्युरित्याशङ्क्य, **स्वायोग्यमिच्छन् पुरुषः पतत्येव न संशयः।'** इति न्यायेन मायायाः को दोष इति वदन्, माहात्म्यज्ञानार्थं प्रवृत्तस्य स्वरूपमाह—**यत्स्वयमिति**। स्वयं जीव आत्माऽपि भूत्वा, कोऽहमादिकल्पे स्थितः ? कथमेतावत्पर्यन्तमागतम् ? इति स्वगतिं न वेद। सर्वज्ञा अपि जन्मत्रयं चतुष्टयं वा जानन्ति। अन्योन्यं ज्ञास्यन्तीति दूरकथा। शब्दात् ज्ञानमन्धपरम्परान्यायतुल्यमिति नाऽत्यन्तं प्रमाणम्। तस्मादस्मदुक्तमार्ग एव युक्तः। वस्तुतोऽयमेवार्थः, पूर्वं यद्व्याख्यातं तत्परमतात्। विद्यमानाज्ञानमसार्वज्ञमेव संपादयति। वेदे त्वसन्देहे सन्देहवचनं च, '**यदि वा न वेद**' इति, '**को हि तद्वेद**' इतिवत्। अतो यावत्किञ्चित् स्वकीर्तनोपयोगि तावदावर्तनीयमिति ॥३९॥

व्याख्या—भगवान् की महिमा (माहात्म्य) कितनी है जिन्होंने यह जानना चाहा उनको मोह में पटका, यह ही भगवान् की माया है। यद्यपि वे संसार को व्यामोह में डाल मोक्ष के लिए प्रवृत्त हुए तो भी उनको मोह में डाल दिया। जो भगवान् के माहात्म्य को जानने के लिए प्रवृत्त हुए वे कैसे मोहित होते हैं? इस पर कहते हैं कि 'यत्स्वयं' यह आत्मा भगवान् अपने भी मार्ग को स्वयं नहीं जानते हैं तो दूसरे कैसे जानगे? कारण कि वह जब तक बना के पूरा करता ही है तब तक वह अदृश्य हो जाता है। कोई भी पथिक, दूर जान पर अतिक्रान्त (चल कर आए हुए) सर्वमार्ग को नहीं देख सकता है तो उसने उस मार्ग को अतिक्रान्तही नहीं किया है। बहुत चतुर पुरुष भी पूर्व दिवस में जैसा कार्य करता है वैसाही फिर करने या जानने में असमर्थ होता है अतः प्रतिक्षण अनेक ब्रह्माण्डों की रचना करते हुए पहले जिस मार्ग से (प्रकार से) सृष्टि की अब जब सृष्टि रचना में तैयार होते हैं अर्थात् सृष्टि रचना के लिए तत्पर होते हैं तब उस मार्ग (प्रकार) को आप भी नहीं जानते हैं अतः अन्य प्रकार से कर डालते हैं, यह उचित है।

दूसरे जो उनके सेवक, ब्रह्माण्डरूप उदम्बर वृक्ष में मशक (मच्छर) को तरह रहने वाले अपनी ही गति नहीं जान सकते हैं वे भगवद्भक्ति कैसे जान सकेंगे? उत्प्रेक्षा तो प्रमाण नहीं है अर्थात् मन की कल्पना से भगवन्मार्ग का निर्णय प्रमाण नहीं है अथवा भगवन्माहात्म्य के ज्ञानार्थ प्रवृत्त पुरुष को यदि भगवन्मायामोह करती है तो सत्पुरुषों का मार्ग ही व्यर्थ हो जाता है, जो सत्पुरुष नहीं है उनको माया मोह में डालती है यह प्रसिद्ध ही है। भगवन्माहात्म्य के जानने के लिए प्रवृत्ति (यत्न) करने पर भी यदि माया मोह में डाले तब तो प्रमाणों को तिलाञ्जलि दी गई अर्थात् प्रमाण नष्ट हो गए, ऐसी शंका होने पर कहते हैं कि 'स्वायोग्यमिच्छन् पुरुषः पतत्येव न संशयः' अपनी शक्ति से जो वस्तु न मिलने वाली है उसको प्राप्ति की इच्छा करने वाला पुरुष गिरेगा ही, इसमें संशय नहीं है इस न्यायानुसार माया का इसमें कौन सा दोष है? यों कहते हुए माहात्म्य जानने वाले का स्वरूप बताते हैं 'यतस्वयं' जो स्वय (जीव) आत्मा होते हुए भी, मैं आदि कल्प मे कौन था? यहाँ तक ऐसी दशा को क्यों पहुँचा हूँ? इस प्रकार अपनी गति को नहीं जानता है, जो सर्वज्ञ हैं वे भी तीन वा चार जन्म तक जानते हैं, परस्पर जान लेंगे यह तो दूसरी कथा है। शब्द से ज्ञान हो जाएगा यह ता अन्धपरम्परा न्याय के तुल्य है, इसलिए वह पूर्ण प्रमाण नहीं है, इस कारण से हमारा कहा हुआ मार्ग ही उचित है अतः वास्तविक अर्थ यही है, पहले जो कहा वह दूसरों का मत है। विद्यमान वस्तु का अज्ञान, सर्वज्ञता का अभाव ही प्रतिपादन करता है।

सन्देह रहित वेद में भी सन्देह वचन हैं, जो नहीं जानता हैं यों कहा जावे तो उसको कौन जानता है? अतः जो कुछ अपने लिए भगवत्कीर्त्तन करने में उपयोगी है उसको ही लेकर बार-बार गुणगान करते रहना ॥३६॥

आभाभ---किञ्च, तदप्यशक्यम्, सापेक्षमिति । अतो नमनमेव कर्त्तव्यमित्याह---

आभासार्थ—गुण गान भी अशक्य है क्योंकि वह भी दूसरे की (गुरु की) अपेक्षा रखता है इसलिए भगवान् को ही प्रणाम करना चाहिए जिसमें किसी अन्य की अपेक्षा नहीं है, यों निम्न श्लोक में कहते हैं—

श्लोक---**यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह ।**
अहं चाऽन्य इमे देवास्तस्मै भगवते नमः ॥४०॥

श्लोकार्थ---मन सहितवाणी, अहङ्कार और अन्य देव न पहुँचकर लौट आते हैं उस भगवान् को नमस्कार है ॥४०॥

सुबोधिनी—यतोऽप्राप्येति । वाक् मनश्च यं भगवन्तमप्राप्यैव, अर्वागेव, निवर्तते, **अहङ्कारश्च** देवः । **अन्ये च इमे देवा** इन्द्रियाधिष्ठातारस्तमप्राप्यैव निवृत्ताः । **वाचोऽत्र** वेदरूपाः । **मन**स्तेषामपि पूर्वरूपं भगवदीयम् । **यतो वाचो निवर्तन्ते**' इति श्रुतेरप्यय मेवाऽर्थः । तदनु अहङ्कारः । यस्तु श्रुतौ '**अहमित्येवात्मानं वेद भगवान् । सोऽहंनामाभवत्**' इति । सोऽपि जगत्कर्ता स्वयमात्मानं न वेद । **तेन** वा जगन्निर्माणार्थे निरूपितानीमानि तत्त्वानि देवा न विदुः । तस्मान्माहात्म्यज्ञानं दुर्लभमिति तदर्थं प्रयासमकृत्वा, केवलं भगवते नमनं कर्तव्यम् । तदाह—**तस्मै भगवते नम इति । यादृशोऽसि हरे ! कृष्ण ! तादृशाय नमो नमः यादृशोऽस्मि हरे ! कृष्ण ! तादृशं मां हि पालय ।।४०।।**

इति श्री भागवत सुबोधिन्यां श्री लक्ष्मण भट्टात्मज श्री वल्लभदीक्षित विरचितायां
तृतीय स्कन्धे षष्ठाध्याय विवरणम् ।।६।।

व्याख्या—वाणी और मन जिस भगवान् को न पहुँचकर पीछा लौट आता है औंर अहङ्कार देव तथा दूसरे वे इन्द्रियों के अधिष्ठाता देव भी उसको प्राप्त न कर के ही लौट आते हैं । यहाँ वाणी वेदरूप समझनी चाहिए, उनकी भी भगवत्सम्बन्ध वाली पूर्व स्थिति मन है 'यतो वाचो निवर्तन्ते' इस श्रुति का भी यह तात्पर्य है कि वाणी जहां से मन सहित लौट आती है, उसके बाद अहङ्कार 'अहमित्येवात्मानं वेदभगवान्' सोऽहं नामाभवत्' भगवान् ने अपने को 'अहं' इतना ही जाना वह 'अहं' अहङ्कार शब्द से प्रसिद्ध हुआ, यों वर्णन किया गया है, वह जगत्कर्ता स्वयं भी आत्मा को नहीं जानता है और उसको जगत् की रचना में लगाये हुए तत्त्व रूप देव भी नहीं जानते हैं अतः भगवान् के माहात्म्य का ज्ञान दुर्लभ है उसके लिए प्रयास न कर भगवान् को केवल नमन् ही करना चाहिए । इसलिए कहा है 'तस्मैभगवते नमः, उस भगवान् को नमस्कार है ।

याद्दशोऽसि हरे कृष्ण ताद्दशाय नमो नमः ।
याद्दशोऽस्मि हरे कृष्णः ताद्दशं मां हि पालय ॥४०॥

हे हरे ! हे कृष्ण ! आप जैसे हैं वैसे आपको वांरवार नमस्कार है । हे हरे ! कृष्ण ! मैं जैसा भी हूँ वैसे मुझको पाल ॥४०॥

इति श्री मद्भागवत महापुराण के तृतीय स्कन्ध के छठे अध्याय को
श्री मद्वल्लभाचार्य चरण विरचित श्री सुबोधिनी
(संस्कृत-टीका) हिन्दी अनुवाद सहित सम्पूर्ण ।

भगवान् श्री कृष्ण की महिमा

राग सारंग

तुम बिनु साँकरैं को काकौ ।
तुमहि देहु बताइ देव मनि, नाम लेउँ धौं ताकौ ॥
गर्भ परीच्छित रच्छा कीनी, हुतौ नहीं बस मांकौ ।
मेटी पीर परमपुरुषोत्तम, दुख मैंटयौ दुहुँ-घाँ कौ ॥
हा ! करुनामय कुंजर टेरचौ, रह्यौ नहीं बल, वाकौ ।
लागि पुकार तुरत छुटकायौ, काट्यो बन्धन ताकौ ॥
अँबरीष कौं साप देन गयौ, बहुरि पठायौ ताकौं ।
उलटी गाढ़ परी दुर्वासैं, दहत सुदरसन जाकौ ॥
निधरक भए पांडु-सुत डोलत, हुतौ नहीं डर काकौ ।
चारौं वेद चतुर्मुख ब्रह्मा, जस गावत है ताकौ ॥
जरासिँधु कौ जोर उघार्‌यौ, फारि कियो द्वै फाँकौ ।
छोरी बंदि बिदा किए राजा, राजा ह्वै गए राँकौ ॥
सभा माँझ द्रौपदि-पति राखी, पति पानिप कुल ताकौ ।
बसन ओट करि कोट बिसंभर, परन न दीन्हौ झाँकौ ॥
भीर परैं भीषम-पन राख्यौ, अर्जुन कौ रथ हाँकौ ।
रथ तैं उतरि चक्र कर लीन्हौं, भक्त बछल-पन ताकौ ॥
नर-हरि ह्वै हिरणाकुस मारयौ, काम परचौ हो बाँकौ ।
गोपीनाथ सूर के प्रभु कैं, बिरद न लाग्यो टाँकौ ॥

।। श्री कृष्णाय नमः ।।
।। श्री गोपीजनवल्लभाय नमः ।।
।। श्री वाक्पतिचरणकमलेभ्यो नमः ।।

श्रीमद्भागवत महापुराण

तृतीय स्कन्ध

श्री मद्वल्लभाचार्य-विरचित सुबोधिनी (संस्कृत टीका) हिन्दी अनुवाद सहित

भगवत्कृत सर्ग (बन्ध सृष्टि) प्रकरण

"अध्याय"—७

—: विदुरजी के प्रश्न :—

कारिका—**हरेरिन्द्रियवर्गस्य मनसः सर्ग उच्यते ।**
संकल्पेन विकल्पेन द्विधा तद्विनिरूप्यते ।।१।।

कारिकार्थ—इस अध्याय में मन द्वारा हरि की इन्द्रियों का निरूपण है, वह निरूपण सङ्कल्प और विकल्प से दो प्रकार का कहने में आया है ।।१।।

कारिका—**संकल्पो निश्चयः प्रोक्तः स च सन्देहपूर्वकः ।**
अन्यथा ज्ञानमेव स्यात् तदर्थं प्रथमो द्विधा ।।२।।

कारिकार्थ—सन्देह के अनन्तर जो निश्चय होता है उसको यहां सङ्कल्प कहा गया है। यदि यों वैसा सङ्कल्प न होवे तो वह ज्ञान ही कहा जाय, इसलिए सङ्कल्प दो प्रकार का कहा है ।

कारिका—**विकल्पो विविधः पक्षस्ते प्रश्ना इह रूपिताः** ।।२½।।

कारिकार्थ—विकल्प का तात्पर्य है अनेक प्रकार के पक्ष अर्थात् विचार विविध विचार के प्रश्न यहाँ किये गये हैं ।।२½।।

कारिका – **अत्र सर्वाणि कार्याणि पृष्टानि भगवत्कृतिम् ।**
ज्ञातुम्, सा मनसा भाव्या पूर्वं चाऽपि कृतौ मनः ।।३।।

कारिकार्थ—यहाँ भगवत्कृति को जानने के लिए सर्व कार्य पूछे गये हैं वह पहले मन से विचारना चाहिये और फिर उसमें (कृति में) मन को लगाना चाहिये।

श्री शुक[1] उवाच-श्लोक—**एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ।**
प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ।।१।।

श्लोकार्थ – शुकदेवजी ने कहा–इस प्रकार कहने वाले मैत्रेय को द्वैपायन का ज्ञानी पुत्र विदुर वाणी से मानो प्रसन्न करता हो वैसे कहने लगा ।।१।।

गद्य—एवं पूर्वाध्यायान्ते **'उद्धृत्य पुष्पेभ्यः'** इति प्रश्ने स्वबुध्या यावदुद्धृतं तावन्निरूपितम्, तत्र **'यत्स्वयं चाऽऽत्मवर्त्मात्मा न वेद'** इति वचनात् भगवतोऽलौकिकं सामर्थ्यं प्रायेणाऽस्याऽनभिप्रेतमिति, तदभिप्रायेण जोवे भगवति च सन्दिग्धमर्थद्वयं पृच्छति । तत्र प्रथमं भगवति सन्देहचतुष्टयम्, जीवे च द्वयं पृच्छति –

गद्यार्थ—इस प्रकार पूर्व ६ अध्यायों के अन्त में **'उद्धृत्य पुष्पेभ्य'** : इस प्रकार के प्रश्न के उत्तर में कहा है कि अपनी बुद्धि से जो भो सार ले सका उतना कहा वहां यह कारण बताया है कि जब आत्मा भी अपना मार्ग नहीं जानता है, इस वचन से भगवान् में अलौकिक सामर्थ्य है। यह बहुत करके इसको (मैत्रेय को) पसन्द नहीं है। इसी अभिप्राय (मैत्रेय के अभिप्राय) के कारण ही जीव एवं भगवान् में सन्देह होने से दो अर्थ (विषय) पूछता है, उसमें पहले भगवान् में चार सन्देह और जीव में दो सन्देह पूछता है ।।१।।

विदुर-उवाच-श्लोक—**ब्रह्मन् ! कथं भगवतश्चिन्मात्रस्याऽविकारिणः ।**
लीलया चाऽपि युज्येरन्निर्गुणस्य गुणाः क्रियाः ।।१।।

श्लोकार्थ—विदुरजी ने कहा–हे ब्रह्मन् ! अविकारी और निर्गुण तथा केवल चेतन रूप भगवान् में लीला से भो गुण तथा क्रियाओ का होना कैसे हो सकते हैं ।।१।।

---

[1] —यह श्लोक क्षेपक (पोछे जोड़ा हुआ) सा दीखता है, क्योंकि आचार्य श्री की इस पर टीका ही नहीं है ।

सुबोधिनी—ब्रह्मन्निति। करणादिव्यापारास्त्वया एकविधा निरूपिताः, ते च गुणातीता एवेति वक्तुं न शक्यन्ते। सगुणाश्चेत् कार्यकारणवैलक्षण्यम्। **ब्रह्मन्निति** संबोधनं ज्ञानस्य निश्चितत्व एव ब्रह्मभावो भवतीति। तव निश्चितमेव, किन्तु बोधनार्थं पृच्छ्यत इत्यौद्धत्यसमाधानम्। **कथमिति** प्रकारे प्रश्नः। **भगवतश्चिन्मात्रस्येति**। भगवच्छब्दो न यौगिकः, किन्तु रूढ्या ब्रह्मपरः। तच्च चिन्मात्रमेवेति धर्मशक्तिविशेषस्वरूपाणामभावात्, वाच्यवाचकसंबन्धाद्यभावात्, अनिरूप्यत्वाच्च कथं तादृशस्य जगत्कर्तृत्वम्। कर्तृत्वादयश्च धर्मा विकृता विकारिणो भवन्ति। अतोऽविकारिणो भगवतः प्रयोजनसन्देहपूर्वपक्षाभावेऽपि, निर्गुणस्य गुणाः क्रियाः कथं भवन्तीति बीजसन्देहप्रश्नः। कार्यं हि बीजप्रयोजनाभ्यां विना न भवति। तत्र प्रयोननं परमानन्दस्य जगति नाऽस्त्येव। **'लोकवत्तु लीला** ……' इतिन्यायेन प्रयोजनाभावेऽपि लीलया करिष्यतीति चेल्लीलाऽपि न संभविष्यतीत्यग्रे वक्ष्यते। अस्तु वा लीला, तथापि जगतो बीजं न भगवान्, विलक्षणत्वात्। जगदचेतनं विकारि नानारूपं च, भगवांस्तु चिन्मात्रमविकारि च। **किञ्च**, जगत्सगुणम्, भगवान्निर्गुणः; अतः कार्यकारणवैलक्षण्यात् न भगवत्कार्यं जगत्। यद्यपि चिन्तामणेः सकाशात्तद्विलक्षणं सकलमेव कार्यमुत्पद्यते, तथापि पूर्वपक्षिणः पक्षे न चिन्तामणिमात्रात् कार्यमुत्पद्यते, अन्यथा सर्वदैवोत्पद्येत। किन्तु कामयितुः सन्निधाने यथा यथा चिन्तोपद्यते, घटाकारेण च; तथा तथा मणिसान्निध्यात् ते पदार्था मनसा भाविताः कायकृता इव भवन्ति। इयमलौकिकी तस्य शक्तिः। भगवतस्तु द्वितीयसान्निध्नाभावान्नाऽनेनाऽपि प्रकारेण कार्योत्पत्तिः सम्भाविता। तदाह—**चिन्मात्रस्येति** ।।१।।

व्याख्या—करणादि (इन्द्रियाँ, देवता और गोलकादि) का व्यापार (जानना, देखना, सुनना आदि) आपने एक प्रकार के ही कहे हैं, वे गुणातीत ही हैं यों नहीं कहा जा सकता है, यदि कहो कि सगुण हैं तो कार्य और कारण की विलक्षणता है, ब्रह्मन् ! यह सम्बोधन इसलिए मैत्रेयजी को दिया है कि निश्चित ज्ञान होने पर ब्रह्म भाव होता है, वह (ज्ञान) आप में निश्चय रूप से है ही, किन्तु मैं ज्ञान प्राप्ति के लिये ही पूछता हूं, उद्धत होकर नहीं पूछता हूं। इस सम्बोधन से विदुरजी ने अपनी नम्रता भी प्रकट की है।

'कथं' पद प्रश्न का प्रकार बताता है। 'भगवतश्चिन्मात्रस्य' यहाँ भगवन् शब्द यौगिक नहीं है, किन्तु रूढ़ि से ब्रह्म पर है और वह चेतन मात्र है। अतः इस स्वरूप में धर्म[1], शक्ति[2], विशेष[3] और स्वरूप[4] का अभाव है। वाच्य (अर्थ) और वाचक (शब्द) का भी सम्बन्ध नहीं और अवर्णनीय

१—'धर्म' अर्थात् स्वयं असत् जैसा होना मानना।
२—'शक्ति' अर्थात् कालादि रूप माया।
३—'विशेष' अर्थात् आकार आदि दूसरे से भेद बताने वाले खास गुण।
४—'स्वरूप' अर्थात् देह।

हैं। ऐसे चेतनमात्र जगत्कर्ता कैसे होगा ? कर्तृत्व आदिधर्म तो विकारी होते हैं, अतः अविकारी भगवान् में प्रयोजन सम्बन्धी भी कोई सन्देह नहीं है और पूर्वपक्ष का भी अभाव है, ऐसी दशा में निर्गुण में गुण और क्रियाएँ कैसे हो सकती हैं ? इस प्रकार बीज में सन्देह है, क्योंकि कार्य' बीज और प्रयोजन के बिना नहीं होता है। इन दोनों में से जगत् में प्रयोजन तो भगवान् का कुछ भी नहीं है, स्वयं स्वतः परमानन्द हैं। 'लोक वस्तुलीला कैवल्यम्' इस न्यायानुसार प्रयोजन न होते हुए भी लीलार्थ किया है। यदि यों कहो तो लीला भी नहीं बन सकती है, यों आगे कहेंगे अथवा लीला होवे तोभी भगवान् जगत् का बीज है यह बन नहीं सकता है, क्योंकि जगत् और भगवान् में विलक्षणता है, जैसे कि जगत् अचेतन (जड़) विकारी और नानारूप वाला है, भगवान् तो चेतन मात्र तथा अविकारी है, और विशेष में जगत् सगुण है और भगवान् निर्गुण है, इसी कारण से कार्य और कारण में विलक्षणता है जिससे जगत् भगवान् का कार्य नहीं है।

यद्यपि (हालांकि) चिन्तामणि से जो कुछ उत्पन्न होता है वह समस्त उससे विलक्षण ही है, तो भी पूर्वपक्षी के मतानुसार केवल चिन्तामणि से कार्य की उत्पत्ति नहीं होती है, यदि केवल उससे उत्पन्न होता हो तो सर्वदा ही पैदा होना चाहिये वह नहीं होता है किन्तु जब कोई कामना वाला मन में किसी कामना की जैसी-जैसी चिन्ता करता है घट वा पट आदि की वैसे मणि के सान्निध्य से वे मन से भावित (चाहे हुए) पदार्थ कार्यरूप में आते हैं, यह उसकी अलौकिक शक्ति है। भगवान् के यहां तो अन्यथा सान्निध्य होने से चिन्तामणिवत् कार्योत्पत्ति नहीं हो सकती है, इसलिए कहा है 'चिन्मात्रस्य' कि वह केवल चेतन स्वरूप है ॥१॥

आभास—एवं बीजभावं दूषयित्वा फलभावापन्नां लीलां दूषयति—

आभासार्थ—इस प्रकार बीजभाव को दूषित कर फलभाव को प्राप्त लीला को दूषित करते हैं।

श्लोक—**क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः ।**
स्वततृप्तस्य च कथं निवृत्तस्य सदाऽन्यतः ॥२॥

श्लोकार्थ—बालक कामना और अन्य से क्रीड़ा करने की इच्छा करता है, जो स्वतः तृप्त है और सदैव अन्य से निवृत्त है अर्थात् जिसको दूसरे से किसी प्रकार का सम्बन्ध ही नहीं है उसको खेलने की इच्छा कैसे हुई होगी ॥२॥

सुबोधिनी—क्रीडायामिति । लीला नाम विलासेच्छा, कार्यव्यतिरेकेणैव कृतिमात्रम्। न तया कृत्या बहिः कार्यं जन्यते, जनितमपि कार्यं नाऽभिप्रेतम्; नाऽपि कर्तरि प्रयासं जनयति, किन्त्वन्तःकरणे पूर्णे आनन्दे तदुल्लासेन कार्यजननसदृशी क्रिया काचि-

दुत्पद्यते, यथा लोके राज्ञः। सा लीला। साऽपि नोपपद्यते। तत्र प्रयोजनाभावेऽपि हेतुरस्ति। स च हेतुर्लोकसिद्ध एव वक्तव्यः, लोकन्यायेन लीलानिरूपणात्। स च लीला बाले प्रसिद्धा। बालस्याऽपि कामेनैव चिक्रीडिषा भवति, अन्यथा सर्वदैव क्रीडितुमिच्छा स्यात्। कामोऽपि सहेतुकः, अन्यथा सर्वदा स्यात्। तदाह—**अर्भस्य क्रीडायामुद्यमः** प्रथमतो भवति। स चाऽर्भस्य प्रथमं कामात्। तत्रैवं वाक्यरचना—प्रथमतोऽर्भस्य कामो वासनया, **'काममय एवाऽयं पुरुषः'** इति श्रुतेः। तदनन्तरं चिक्रीडिषा क्रीडितुमिच्छा अन्यतश्च भवति; अन्यं बालकं निमित्तमाश्रित्य, एकस्य क्रीडाऽसम्भवात्। तदभावे कामेऽपि क्रीडेच्छा निवर्त्तत इति। **कामोऽत्र** क्रीडाज्ञानम्। क्रीडायाः फलरूपत्वात् साधनरूपत्वाञ्च कामप्रयत्नयोरेकविषयत्वम्। यत्र पुनः स्वर्गादौ साधनफलयोर्भेदः, तत्र कामः स्वर्गे, चिकीर्षा यागे। अत्रोऽत्र न पौनरुक्त्यम्। तदनन्तरं क्रीडायामुद्यमो भवति, क्रीडां कुर्तुमुद्युक्तो भवतीत्यर्थः। केचित्तु, 'कामस्यैव विशेषणमुद्यमं वदन्ति। उद्यमयतीत्युद्यमः, काम एव पुरुषमुद्यमयति अन्यतश्चिक्रीडिषा भवति' इति। तच्चिन्त्यम्। एतादृशोऽदि पक्षो भगवति न सम्भवति। स्वतृप्तस्य कामो न सम्भवति। कामो ह्यपूर्णस्यैव, अन्यथा फले जातेऽपि कामः स्यात्। स्वस्यैव सर्वफलरूपत्वात् प्राप्तत्वाच्च तृप्तस्य कामाभावो लोकसिद्धः। प्रकारभेदेनैव कामतृप्तिश्चेदतृप्तो भगवान् स्यात्। ततश्च स्वार्थमेवकुर्यात्। एतादृशी तृप्तिरदूषणमिति चेत् स्वानन्दस्य परिच्छेदः स्यात्। तस्माद्युक्त्या कामो निरूपयितुमशक्य इति **'सोऽकामयत'** इति श्रुतिरन्यपरा भवति। नित्यश्चेत् कामः स्यात्, सर्वदैव कार्यं भवेत्। कार्यपक्षे तु तज्जनकान्तराभावादनुत्पत्तिरापद्येत। कालादिना तदुद्बोधपक्षेऽपि भगवतः कालादिसंबन्धो भवेत्। स च नास्तीत्याह **–निवृत्तस्य सदाऽन्यत इति**। अन्यसंबन्धाभावस्तस्य सर्वदा; अतोबीजप्रयोजनाभावात् भगवतः कार्यपक्षोऽनुपपन्न ॥२॥

व्याख्या—लीला किसे कहते हैं ? इस प्रश्न के उत्तर में कहते हैं विलास करने की इच्छा को लीला कहते हैं। वह कृति बिना प्रयोजन के की जाती है। ऐसी कृति से बाहर कार्य उत्पन्न नहीं होता है, यदि उत्पन्न भी हो जावे तो वह अभिप्रेत नहीं है। यह कृति (लीला होने से) उत्पन्न होने में कर्त्ता का श्रम नहीं कराती है किन्तु अन्तःकरण में पूर्ण आनन्द होने पर उसके उल्लास से कार्यं को उत्पन्न करने के समान कोई क्रिया शक्ति उत्पन्न होती है जिसको 'लीला' कहते हैं जैसे लोक में राजा को खेल करने की इच्छा होती है। इस प्रकार की क्रिया होनो भी भगवान् में नहीं बनती है। उसमें प्रयोजन के अभाव होने पर भी कोई कारण है और वह कारण लोक सिद्ध हो ऐसा कहना चाहिए क्योंकि लोकन्याय से लीला का निरूपण करते हो और प्रसिद्ध है कि वह लीला बालक करते हैं, बालक भी तभी रमण करते हैं जब उनको मन में कामना होती है नहीं तो सदैव क्रीड़ा करने की इच्छा होती रहे व सदा क्रीड़ा करते रहें। उस कामना का भी अवश्य कोई हेतु होगा ? नहीं तो कामना सर्वदा होती रहे, उसका वर्णन करते हैं कि, बालक पहले क्रीड़ा का उद्यम करता है, वह उद्यम बालक तब करता है जब उसके मन में क्रीड़ा की कामना उत्पन्न होती है

इस विषय के सम्बन्ध की वाक्य रचना इस प्रकार है। पहले बालक को वासना से कामना उत्पन्न होती है। जैसा कि भगवती श्रुति 'काममयएकाऽयं पुरुषः' कहती है कि यह पुरुष कामना से पूर्ण है। वासना से कामना की उत्पत्ति होने के अनन्तर दूसरे के साथ खेलने की इच्छा करता है। क्योंकि एक (अकेला) क्रीड़ा कर नहीं सकता है। अतः दूसरे बालक को निमित्त बनाकर खेलता है। यदि दूसरा बालक न होवे तो कामना होते हुए भी क्रीड़ा करने की इच्छा पूर्ण नहीं होती है। "कामना" का आशय है कि क्रीड़ा करने का ज्ञान (विचार) उत्पन्न होना, क्रीड़ा फलरूप है तथा साधनरूप भी है, अतः काम और प्रयत्न एक ही विषय हैं, किन्तु स्वर्ग आदि में यों नहीं है। वहां साधन और फल पृथक हैं। जैसाकि कामना स्वर्ग प्राप्ति की होती है वह फल है और उसकी प्राप्ति के लिये यज्ञ करने की कामना होती है, क्योंकि यज्ञ साधन है। बिना साधन करने के स्वर्गरूप फल प्राप्त नहीं होगा। इसलिये यहां पुनरुक्ति (दोहराने) का दोष नहीं है।

